# संस्कृतसाहित्यम्

## प्रथमो भागः

कर्नाटकसंस्कृतविश्वविद्यालयस्य बि.ए.प्रथमवर्षस्य संस्कृतभाषापत्रिका

संग्राहकः- डा. वीरनारायण पाण्डुरङ्गी

कर्नाटकसंस्कृतविश्वविद्यालयः

बेङ्गळूरु

# भूमिका

श्रीगुरुराजो विजयते।

कर्नाटकराज्ये संस्कृतविद्यायाः अभिवृद्धये स्थापितोऽयं संस्कृतविश्वविद्यालयः। संस्कृतस्य अध्ययनाध्यापनयोः बलवर्धनं, संस्कृतग्रन्थानां प्रकाशनम्, शास्त्रेषु निहितानां गूढतत्त्वानामनुसंधानेन बहिः सर्वजनसाधारणतया प्रकाशनमित्यादयः कार्यविशेषाः अनेन विश्वविद्यालयेन संसाधनीयाः येन संस्कृतस्याभिवृद्धिर्नूनं भवेत्।

तत्र कार्येष्वादिमं विद्वत्कक्ष्यीयाणां सर्वेषां पाठ्यपुस्तकानां मुद्रापणम्। अतः ऐदंप्राथम्येन विद्वन्मध्यमाकक्ष्याणां संस्कृतभाषापाठ्यग्रन्थानां प्रकाशनमत्र विधीयते। यद्यपि विद्वच्छात्राः संस्कृतभाषामयानेव प्राचीनान् ग्रन्थान् पठन्ति, तथापि आधुनिकसंस्कृतसाहित्यपरिचयस्तेषां न्यून एवेति निश्चित्य आधुनिकसंस्कृतसाहित्यपरिचयाय आधुनिकानां प्रसिद्धानां कवीनां काव्यानि, नाटकानि, गद्यानि, चम्पूकाव्यानि च पाठ्यत्वेन चितानि ।

अत्र च छात्राणामानुकूल्याय विविधेषु ग्रन्थेषु पृथङ्मुद्रितानां पाठ्यानां संग्रहेण एकत्रोपलब्धिर्यथा स्यात् तथा पुस्तकमिदं मुद्राप्यते। एतन्मुद्रणकार्ये प्रोत्साहितवतीभ्यः विश्वविद्यालयस्य कुलपतिस्थानमलंकुर्वतीभ्यः प्रो.पद्मा शेखरमहोदयाभ्यः कृतज्ञताः समर्प्यन्ते। तथा अध्ययनमण्डल्याः सदस्येभ्यः प्रो.के.बि.अर्चक-विदुषी पी.हेच्.विजयलक्ष्मी-डा.सि.नञ्जुण्डय्य-प्रो.गिरीशचन्द्रमहोदयेभ्यः कृतज्ञताः समर्प्यन्ते। भिन्नेषु स्थानेषु मुद्रितानामेतेषां ग्रन्थानामेकत्र प्रकाशने दत्तानुमतिभ्यः संस्कृतभारत्याः सत्यनारायणभट्ट-जनार्दनहेगडेमहोदयेभ्यः, सुधर्माप्रकाशनस्य संपत्कुमार ऐयंगारमहाशयेभ्यश्च आधमर्ण्यं समर्पयामि। तदत्र कार्ये सहकृतवतां डा.मञ्जुनाथभट्ट, विदुषी शकुन्तला भट्ट, जि.कृष्णप्रसाद इत्येतेषां साहाय्यं च स्मरामि। मन्ये छात्राः अस्य पुस्तकस्य लाभं पाप्स्यन्तीति।

डा. वीरनारायण पाण्डुरङ्गी

निर्देशकः, स्नातकोत्तरसंशोधनाध्ययनविभागः

कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूरु

# विषयानुक्रमणिका

| | भाषापत्रम्<br>प्रथमभाषा संस्कृतम् | लेखकः संपादको वा | प्रकाशनम् | | अङ्काः |
|---|---|---|---|---|---|
| गद्यभागः | यदुमहाराजः | एच्.आर्. विश्वासः | संस्कृतभारती नवदेहली<br>अक्षरं गिरिनगरम् बेङ्गळूरु | 1 यदुमहा-राजः<br>2.पादत्राणे<br>3.मर्त्यलोक च्छाया | 20 |
| पद्यभागः | भीमाम्बेडकरशतकम् | शान्तिभिक्षुशास्त्री | राष्ट्रियसंस्कृत संस्थानम् | आद्याः चत्वारिंशत् श्लोकाः | 25 |
| नाटकभागः | कौमुदीमहोत्सव नाटकम् | विजयाम्बिका | सं.के.टि.पाण्डुरङ्गी द्वैतवेदान्ताध्ययन संशोधनप्रतिष्ठानम् बेङ्गळूरु | 1-2 अङ्कौ | 25 |
| अविस्तृत पठ्यम् | सुधन्वचरितम् | वरदराजअय्यङ्गार | सुधर्मा प्रकाशनम् रामचन्द्र अग्रहारः मैसूरु | पूर्णम् | 30 |

## कविपरिचयः

### डा. एच्. आर्. विश्वासः (1959-)

डा. एच् आर् विश्वासमहोदयः विख्यातः आधुनिककथालेखकः संस्कृतभारत्यां संस्कृतसंभाषणान्दोलने च कृतमहाश्रमः। अखिलभारतीयसंस्कृतप्रशिक्षणप्रमुखः प्रकाशनप्रमुखश्चास्ते। एस्.एल्.भैरप्परचितस्य आवरण इत्याख्योपन्यासस्य अनेन विहितः संस्कृतानुवादः साहित्याकाडमीपुरस्कारमभजत।

### विजयाम्बिका

विजयाम्बिका कर्णाटभूपालमहिषी सप्तमशतकात् दशमशतकमध्यकाले आसीत्। सरस्वतीव कार्णाटी विजयाम्बा जयत्यसौ। या वैदर्भीगिरां वासः कालिदासादनन्तरम्।। इति राजशेखरेण स्तुतेयम्। नीलोत्पलदलश्यामां विज्जिकां मामजानता। वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती।। इति आत्मानं परिचाययति।

### डा. शान्तिभिक्षुशास्त्री

शान्तिभिक्षुशास्त्री बुद्धविजयकाव्य-बुद्धोदयादिकाव्यानां रचयिता प्रसिद्धः कविः। अनेनेदं भीमाम्बेडकरविजयाख्यं खण्डकाव्यं सरलसंस्कृतेन निबद्धमस्ति। बुद्धविजयकाव्यं साहित्याकाडमीपुरस्कारेण सभाजितमस्ति।

### क.न.वरदराज अय्यङ्गार्यः (1920-1990)

क.न.वरदराज अय्यङ्गार्यः संस्कृतस्यैकमात्रदिनपत्रिकायाः संस्थापकः विद्वांश्च। मैसूरुनगरे कृतवसतिना अनेन 1970 वर्षे सुधर्मापत्रिका प्राथम्येन प्रकाशिता इदानीमपि वार्ताः प्रसारयति। सुधर्माप्रकाशनद्वारा अनेके ग्रन्थाः अनेन लिखिता मुद्रापिताश्च।

# 1. पाठः

# यदुमहाराजः

## कन्नडमूलम् - केरूरु वासुदेवाचार्यः

## डा. हेच्. आर्. विश्वासः

1329 तमस्य शालिवाहनशकवर्षस्य पुष्यमासे कस्मिंश्चित् दिने अरुणोदयात् पूर्वमेव सहस्राधिकाः सैनिकाः मैसूरुनगरं प्रविश्य सर्वासु वीथीषु विकीर्णाः अभवन् । सैनिकानां कोलाहलः, अश्वानां हेषारवः, रणवाद्यानां निनादश्च नगरमेव अकम्पयन् । किम् एषः परराजानाम् अभियोगः, उत लुण्ठाकानाम् उपद्रवः इति न केनापि ज्ञातम् ।

सर्वाणि अपि गृहद्वाराणि बहिर्भागे तालबद्धानि कृतानि आसन् । ये केचन 'कः एषः अनर्थः' इति कुतूहलेन वातायने मुखं संस्थाप्य अपश्यन् ते च धन्विनां निशितानां बाणानां लक्ष्याणि अभवन् । अकस्मात् मार्गम् आगतवतां नागरिकाणां तु शरीराणि विखण्डितानि एव ।

एवं नागरिकाणां दिग्बन्धनं कृत्वा सैनिकाः ततः राजप्रासादस्य आक्रमणम् अकुर्वन् । प्रासादरक्षकाः शूराः । परं तेषां संख्या अल्पीयसी । स्वामिभक्ति-परायणाः ते सावेशं युद्धं कृत्वापि वीरस्वर्गं प्राप्नुवन् ।

उद्धताः सैनिकाः राजप्रासादस्य मुख्यद्वारं भञ्जयित्वा अन्तः प्रविष्टवन्तः । तदा महाप्रभुः चामराजः स्नानं समाप्य देवायतने उपविश्य आह्निकं कुर्वन् आसीत् । ससैन्यम् आगतम् उन्मार्गिणां सैनिकानां नायकं राजपुरोहितः मन्दिरात् बहिः आगत्य अवदत् - "मारनायक ! शान्तराज ! किमिदम् अकार्यं क्रियते ? आ बाल्यात् महाराजेन पुत्रवत् पोषितौ पालितौ भवन्तौ । अजातशत्रुं तं कुतः प्रहर्तुम् इच्छतः..?"

अहो, वचनानि यावत् न समाप्तानि तावता एव तस्य विप्रोत्तमस्य शरीरं क्षतविक्षतं सत् भूमौ न्यपतत् !

ब्रह्महत्यां कृत्वा 'इतःपरं चामराजः निग्रहणीयः' इति बुद्ध्या तौ प्रासादस्य अन्तः गतौ वेगेन । किं दृष्टं तत्र ! हा हन्त ! राजर्षेः चामराजस्य प्राणाः अनन्ते विलीनाः आसन् !!!

तदा राजभवने प्रवृत्तम् आक्रन्दनम् अवर्णनीयमेव आसीत् । अन्तःपुरस्थस्य नारीगणस्य घोरेण आक्रन्दनस्वरेण दश अपि दिशः व्याप्ताः आसन् । महाराज्ञी, तस्याः एकला पुत्री देवकीदेवी च परस्परम् आलिङ्ग्य 'इतः परम् आवयोः का गतिः ?' इति वदन्त्यौ रुदितवत्यौ ।

समग्रं मैसूरुनगरमेव तद्दिने भयजनकं जातम् आसीत् । मार्गे मार्गे खण्डयित्वा क्षिप्तेभ्यः नागरिकाणां कलेवरेभ्यः अधुनापि रक्तधारा झरति स्म । अव्यवस्थितरूपेण पतितानि रुण्डानि मुण्डानि च दर्शकेषु भयं जनयन्ति स्म ।

सर्वस्य अस्य अनर्थस्य कारणीभूतः मारनायकः चामराजम् आश्रितवतः कस्यचित् वीरस्य पुत्रः । पितरि दिवङ्गते सः इतोऽपि दशवर्षदेशीयः बालः । चाम-राजः तं बालं स्वगृहे स्थापयित्वा वात्सल्येन पोषयित्वा युद्धकलां बोधितवान् । तरुणे वयसि मारनायकः चामराजस्य आश्रये स्थितानां वीराणाम् अग्रेसरः आसीत् । ततः सः विजयनगरराजानां सैन्यं प्रविश्य तत्र ख्यातिं प्राप्तवान् । तत्पश्चात् मैसूरुनगरसमीपस्थस्य कस्यचित् ग्रामस्य अधिपतिः अभवत् ।

मारनायकस्य सहायः शान्तराजः चामराजस्य दायादः । सः मैसूरुसमीपस्थस्य अन्यस्य संस्थानस्य अधिपतिः । प्रकृत्या मत्सरिणः वञ्चकस्य विषयासक्तस्य तस्य मनसि चामराजस्य विषये महती असहना आसीत् । तथापि स्वीये पूर्ववयसि चामराजः महाप्रतापी, राजनीतिधुरन्धरश्च आसीत् इत्यतः शान्तराजस्य दायादमत्सरः सुप्ताग्निः इव आसीत् । चामराजस्य पुमपत्यं न आसीत् । अतः सः स्वीयशासनस्य उत्तरकाले राज्यसूत्राणि मन्त्रिषु आरोप्य स्वयं च पारलौकिकेषु अनुष्ठानेषु निरतः आसीत् ।

ग्रामाधिपत्यप्राप्तेः अनन्तरं मारनायकस्य मनसि अहङ्कारपिशाचः प्रविष्टः । तत् जानन् शान्तराजः नानाविधानि दुर्बोधनानि कृत्वा तं मैसूरुनगरम् अभियोक्तुं प्रेरित-वान् । तयोः पूर्वयोजना आसीत् यत् महाराजं संहृत्य राज्यं प्राप्य तत् समानतया विभज्य अनुभोक्तव्यम् इति ।

परन्तु अधुना मारनायकः स्वयमेव महाराजः इति सडिण्डिमम् उद्घोषं कारितवान् । तावता राजाश्रिताः प्रमुखाः त्रिषु गणेषु विभक्ताः आसन् । तेषु प्रथमः चामराजस्य अभिमानिनां गणः । द्वितीयः अपि गणः यद्यपि मनसा चामराजमेव महाराजम् अभिलषति, तथापि तत् वाचा प्रकटयितुम्

अशक्नुवन् अनिच्छया एव मारनायकस्य आधिपत्यम् अङ्गीकरोति । तस्य गणस्य मुख्यः आसीत् देवराजः । तृतीयगणस्तु आसीत् मारनायकस्य अभिमानिनां स्वार्थपराणां सैन्याधिकारिणाम् ।
प्रथमः गणः अधुना तु स्वाभाविकतया एव दुर्दशाम् अनुभवति स्म । तद्गणीयाः स्वीयं गृहादिकं परित्यज्य विजयनगरं गत्वा तत्र आश्रयं प्राप्तवन्तः । प्रधानसचिवः श्यामय्यङ्गार्यः, वणिक् श्रीशैलश्रेष्ठी चामराजस्य अपरः दायादः नञ्जराजबहद्दूरश्च तेषु मुख्यतमाः ।

* * *

चैत्रमासीयः आतपः सर्वदापि प्रखरः एव । सायङ्काले सन्निहितेऽपि आतपप्रखरता किञ्चिदपि न्यूना न जाता आसीत् । अतः मार्गेषु जनसञ्चारः अपि अल्पः एव आसीत् । तस्मिन् समये भस्मच्छुरितगात्रः विरागी कश्चन उच्चैः किमपि गायन् तत्र गच्छन् आसीत् । देवराजस्य गृहस्य समीपम् आगत्य सः गानम् अनुवर्तयन् तत्रैव अतिष्ठत् ।

मेघगर्जनसमनन्तरमेव विद्योतमाना विद्युल्लता इव अस्य गानध्वनिं श्रुत्वा ललिताङ्गी काचित् युवतिः देवराजस्य प्रासादस्य गवाक्षकवाटम् उद्घाट्य सोत्कण्ठम् इतस्ततः अपश्यत् । स च कण्ठस्वरः नितरां परिचितपूर्वः, परन्तु न दृश्यते तत्स्वामी, अपि तु दृश्यते श्मश्रुलः, त्रिपुण्ड्रधारी, मणिमालाभूषितकण्ठः कश्चन विरागी । मन्मनोभिरमणस्य कण्ठस्वरमेव कथम् अनुहरति अस्यापि स्वरः इति चिन्तयन्ती सा चिबुकसमर्पितहस्ता अतिष्ठत् ।

प्रेमपरवशां तां सुन्दराङ्गीं दृष्टवतः अस्य विरागिणः मनः चञ्चलम् अभवत् । वक्तुम् इष्टमपि वाक्यं कण्ठे लग्नम् अभूत् । क्षणकालानन्तरं सः अपरं गीतम् अगायत् । परिचितं तत् गीतं श्रुत्वा तु सा ललना विस्मिता सती तमेव निर्निमेषं दृष्ट्वा ततः - ‘‘ज्ञातं ज्ञातम्..’’ इति उच्चैः वदन्ती तडित् इव धावन्ती - ‘‘नीले, नीले.. !’’ इति दासीम् आहूतवती । दासी च हसन्मुखी सती पार्श्वे एव उपस्थिता आसीत् ।

‘‘वृथा मा हस तथा । बहिः स्थितं तं विरक्तं झटिति अत्र आनय’’ - ईषत् कोपेन अवदत् सा चारुगात्री ।

‘‘कुतः कुप्यति भवती ? यदि तस्मै वराटिका दातव्या तर्हि मम हस्ते दीयताम्, अहं तस्मै ददामि’’ - चेलाञ्चलं दन्तैः दशन्ती नीला हासं निग्रहीतुम् अशक्नुवती उच्चैः हसितवती ।

अहमिव दासी अपि ज्ञातवती यत् सः विरक्तः कः इति ज्ञात्वा सा चारुगात्री अपि अहसत् ।

‘‘आस्तां तावत् । शीघ्रम् आनय तम् । बहुकालात् आतपे स्थितः अस्ति सः’’ इति उक्तवती सा ।

नीला झटिति एव सोपानमार्गेण अधः आगत्य तं विरागिणम् आत्मना सह नीत्वा स्वामिन्याः पुरतः उपस्थाप्य उक्तवती – "भोः विरक्त ! भवदीयानि जटा-श्मश्रूणि अस्मान् वञ्चयितुं न प्रभवन्ति । ज्ञातः भवतः कपटवेषः । स्वामिनि ! पश्यतु, अहमिदानीं मन्त्रप्रयोगेण अस्मै नञ्जराजस्य रूपं दास्यामि..."

तावता सः विरक्तः स्वीयानि तानि कृत्रिमाणि जटाश्मश्रूणि निष्कास्य क्षिप्तवान् । उमायाः उत्तरीयम् आकृष्य तेन स्वीयं शरीरम् आच्छादितवान् च । नञ्जराजस्य वास्तविकं रूपं दृष्टवती सा सुन्दरी उमा प्रेमातिशयेन तं दृढम् आलिङ्गितवती ।

"विरक्तः यदि आलिङ्ग्येत शरीरं भस्ममयं भवेत्" इति वदन्ती नीला करतालिकां कृतवती । ततः तस्य मज्जनव्यवस्थां कर्तुं ततः गतवती च ।

नञ्जराजः उमां दृढम् आलिङ्ग्य मनोहरं तस्याः मुखं पुनः पुनः अचुम्बत् । उमा अपि प्राणकान्तस्य बाहुपाशात् आत्मानं मोचयितुं प्रयत्नम् अकुर्वती – "कुतोऽयं संन्यासिवेषग्रहणप्रसङ्गः ?" इति अपृच्छत् ।

"उमे ! मारनायकः अस्मत्पक्षीयान् बहुभिः प्रकारैः पीडयति । अखण्डं मासद्वयं यावत् तदीयाः स्पशाः माम् अन्विष्यन्तः एव आसन् । प्रत्यहं नूतनं वेषं धरन् अहम् अद्य भवत्याः दर्शने साहसं कृतवान् ।"

"अहो, एतेन कारणेन भवान् विरलदर्शनः जातः !! मया तु अन्यदेव चिन्तितम् आसीत् ..."

"किमिति... ?"

"मासत्रयात् पूर्वं मम पित्रा भवान् उक्तः आसीत् – मारनायकस्य इच्छाम् अनुरुध्य ग्रामे यदि तिष्ठसि तर्हि सकलमपि सुखोपभोगम् अनुभवितुम् अर्हसि, कुतो वा स्वर्गतस्य चामराजस्य पक्षम् अनुसरन् निरर्थकं साहसे उद्युक्तो भवसि इति । भवानपि तत् श्रुत्वा क्रोधाविष्टः भूत्वा ततः निर्गतः ।"

"उमे ! त्यजतु तं विचारम् । भवत्याः पितुः वचनानि यदि स्मरेयं तर्हि शरीरे दाहम् अनुभवामि" इति उक्त्वा नञ्जराजः आसनात् उत्थाय इतस्ततः सरभसं भ्रमणं कृतवान् ।

“युधिष्ठिरसदृशं राजानं मारितवतः तस्य चाण्डालस्य दास्यम् अङ्गीकृत्य काकेन इव स्थातव्यं किम् अनेन नञ्जराजेन ? एतत् यदि न अङ्गीक्रियेत तर्हि उमा न दास्यते इति उच्यते तेन ! अस्तु नाम । उमायाः अप्राप्त्या जातया निराशतया द्विगुणितेन पराक्रमेण युद्धं कृत्वा वीरस्वर्गं प्राप्स्यामि ।”

एतत् श्रुत्वा उमा नञ्जराजस्य हस्तौ गृहीत्वा अवदत् - “प्राणनाथ ! तथा न क्रियताम् । ‘पुत्री न दीयते’ इति कथनस्य अधिकारः स्यादेव मम पितुः । परन्तु भवच्चरणयोः अत्यागः मदधीनः खलु..।”

एतेन किञ्चित् समाहितः नञ्जराजः - “प्रिये ! उमायाः भाविभर्त्रा मया मारनायकः हन्तव्यः खलु ? कृपया अनुमन्यताम् । गन्तव्यं मया अधुना” इति उक्तवान् ।

“क्षणं स्थीयताम् । झटिति भोजनं सज्जीकरोति नीला” - उमा उक्तवती ।

“तथैव अस्तु । देवकीदेव्याः का वार्ता ?”

“का वार्ता भवति तस्याः ! मामेव परिणयतु इति मारनायकः तां पीडयति । महाराज्ञी तु तत् सर्वथा नाङ्गीकरोति ।”

“अहो ! एवमपि वदति सः नीचः ...! किम् एतत् शान्तराजेन अपि अङ्गीकृतं स्यात्.. ?”

“यदि मैसूरुराज्यस्य अर्धभागं मह्यं दीयेत तर्हि देवकीदेव्या सह भवतः परिणयं कारयेयम् इति शान्तराजेन उक्तम् अस्ति ।”

“एवम् ? परन्तु मारनायकः मैसूरुराज्ये अङ्गुलमितामपि भूमिं तस्मै दातुं नेच्छति ।”

“अन्यापि वार्ता श्रुता किम्, चतरग्रामस्य अधिपतिं भद्रनायकम् उत्सवव्याजेन नगरं प्रति निमन्त्र्य कारागृहे निगृहीतवान् अस्ति मारनायकः इति ?”

“आं, श्रुता । भद्रनायकः महापराक्रमी । मारनायकस्य मातुलः सः । परं सः न्यायपक्षपाती । चामराजं विरुद्ध्य विद्रोहकरणात् पूर्वं मारनायकः तस्य साहाय्यं याचितवान् । तदा तेन सः भर्त्सितः - ‘मारनायक ! यदि पुनः तादृशं वचनं वदसि तर्हि जिह्वां ते उत्पाटयेयम्’ इति । अत एव

मारनायकः तम् इत्थं निगृहीतवान् अस्ति । भद्रनायकस्य पुत्रः वेङ्कटनायकः मारनायकं विरुद्ध्य प्रतीकारं साधयितुं यतमानः अस्ति । सद्यः एव सः अस्मत्पक्षम् आश्रयेत् ।"

तावता एव नीला भोजनं सज्जीकृत्य आनीतवती । भोजनं कृत्वा उमया प्रदत्तं ताम्बूलं सेवित्वा नञ्जराजः गन्तुम् उद्युक्तः । तम् आप्रष्टुम् अनिच्छन्त्याः उमायाः मुखात् शब्दाः एव न निर्गताः । तथापि कथमपि सा अवदत् – "क्षुद्रैः कारणैः मा पात्यताम् आत्मनः जीवितं विपत्तौ । तदा तदा आत्मनः वार्ता च अवश्यं प्रेष्यताम् । एषा एव मम प्रार्थना" इति ।

* * *

दिव्याश्वौ आरूढौ तौ तरुणौ श्रावणपूर्णिमादिने मैसूरुनगरसमीपस्थे अरण्ये दक्षिणाभिमुखं गच्छन्तौ आस्ताम् । तयोः ज्येष्ठः श्यामलकायः । विशालः तदीयः ललाटः, नीलोत्पलसदृशे नेत्रे, रक्तौ अधरोष्ठौ, दीर्घा नासिका च वदन्ति स्म यत् सः विलासिनीनाम् इष्टमूर्तिः स्यात् इति । तेजःपुञ्जे तस्य मुखे भ्रमरपक्षौ इव शोभते स्म कृष्णवर्णं विकसत् श्मश्रु । उन्नतं तस्य शरीरं, नेत्रयोः प्रस्फुरन्तीं प्रभाम् अश्वस्य उपरि तस्य उपवेशनशैलीं च दृष्ट्वा एव उन्मत्ताः अपि 'अनेन सह अविनीतः व्यवहारः न क्षेमकरः' इति मत्वा स्वयमेव दूरं गच्छन्ति स्म । कनिष्ठः दृढाङ्गः, सत्त्वशाली । सः गौरवर्णीयः । सुन्दरं तस्य मुखं तदीयं शान्तगुणम् अभिव्यक्तं करोति स्म । अष्ट दश वा मल्लान् अपि निरायुधः सन् एव सम्मुखीकर्तुं शक्नोति सः इति दर्शनादेव वक्तुं शक्यते स्म ।

तदा ज्येष्ठः अवदत् – "कृष्णराज ! कः सः ग्रामः ? ह्यः रात्रौ तत्र तु शयनार्थं जीर्णं तत् मन्दिरमेव शरणम् अभवत् । सः ग्रामः अस्मद्वंशीयानां द्वारसमुद्रस्य बल्लालराजानां राज्ये अन्तर्गतः आसीत् खलु ? तत् राज्यं विनष्टम् इति ज्ञातवतः कस्य वा यदुवंशसम्भवस्य हृदयं न क्वथति ? अत्र द्वारसमुद्रराज्यं नाम्नापि नावशिष्टम् । तत्र देवगिरिराज्यमपि दारुणतया विनाशम् उपयातम् । भगवतः श्रीकृष्णस्य वंशजानाम् अहो कीदृशी दुर्गतिः... ।

"भ्रातः ! वयं देवगिरिराजाः द्वारसमुद्रराजाः चेति सर्वेऽपि यादवाः एव । स्वयूथकलहादेव एतद् राज्यद्वयमपि विनष्टम् । यदि एते सर्वे ऐक्यभावनया अभविष्यन् तर्हि महम्मदीयाः किं वा कर्तुम् अशक्ष्यन् ?"

"उचितम् आह भवान् । तथापि महम्मदीयेभ्यः ईदृशः यः पराभवः प्राप्तः तस्य प्रतिशोधं कर्तुं मम मनः समुत्सहते ।"

एवं संलपन्तौ तौ चामुण्डापर्वतं प्राप्तवन्तौ । चामुण्डादेवालये एतौ तेजस्विनौ तरुणौ सादरं स्वागतीकृतवन्तः तत्रत्याः व्यवस्थापकाः । देवदर्शनं कृत्वा तौ द्वौ अपि सभामण्डपम् आगतवन्तौ । तत्र कश्चन ब्रह्मचारी भगवद्गीतायाः पारायणं कुर्वन् आसीत् । सः हस्तसङ्केतेन एतौ उपवेष्टुं सूचितवान् । तत्पश्चात् "कौ भवन्तौ ? कुतः आगतम् ?" इति अपृच्छत् ।

तस्य उत्तररूपेण यदुराजः यावत् किमपि कथयितुम् उद्युक्तः तदैव सः - "नातिदूरे अस्माकम् आश्रमः अस्ति । भवद्भ्यां सह समालोचनीयं किञ्चिदस्ति । तत्र आगच्छतः किम् ?" इति पृष्टवान् ।

भोजनोत्तरं तौ भ्रातरौ अश्वारूढौ सन्तौ तेन ब्रह्मचारिणा सह अचलताम् । धावनवेगेन चलन्तं तं ब्रह्मचारिणं तस्य सुदृढान् अवयवांश्च वीक्ष्य कृष्णराजः अवदत् - "भ्रातः ! चिन्तयामि यत् काषायवसनात् दण्डकाष्ठात् च कवचखडौ एव अस्य ब्रह्मचारिणः शरीरे शोभेते" इति ।

तदा यदुराजः अवदत् - "कृष्ण ! साधु अनुमितं भवता । केनचित् राजकार्यमिषेण अनेन वीरेण एषः वेषः परिगृहीतः अस्ति इति भाति । भवतु, मास्तु चिन्ता । स्वयमेव ज्ञायेत खलु विषयः... ।"

ततः ते परितः स्थितस्य अरण्यस्य शोभां पश्यन्तः कष्टेन एव मार्गक्रमणं कृत्वा कस्यचित् पर्वतस्य अधोभागं प्राप्तवन्तः । ततः सः ब्रह्मचारी - "षण्मुख, षण्मुख... !" इति शनैः आहूतवान् । तदा तत्रत्यं तरुगुल्मादिकम् अपसार्य तेन आवृतात् कस्यचित् गुहामुखात् निर्गत्य षण्मुखः बहिः आगतवान् । नाम्ना षण्मुखस्य तस्य मुखं तु एकमेव आसीत् । परन्तु तत् षड्भिः मुखैः तुल्यम् आसीत् । पम्पाक्षेत्रस्य वीरभद्रमूर्तेः अपि उन्नतः दृष्टः सः । शालग्रामशिलावत् प्रकाशमानः कृष्णः वर्णः, विशाले तस्य नेत्रे, भव्या आकृतिश्च सः हिडिम्बापुत्रः घटोत्कचः स्यात् किम् इति संशयं जनयन्ति स्म ।

ब्रह्मचारिणः आज्ञाम् अनुसृत्य सः अश्वौ वृक्षान्तरितौ यथा भवतः तथा बद्ध्वा ततः अग्रे गत्वा खनित्रेण कञ्चित् महतीं शिलां पार्श्वे सारितवान् । तत्र कश्चन मार्गः दृष्टिगोचरः अभवत् । त्रयः अपि तेन मार्गेण अग्रे गच्छन्तः गुहां प्रविष्टवन्तः । षण्मुखः तु बहिः एव स्थितवान् । तां शिलां यथापूर्वं स्थापितवान् च ।

अन्तः प्रविष्टाः ते तरुणाः तत्र एकं प्रशस्तं चतुश्शालकं दृष्टवन्तः । तत्र चत्वारिंशदधिकाः वीराः भटाः स्वेच्छया उपविष्टाः आसन् । केचन शस्त्राणां धारां तीक्ष्णीकुर्वन्तः आसन् । अन्ये केचन दीर्घेषु कुन्तेषु लोहपत्रं योजयन्तः आसन् । पुनः केचन खडाभ्यासं कुर्वन्तः आसन् । ब्रह्मचारिणम् एतौ तरुणौ च दृष्ट्वा ते सर्वे सम्भ्रमेण गौरवेण च उत्थाय प्रणामम् अकुर्वन् ।

ततः ते त्रयः अपि तरुणाः ततोऽपि अन्तः प्रविष्टवन्तः । तत्र सप्ताष्टाः प्रौढाः उपविश्य समालोचने मग्नाः आसन् । मध्ये उपधानम् आलम्ब्य उपविष्टः कश्चन तेजस्वी वृद्धः स्पष्टवाण्या किमपि कथयन् आसीत् । तम् उद्दिश्य अनयोः तरुणयोः परिचयं कारयन् ब्रह्मचारी उक्तवान् - "अय्यङ्गार्यमहोदय ! एतौ महात्मानौ यदुवंशसम्भवौ वीरौ । अयं यदुराजः । अयं च अस्य अनुजः कृष्णराजः ।"

"श्रुतपुर्वे अनयोः पुरुषसिंहयोः नामनी । हरिहरराजस्य मुखादेव मया श्रुतं यत् विजयनगरस्य महावीरेषु एतौ अग्रेसरौ इति..." एवं वदन् श्याम अय्यङ्गार्यः तौ आदरेण स्वागतीकृत्य ततः कथनम् अनुवर्तितवान् - "यदुराज ! चामराजेन प्राप्ता दुरवस्था भवद्भिः श्रुता एव । वयं सर्वे राजपक्षस्य मुख्याः मारनायकस्य निग्रहणं कथमिति अजानन्तः एवं वनवासम् अनुभवन्तः स्मः, पश्यतु" इति । यदुराजः तं किञ्चित् निन्दन् इव उक्तवान् - "भवन्तः भीरवः इव यदि एवम् उपविशन्ति तर्हि जनाः भवतां विषये अपवादवचनानि न वदेयुः किम्.. ?"

"यदुराज ! उचितमेव उक्तवान् भवान्" इति वदन् सः ब्रह्मचारी स्वेन धृतेन उत्तरीयेण एव स्वस्य मुखस्थं भस्म मार्जयित्वा उत्तरीयं विधूय स्थितवान् । तदा तं निपुणं वीक्ष्य यदुराजः "नञ्जराज.. ।" इति साश्चर्यम् उद्गारवचनम् उक्तवान् । नञ्जराजः यदुराजस्य हस्तं हस्तेन गृहीत्वा - "वीरशिरोमणे ! सत्यम्, अहमस्मि नञ्जराजः । अस्य राज्यस्य दुःस्थितिं ज्ञात्वापि तां निवारयितुं मार्गम् अजानन् स्थितः अयम् अधमः भवतः सम्मुखे स्थातुम् अपि अयोग्यः" इति उक्त्वा लज्जया शिरः अवनमय्य स्थितवान् ।

"नञ्जराज ! भवान् न अधमः, न वा भीरुः । विजयनगरे आवाभ्यां सहैव युद्धकला अभ्यस्ता । मया विदितपूर्वः एव खलु भवतः पराक्रमः.." इति यदुराजः तस्य समाधानं कृतवान् ।

राजपक्षीयेषु अन्यतमः प्रमुखः बङ्कनकेरे वासुदेवय्यः उक्तवान् - "यदुराज ! भवान् अस्माकं गणं प्रविश्य साहाय्यप्रदानेन अस्मान् अनुगृह्णातु इति वयं सर्वे प्रार्थयामहे" इति ।

"अवश्यमेव । मम मनसि अपि मारनायकेन सह सकृत् योद्धव्यम् इति कुतूहलम् उत्पन्नम् अस्ति" इति यदुराजः अवदत् । एवंप्रकारेण ते सर्वे नूतनौ एतौ तरुणौ स्वगणं प्रविष्टवन्तौ इति महता उत्साहेन 'जयतु बलभीमः' इति घोषयन्तः नृत्यम् अकुर्वन् ।

* * *

आनेगोन्दिसंस्थानस्य पीठाधीश्वराः श्रीचिदानन्दस्वामिनः दिग्विजयाय ततः निर्गताः मैसूरुनगरं सम्प्राप्य तत्र निवासम् अकुर्वन् । विजयनगरराजस्य एतेषु स्वामिषु अपारः विश्वासः । अतः सः तेषाम् आनुकूल्याय सैन्यस्य एकं दलमेव अधिकारिभ्यां सह प्रेषितवान् आसीत् । एवं सवैभवं नगरं प्रविष्टवतां तेषां स्वामिपादानां मैसूरुनगरे विशेषसम्माननम् अभवत् इत्यत्र किम् आश्चर्यम् !

तस्मिन् दिवसे मारनायकः स्वामिपादानाम् आतिथ्यं तत्रैव अकारयत्, यत्र तेषां निवासः आसीत् ।

"श्वः पूजा राजभवने एव भवतु" इति स्वामिपादाः यदा स्वयमेव आदिशन् तदा मारनायकः अनिच्छन् अपि गत्यन्तराभावात् अङ्गीकृत्य तदर्थं व्यवस्थाः कल्पितवान् ।

पूजानन्तरं तीर्थप्रसादविनियोगानन्तरं च बाह्याः जनाः सर्वे निर्गताः । राज्ञी देवकीदेवी च स्वामिनां शिष्यस्य सूचनानुसारं द्वितीयवारं देवदर्शनाय तत्र आगते ।

अधुना स्वामिपादानां सन्निधौ बहवः जनाः न आसन् । पञ्चषाः परिचारकाः पूजोपकरणानि पेटिकायां पूरयन्तः आसन् । रूपसम्पन्नौ तरुणौ स्वामिपादानां चामरवीजनं कुर्वन्तौ आस्ताम् । तयोः अन्यतरः श्यामलकायः पीतं पट्टवस्त्रं रक्तं राङ्कवं च धृतवान् आसीत् । तस्य शरीरसौष्ठवं, स्फुरत् तारुण्यं, शोभना स्थितिश्च सर्वस्मिन् अपि अभिलाषं जनयन्ति स्म । अपरः नीलाम्बरधरः सत्त्वशाली युवा विनयभूषणः सन् शोभते स्म । रामलक्ष्मणौ इव शोभमानौ एतौ कौ स्याताम् इति राज्ञी विचारमग्ना अभवत् । देवकी तयोः ज्येष्ठं तरुणं दृष्ट्वा विस्मिता अभवत् । अनङ्गविष्टायाः तस्याः शरीरं स्विन्नं जातम् । मौक्तिकैः रचितम् अवगुण्ठनमिव तस्याः मुखे अशोभन्त स्वेदबिन्दवः ।

"वत्से ! पश्य देवविग्रहं, प्रसन्नतया कथं विराजते.." इति राज्ञी अवदत् । परन्तु तद् वचनं देवकीदेव्या न श्रुतमेव । सचेतने सुन्दरविग्रहे दृष्टौ दृढं लग्नायां जडविग्रहस्य का कथा.. !

अत्रान्तरे स्वामिपादैः ताभ्यां फलमन्त्राक्षताः दत्ताः । ते यावत् स्वामिपादान् नमस्कर्तुम् उद्यते तावता स्वामिपादैः एव स्वीयं शिरः राजमातुः पादयोः उपरि न्यस्तम् ! ततः उत्तिष्ठद्भिः तैः उक्तम् - "महादेवि ! अहमस्मि बङ्कनकेरे वासुदेवय्यः.." इति ।

तत्रैव स्थितः शिष्यः अपि तस्याः पादाभिवन्दनं कृत्वा अवदत् - "नाहम् अन्यः, अपि तु नञ्जराजः । भवत्याः देवकीदेव्याश्च दर्शनाय एव अस्माभिः एवं कपटवेषं धृत्वा अत्र आगतम् ! अस्मासिः सह आगताः हस्तिपकाः, शिबिकावाहकाः, वैदिकाः आचार्याश्चेति सर्वेऽपि अस्मदीयाः एव.." इति ।

"भोः बन्धवः ! किं कृतेनापि अस्माकं दर्शनेन.. ? जीवितं मरणं च समानमेव अस्माकम् । यदि इयं पुत्री देवकीदेवी न स्यात् तर्हि मया पत्या सहैव चिताग्निप्रवेशः कृतः स्यात् । तन्मध्ये इयं मह्यमेव दातव्या इति अनुरोधं कुर्वन् नानाप्रकारैः मां पीडयन् अस्ति धूर्तः सः मारनायकः । न जाने अस्याः दैवं कीदृशम् अस्ति इति..." इत्येवं वदन्ती महाराज्ञी अश्रूणि स्रावितवती ।

"महादेवि ! तस्य धूर्तस्य विनाशकालः सन्निहितः । जनसाहाय्यं प्राप्तम् अस्ति अस्माभिः । त्रिचतुरेषु एव मासेषु तं परलोकं प्रापय्य साम्राज्यस्य दुरवस्थां दूरीकरिष्यामः वयम्" इति वासुदेवय्यः अवदत् ।

मातुः समीपे उपविश्य पुष्पाणि ग्रथ्नती देवकीदेवी हसन्ती अपृच्छत् - "वासुदेवय्य ! शिखाम् उपवीतं च परित्यज्य भवता संन्यासः गृहीतः । पुनः पत्नीपुत्रैः मेलनं कथम् ?"

देवकीदेव्याः मञ्जुलां वाणीं श्रुतवतः स्वामिनां पार्श्वे स्थितस्य धृतचामरस्य अस्माकं यदुराजस्य उपरि अनङ्गः शरप्रयोगम् अकरोत् । पूर्वमेव सः देवक्याः कटाक्षैः अभिहतः आसीत् । अधुना तु तस्याः दृष्ट्या दृष्टिं संयोज्य वीक्षितुम् आरब्धवान् ।

देवकी षोडशवर्षदेशीया । सुखेन प्रवृद्धा सा सुपुष्टैः अवयवैः प्रौढा इव दृश्यते स्म । केतकीवर्णा शरीरकान्तिः, प्रशस्तः ललाटः, अनङ्गशरसदृशौ भ्रुवौ, चम्पक-मुकुलाकारा नासिका, इन्द्रनीलमणिवत् प्रकाशमाने नेत्रे च चन्द्रबिम्बसदृशस्य तस्याः मुखस्य अपूर्वां शोभां जनयन्ति स्म । यदुराजे तां शोभाम् आस्वादयति सति देवक्याः मुखं लज्जया तथा रक्तम् अभवत् यथा स्वेन जिते प्रदेशे मदनेन रक्तपताका उड्डायिता ।

"कौ एतौ महानुभावौ... ?" महाराज्ञी हस्तनिर्देशेन यदुराजकृष्णराजौ दर्शयन्ती नञ्जराजम् अपृच्छत्।

नञ्जराजः तयोः जन्मादिवृत्तान्तं पराक्रमादिकं च वर्णितवान् । तदैव वासुदेवय्यः अवदत् - "अस्माभिः सर्वैः निश्चितमस्ति यत् राजपक्षस्य सेनापत्यं यदुराजाय एव समर्प्यते इति । अतः तदधिकारसूचकं शस्त्रम् अन्यानि उपायनानि च तत्रभवती एव यदुराजाय ददातु इति विज्ञापयामि" इति ।

अत्रान्तरे दास्या सुवर्णभाजनेन उत्तमानि वस्त्राणि आनीतानि । नञ्जराजेन सः खडः आनीतः यं पूर्वं महाराजः उपयुङ्क्ते स्म । तावता देवकीदेव्याः पुष्पमालाग्रथनम् अपि समाप्तम् । ग्रथितां तां मालां तस्मिन् एव भाजने संस्थाप्य सा अग्रे किं कर्तव्यमिति अजानती इव अतिष्ठत् ।

यदुराजः महाराज्ञीं प्रणम्य तानि सर्वाणि उपायनानि कृतज्ञतापूर्वकं स्वी-कृतवान् । ततश्च स्वीयचित्तापहर्त्रीं तां मोहनाङ्गीं सकृत् वीक्ष्य ततः अग्रे अगच्छत् ।

श्रीचिदानन्दस्वामिनां तत्र आगमनप्रयोजनं सिद्धम् आसीत् । अतः उषःकालात् पूर्वमेव तैः ततः ग्रामान्तरं प्रति गतम् ।

* * *

अमावास्या सन्निहिता आसीत् । तस्यां रात्रौ काचित् वाराङ्गना नूपुरशिञ्जितं कुर्वती सबिब्बोकं पदनिक्षेपं कुर्वती कारागृहस्य पार्श्वस्थेन मार्गेण आगच्छन्ती आसीत् । ताम् अनुसृत्य कुशीलवाः केचन वीणामृदङ्गादीनि वाद्यानि वहन्तः आगच्छन्ति स्म ।

तदा कारागृहस्य वरिष्ठः रक्षकः गर्जितवान् - "तिष्ठ ! क्व गच्छसि अस्यां रात्रौ अबला त्वम्... ?"

"अयि भोः ! दृष्टायां स्त्रियां किम् अधिकारदर्पः विजृम्भते शरीरे... ? वीरभद्रनायकः खलु भवान् ? कथम् अभिजानीयात् भवान् अस्मादृशान् पामरान् जनान्..." इति अवदत् सा ।

जलस्पर्शमात्रेण शर्करापुत्तलिका इव तस्याः मोहनाङ्ग्याः वचनेन वीरभद्र-नायकस्य अधिकारदर्पः द्रुतः सन् विगलितः अभवत् ।

"अयि मीनाक्षि ! अन्धकारे नाभिज्ञाता भवती । कुत्र गच्छति अस्यां रात्रौ ?"

"कुत्रापि गच्छेयम् । किं तेन ? भवतः का चिन्ता ? मम गृहम् अनागच्छतः जनस्य कोऽयम् अधिकारः मया सह सम्भाषणे ?"

वीरभद्रनायकः तस्याः करपल्लवं गृहीत्वा "मीनाक्षि ! यदा आरभ्य अस्य कारागृहस्य रक्षणे नियुक्तः भवत्याः गृहम् आगन्तुं न शक्तः । अपराद्धं मया । क्षन्तव्यः अयं जनः । भवतु, अधुना कुत्र गमनम् ? वदतु..." इति वदन् स्वीयं हस्तं तस्याः स्कन्धोपरि निक्षेप्तुम् उद्युक्तः अभवत् ।

"केयं कुचेष्टा...." - मीनाक्षी उवाच ।

"अन्ततः कुत्र गमनम् इति तु नैव उक्तं भवत्या । किं तत्कथनेन भवत्याः वारवृत्तिः दुष्यति.. ?" तां वचनेन विद्धवान् नायकः ।

"भटप्रमुखस्य चन्नबसवय्यस्य गृहे अद्य गाननृत्यकार्यक्रमः निश्चितः अस्ति । तत्र गम्यते । वीरभद्र ! अपसर, कुशीलवाः अपि आगताः एव..."

"मीनाक्षि ! ताम्बूलसेवनं वा कृत्वा गच्छतु । अन्तः आह्वयतु भवदीयान् तान् कुशीलवान् अपि.." नायकः उक्तवान् । ततः मुख्यद्वारम् उद्घाटितवान् च । ते सर्वे अन्तः प्रविष्टाः । ततः मीनाक्षी वीरभद्रेण प्रसारितस्य कम्बलस्य उपरि उपविश्य तेन दत्तं ताम्बूलकरङ्कम् उद्घाट्य द्वयोः अपि निमित्तं ताम्बूलसज्जीकरणे मग्ना अभवत् ।

अत्रान्तरे पार्श्वभागे उपविष्टाः चत्वारः रक्षकभटाः एरण्डतैलदीपस्य प्रकाशे पत्रक्रीडायां मग्नाः आसन् । कुशीलवाः तान् परिवार्य स्थित्वा कुतूहलेन क्रीडां पश्यन्तः आसन् । तन्मध्ये वैणिकः शनैः उत्थाय पार्श्वे भित्तौ लम्बमानेषु महाखडेषु अन्यतमं हस्तेन गृहीत्वा "अहो, द्वाभ्यामपि हस्ताभ्याम् अस्य उन्नयनमेव कष्टम् । कथम् अस्य प्रयोगः शक्यः भोः...?" इति अपृच्छत् ।

"तथैव स्थापयतु भोः तम् ! वृथा हस्तच्छेदः भवेत् । एषा खडधारा, न तु वीणायाः तन्त्री....." इति तम् अवदत् क्रीडामग्नः कश्चन रक्षकभटः ।

तदा मार्दङ्गिकः अपि एकं खडं गृहीत्वा "अयि नागप्प ! तव खडादपि बलिष्ठः अस्ति इति भासते अयं खडः" इति वदन् तं परिशीलयन् इव स्थितवान् ।

"मीनाक्षि ! भवदीयाः वैतालिकाः यदि एवं खडान् गृह्णन्ति तर्हि अस्माभिः इतःपरं तन्त्रीवादनं करणीयं भवेत्" इति सहासम् अवदत् वीरभद्रनायकः ।

तावता उद्घाटितेन द्वारेण सप्ताष्टाः जनाः अकस्मात् इव बलात् अन्तः प्राविशन् । यावत् वीरभद्रनायकः उत्थातुम् ऐच्छत् तावता एव यदुराजः व्याघ्रः इव उत्प्लुत्य तं स्वकक्षान्तर्गतं कृतवान् । झटित्येव अन्यः तस्य पाणिपादं रज्ज्वा दृढं बद्धवान् । अन्यैः अपि रक्षकभटैः इयमेव गतिः प्राप्ता ।

तदा यदुराजः मुख्यद्वारं सम्यक् पिधाय गर्जितवान् - "चतरग्रामस्य भद्रनायकः कुत्र बद्धः अस्ति.. ? झटिति कथयत । अन्यथा छिद्यन्ते युष्माकं शिरांसि.." इति ।

न कोऽपि किमपि अवदत् । तेषु अन्यतमः तु भीत्या कम्पमानः आसीत् । तं पार्श्वं नीत्वा यदुराजः स्वर्णदानेन प्रलोभ्य वशीकृतवान् । सः भद्रनायकस्य बन्धस्थानं दर्शयितुम् अङ्गीकृतवान् । तदा षण्मुखः अग्रे आगत्य तं बन्धविमुक्तं कृत्वा मार्जारः मूषिकमिव कक्षे कृत्वा ततः अनयत् । पश्चात् तेन दर्शितस्य प्रकोष्ठस्य अयःशलाकाः उत्पाट्य निष्कासितवान् । तदा तत्र स्थितः सः बन्दी "कः सः ?" इति अपृच्छत् ।

"तात ! अहमस्मि भवतः पुत्रः वेङ्कटनायकः । एते अस्माकं हितैषिणः । भवतः बन्धविमोचनाय आगताः स्मः" इति तस्य पुत्रः उक्तवान् ।

भद्रनायकस्य निगडम् उन्मोच्य सर्वे यावत् बहिः द्वारसमीपम् आगताः तावता कुत्रापि कोणे स्थितः कश्चन रक्षकभटः - "हा हन्त ! मुषिताः स्मः !" इति उच्चैः उक्त्वा करस्थितेन काहलेन उच्चैः शब्दम् अकरोत् । तेन काहलशब्देन जागरिताः अन्ये रक्षकभटाः धावन्तः तत्र आगताः । तदा यदुराजः अपि - "हन्त ! मुषिताः स्मः !" इति स्वयमपि उच्चारयन् स्वीयान् जनान् आत्मानम् अनुसर्तुं सूचयित्वा पश्चिमद्वारसमीपं धावितवान् ।

पुरतः दृष्टः कश्चन — "अयि भोः, का वञ्चना जाता ? कुतः काहलघोषः क्रियते मध्यरात्रे ?" इति अपृच्छत् ।

"किमन्यत्.., केचन द्रोहिणः मारनायकस्य गृहं प्रविश्य तम् अमारयन् । एतां वार्तां शान्तराजाय निवेदयितुं प्रस्थितः अस्मि" इति अवदत् यदुराजः ।

प्रश्नं कृतवन्तम् अन्यं कृष्णराजः उवाच - "किं वदानि.., लुण्ठाकाः वेङ्कण्णनायकस्य गृहं प्रविश्य तं मारयित्वा सर्वमपि द्रव्यं नीतवन्तः । न जाने एते नगररक्षकाः कुत्र गर्दभपालने रताः सन्ति इति.. ।"

आत्मानं पृष्टवन्तं षण्मुखः अवदत् - "किमस्ति तत्र.. ! मयापि गत्वा दृष्टम् । कलहायमानाः वाराङ्गनाः कोलाहलम् उत्पादितवत्यः । भवतु, किञ्चित् नस्यं लभ्येत किम्... ?" इति ।

तस्यां रात्रौ मैसूरुनगरे सर्वत्र महान् सम्भ्रमः एव दृष्टः । दीपशिखानां प्रकाशः नगरे सर्वत्र इतस्ततः भ्रमणम् अकरोत् । नगररक्षकाः अश्वारोहिणः सन्तः इतस्ततः अभ्राम्यन् । अनेन कोलाहलेन नगरशुनकाः मुक्तकण्ठतया अभषन् । अन्ते च मारनायकस्य मारणं वेङ्कण्णनायकस्य गृहे लुण्ठनं वा नैव प्रवृत्तमेव इति वार्ता जनैः ज्ञाता । "किमपि भवतु नाम, प्रवृत्तं किमिति श्वः प्रातः ज्ञास्यते एव खलु" इति चिन्तयन्तः नागरिकाः सर्वे स्वगृहाणि प्रविष्टवन्तः । महिलास्तु तान् दृष्ट्वा 'छि छि' इति उपेक्षापूर्णानि वचनानि अवदन् ।

* * *

बन्धमुक्तं कृत्वा भद्रनायकः यदा आनीतः तदा प्रभृति तदीयः चतरग्रामः राजपक्षीयाणां केन्द्रस्थानम् अभवत् । पूर्वोक्ताः ते सर्वेऽपि गुहानिवासिनः छद्मवेषं परित्यज्य चतरग्रामं गत्वा तत्र निवासम् अकुर्वन् । कस्मिंश्चित् दिने सुप्रभाते तस्य ग्रामस्य प्रवेशस्थाने चामराजेन्द्राङ्कितः ध्वजः उड्डायितः सन् मेघमण्डलमध्ये विराजमानः अभवत् ।

'द्विसहस्राधिकाः वीराः युद्धसन्नद्धाः सन्ति, यदुराजनामा महावीरः तेषां युद्धशिक्षणं प्रयच्छन् अस्ति' इत्येतां वार्तां श्रुत्वा अनेके भटाः खड-खेटकाद्यायुधसहिताः सन्तः चतरग्रामम् आगत्य राजपक्षीयसेनायां प्रवेशं प्राप्तवन्तः ।

प्रतिदिनम् एवम् आगच्छतां भटानाम् आवासकल्पनाय ग्रामस्य बहिर्भागे उन्नतस्थानेषु उटजाः निर्मातव्याः अभवन् । तेषाम् उपयोगाय वैश्याः तत्र तात्कालिकरूपेण धान्यानाम् आपणान् अपि आरब्धवन्तः । लोहकाराः तक्षकाश्च सैनिकानां कृते शस्त्रनिर्माणाय अहोरात्रं कार्यम् अकुर्वन् ।

दिनेषु गच्छत्सु राजपक्षीयस्य सैन्यस्य व्ययभारः वर्धमानः सन् अन्ते च दुस्सहः अपि अभवत् । भद्रनायकस्य धान्यागारे स्थितानि धान्यानि समाप्तप्रायाणि । कोशस्थं धनमपि समाप्तप्रायम् । एतादृशे अवसरे यदि मारनायकः अस्मदुपरि आक्रमणं कुर्यात् तर्हि का गतिः स्यात् इति श्यामय्यङ्गार्यस्य महती चिन्ता जाता । सः प्रमुखाणां सभायां सद्यःस्थितिं यदा विस्तरेण अवर्णयत् तदा यदुराजः उवाच - "मारनायकस्य अभियोगविषये तु मास्तु चिन्ता । परन्तु सैनिकानाम् अशन-वसन- शस्त्रादीनाम् आपूर्तिः कथम् इत्येतत् चिन्त्यताम्" इति ।

“आगम्यतां भोः श्रेष्ठिन् ! ‘धनविषये किमर्थं चिन्ता, यावदपेक्षितं तावद् व्यवस्थापयामि’ इति खलु अद्यपर्यन्तं भवता कथ्यते स्म ! श्रुतं, किमुक्तम् अस्माकं नायकेन इति... ?” - वासुदेवय्यः श्रीशैलश्रेष्ठिनम् उद्दिश्य अवदत् ।

“वासुदेवय्यमहोदय ! अपेक्षितस्य धनस्य परिमाणं कथ्यताम् । यदि अहं व्यवस्थापयितुं न शक्नोमि तर्हि खलु अग्रे चिन्ता....” - श्रीशैलश्रेष्ठी उवाच ।

यदुराजः एव तस्य उत्तरम् उक्तवान् - “श्रूयतां श्रेष्ठिवर्य ! दशसहस्रस्य जनानां वर्षं यावत् उपयोगाय यावदावश्यकं तावान् धान्यसंग्रहः भवेत् अस्माकं निकटे । समानाकाराः पञ्चसहस्रं कुन्ताः, उत्तमाः खडाश्च सप्ताहाभ्यन्तरे एव मम वशे भवेयुः । पञ्चसहस्रजनानां कृते कम्बलाः युतकानि शिरस्त्राणि च आवश्यकानि । एतानि सर्वाणि संगृह्य दर्शयतु, तत्पश्चादेव अङ्गीकरिष्यामि यत् अहं भवतां सेनापतिः इति ।”

“एतावदेव किम् ? इदानीमेव पञ्चलक्षं कार्षापणाः सन्ति मयि । यदि अपेक्षितं तर्हि बेङ्गलूरुनगरस्थम् आपणं न्यासीकृत्य लक्षत्रयं विजयनगरस्थं न्यासीकृत्य पञ्चलक्षं कार्षापणान् च यदा कदापि दापयितुं शक्नोमि । वस्तूनां क्रयणं तु भवद्भिः कर्तव्यम् ।”

“अहो श्रेष्ठिमहोदय ! एतावता सेत्स्यति अस्माकं कार्यम् । परं जागरूकः भवतु, यावत् वयं मैसूरुनगरं प्राप्स्यामः तावता भवतः स्कन्धोपरि लशुनस्यूताः एव भवेयुः..” - नञ्जराजः सहासम् अवदत् ।

“अरे नञ्जराजमहाभाग ! श्रीशैलपर्वताकारं धनराशिं संगृहीतवान् अस्मि इत्येतदर्थमेव जनाः मां श्रीशैलश्रेष्ठिनं मन्यन्ते, न तु विना कारणम् । कुतो मां लशुनस्यूतवार्तया विभीषयति भवान्.....” - श्रेष्ठी अवदत् ।

“तर्हि अहम् अधुना एव कृष्णराजं शस्त्रास्त्रसंग्रहणाय विजयनगरस्य सेनापतेः केम्परसस्य समीपं प्रेषयामि । श्रेष्ठिन् ! भवान् कृष्णराजेन सह एव विजयनगरं गत्वा पर्याप्तमात्रेण धनस्य व्यवस्थां करोतु” - यदुराजः उक्तवान् ।

ततः कैश्चिदेव दिवसैः अपेक्षितानि सर्वाणि अपि वस्तूनि संगृहीतानि । नञ्जराजः वेङ्कटनायकः इत्यादयः वीराः प्रतिदिनं सैनिकान् युद्धकलां शिक्षितवन्तः ।

एवं च चतरग्रामस्थे सैन्ये त्रिसहस्रं सुशिक्षिताः पदातयः, पुनः सहस्रम् अल्पशिक्षिताः पदातयः, पञ्चशतम् अश्वारोहिणश्च आसन् ।

अत्रान्तरे इयं वार्ता मारनायक-शान्तराजयोः कर्णपथं नागता इति न । परन्तु आन्तरङ्गिकविभेदकारणतः ताभ्यां झटिति कमपि निर्णयं कर्तुं नैव शक्तम् । अनुभविनः वृद्धाः वदन्ति स्म यत् चतुरङ्गबलसहितं चतरग्रामस्य उपरि आक्रमणं कृत्वा तत्रत्याः राजपक्षीयाः निर्मूलाः कर्तव्याः, अधुनैव इति । परन्तु मारनायकस्य दूरालोचना दुरालोचना वा अन्या एव आसीत् । 'चतरग्रामस्य उपरि आक्रमणाय शान्तराजः एव ससैन्यं गच्छतु । यदि सः विजयी भवति तर्हि राजपक्षीयाः अप्रयत्नेेन निवारिताः भवन्ति, यदि सः पराजयं प्राप्नोति तर्हि अपि शान्तराजनामकः कण्टकः स्वयमेव उत्पाटितः भवति' - इत्येवं चिन्तयति स्म सः । शान्तराजोऽपि तदर्थं सन्नद्धः एव आसीत् । परन्तु तदीया दूरालोचना अन्या एव । चतरयुद्धे मम एव विजयः सुनिश्चितः । तद् यदा सम्पत्स्यते तदा मैसूरुराज्यस्य उत्तरभागः एव विनायासं मम वशीभविष्यति । तदा तत्र स्थित्वा मारनायकविषये कोपप्रदर्शनं कर्तुं शक्यं खलु इति !

गुप्तचराणां द्वारा यदुराजेन पञ्चदशदिनेभ्यः पूर्वमेव इयं वार्ता ज्ञाता यत् शान्तराजस्य सैन्यं चतरग्रामोपरि आक्रमणं करिष्यति इति । झटिति तेन आज्ञा प्रसारिता यत् सर्वेऽपि चतरग्रामवासिनः दिनद्वयाभ्यन्तरे एव ग्रामं परित्यज्य गच्छेयुः इति । तेन ग्रामे विलक्षणः कश्चन कोलाहलः आरब्धः । वृषभशकटोपरि गर्दभपृष्ठे वा स्वीयानि वस्तूनि आरोप्य स्वशिरसापि कानिचित् वहन्तश्च जनाः ग्रामात् निष्क्रमणम् आरब्धवन्तः । अधुना तु निर्जनप्रायः सः चतरग्रामः तथा दृश्यते स्म यथा धूमावरणकारणात् मधुमक्षिकाभिः परित्यक्तः मधुकोषः ।

यद्यपि ग्रामीणाः सर्वेऽपि ततः निष्क्रान्ताः, तथापि तत्रत्ये शिवालये कृतवसतिः शरणाम्बा तु सशिष्या सती तत्रैव अतिष्ठत् । केभ्यश्चिदेव दिनेभ्यः पूर्वं चतरग्रामम् आगता अपि सा अस्वस्थेभ्यः सामान्यरुजाम् औषधं यच्छन्ती ग्रामीणानाम् आदरपात्रत्वं गता आसीत् । कृषिकार्यमध्ये लवित्रस्पर्शात् व्रणिताङ्गुलयः कृषिकाः, द्वन्द्वयुद्धक्षतिताः सैनिकाश्चापि तस्याः वनस्पत्यौषधसेवनेन शीघ्रमेव स्वस्थतां यान्ति इति तद्विषये प्रसिद्धिः आसीत् ।

सर्वे ग्रामात् निर्गताः । तथापि शरणाम्बा तु ततः गन्तुं नेच्छति । कदाचित् भद्रनायकः एव गत्वा ताम् उपदिष्टवान् - "अम्ब ! शत्रवः सन्निहिताः सन्ति । ते अत्र आगत्य बलात्कारमपि कुर्युः । तदा न भवतीं रक्षन्ति भवत्याः जटाः, वल्कलानि वा..।"

"भोः स्वामिन् ! के शत्रवः, के च सुहृदः अस्मादृशानां शिवभक्तानाम् ! गुरुकृपया यादृशमपि व्रणं निवार्य व्रणितं जनं स्वस्थं कर्तुं शक्नोमि अहम् । यदि मम एतद् कौशलं ज्ञास्यन्ति तर्हि कथं मया सह उद्धतं व्यवहारं करिष्यन्ति ते...?" - शरणाम्बा उक्तवती ।

"तर्हि कुतो वा भवती तत्र नागच्छेद् यत्र अस्माकं सैन्यम् अस्ति.. ?" इति भद्रनायकः यदा अपृच्छत् तदा सा "तथैव अस्तु" इति वदन्ती स्वीयं स्यूतं गृहीत्वा शिष्यया सह भद्रनायकम् अनुसृत्य आगतवती ।

चतरग्रामस्य निकटे एव पर्वतोपरि शिथिलः कश्चन दुर्गः आसीत् । तत्र स्थित्वा यदि दृष्टिः प्रसार्यते तर्हि ततः क्रोशचतुष्टयात्मकः सर्वोऽपि भूभागः सम्यक् दृष्टिगोचरः भवति । दूरात् दर्शनेन सः दुर्गः गरुडस्य नीडम् अनुकरोति इत्यतः 'गरुडनीडदुर्गः' इति नाम्ना अपि तस्य प्रसिद्धिः आसीत् । अभेद्यः अपि आसीत् सः दुर्गः । दुर्गस्य उन्नतासु प्राकारभित्तिषु संलगिताः महाशिलाः शताधिकवर्षेभ्यः वृष्टिजलस्नानेन नितरां कृष्णवर्णाः आसन् । पङ्क्तिरूपेण स्थिताः गजाः इव भान्ति स्म ताः शिलाः ।

दुर्गस्य पूर्वस्यां दिशि अस्ति महाद्वारम् । तत्र अन्तः प्रविष्टे सति पुरतः दृश्यते वर्तुलाकारकः अपरः दुर्गः । तस्मिन् अन्तर्दुर्गे सन्ति बहूनि गृहाणि, शस्त्रागाराणि, धान्यागाराणि च ।

यदुराजः ससैन्यं तमेव गरुडनीडदुर्गं प्रविश्य तत्र वासम् अकरोत् । तत्रैव सेनाशिबिरं व्यवस्थाप्य शत्रूणाम् आगमनं प्रतीक्षमाणः आसीत् सः । समग्रोऽपि युद्धभारः तदुपरि एव निपतितः आसीत् । शान्तराजस्य सैन्यं मैसूरुनगरात् प्रस्थाय चतरग्रामाभिमुखम् आगच्छत् अस्ति इति वार्ता यदा श्रुता तदा राजपक्षीयाः सर्वे सम्मिल्य समालोचनम् अकुर्वन् । तस्यां सभायां यत् प्रवृत्तं तत् अत्यन्तं गोपनीयम् अस्ति इत्यतः वयमिदानीं तद्विषये किमपि न कथयामः । यद्यपि कथानकलेखकस्य तु सर्वत्रापि प्रवेशाय अनुमतिः अस्ति एव, तथापि मया यदुराजाय वचनं दत्तमस्ति यत् सभायाः अस्याः वार्ता कुत्रापि नोद्घाट्यते इति !

अत्रान्तरे मारनायकः युद्धार्थं प्रस्थितं शान्तराजम् उपगम्य उक्तवान् - "भोः शान्तराजमहोदय ! भवान् पराक्रमी इत्यत्र न कोऽपि संशयः । परम् अयं युद्धप्रसङ्गः किञ्चित् विशिष्टः अस्ति । दूरात् आगतैः परराजैः सह क्रियमाणं युद्धमिव न एतत् । तादृशेषु तु युद्धेषु परराजानाम् अत्र किमपि आनुकूल्यं न भवति । अस्मिन् प्रसङ्गे तु न तथा । स्वप्रदेशेऽपि प्रातिकूल्यम् अस्ति अस्माकम् । श्रूयते यत् चतरग्रामेऽपि महत् सैन्यं सन्नद्धम् अस्ति इति । विजयनगरात् आगतः यदुराज-नामकः युवा शत्रुसेनापतिः अस्ति, सः युद्धकलाकुशलः साहसी च इति । अतः परिस्थितेः समीचीनम् अध्ययनं कृत्वा एव अस्माभिः योद्धव्यं भवति" इति ।

"मारनायक ! युद्धविषये भवतः चिन्ता एव मास्तु । का तेषां क्षुद्राणां सेना नाम ! क्षेत्रे कर्षणं कुर्वन्तः केचन मूढाः तत् कार्यं परित्यज्य युद्धार्थम् आगच्छन्ति ! का तेषां गणना रणकुशलानाम् अस्माकं सैनिकानां पुरतः ! तत्पक्षीयेषु अधिकारिषु अपि मया अपरिचितः नैकोऽपि अस्ति । सर्वेऽपि वृथा मिथ्या प्रशंसन्ति यदुराजम् । न वयं धृतकङ्कणाः योषितः । तथापि भवता यत् स्मारितं तत्तु शोभनमेव" इति अवज्ञया एव उत्तरम् उक्तवान् शान्तराजः ।

* * *

कानिचित् दिनानि प्रयाय शान्तराजस्य सैन्यं यदा चतरग्रामं प्राप्नोत् तदा रात्रिः आसीत् । 'रात्रौ अत्रैव विश्रान्तिम् अनुभूय प्रातःकाले अस्य ग्रामस्य लुण्ठनं कृत्वा ततः गरुडनीडदुर्गस्य आक्रमणं करिष्यामि' इति मनसि एव कार्ययोजनां चिन्तयन् शान्तराजः शयनम् अकरोत् । परेद्यवि प्रातः तस्य नेतृत्वे ग्रामं प्रविष्टाः सैनिकाः पश्यन्ति, अहो तत्र न कश्चित् मार्जालशावकोऽपि अस्ति ! लुण्ठनाभिलाषेण आगतैः महती निराशता अनुभूता । आवासाय रिक्तानि अनेकानि गृहाणि लब्धानि इत्येतावता सन्तोष्टव्यम् अभवत् तैः ।

गरुडनीडदुर्गोपरि आक्रमणं तु अवश्यं कर्तव्यम् । परन्तु सुदृढस्य तस्य दुर्गस्य पातनं तु न शक्यम् । अतः अत्रैव स्थित्वा दुर्गस्य अन्तः स्थिताः किं वा करिष्यन्ति इति प्रतीक्षामहे - शान्तराजस्य सैन्याधिकारिभिः एषः परामर्शः दत्तः ।

त्रिचतुराणि दिनानि अतीतानि । तैः तत्रैव स्थित्वा प्रतीक्षा कृता । परन्तु शत्रूणां न कापि वार्ता । 'यदुराजस्य सैन्यम् अल्पमेव स्यात् । अतः एव भीत्या सः दुर्गस्य अन्तः उपविष्टः अस्ति । दुर्गद्वारं

भञ्जयित्वा वा अन्तः प्रविश्य सः निग्रहणीयः एव इत्येवं निर्णीय शान्तराजः ससैन्यं दुर्गाभिमुखं प्रस्थितः ।

अत्रान्तरे यदुराजः वज्रकायैः पञ्चशतमितैः व्याधभटैः अन्वितः सन् दुर्गपथे कस्मिंश्चित् अतिसङ्कीर्णे स्थाने तिष्ठन् शत्रूणाम् आगमनस्य प्रतीक्षां कृतवान् । सन्निहिते च शान्तराजसैन्ये महत् युद्धम् आरब्धम् । कुन्ताकुन्ति दण्डादण्डि च युद्धं प्रवृत्तम् । त्रिचतुराः घण्टाः यावत् अखण्डं प्रवृत्ते तस्मिन् युद्धे यदुराजः मृगराजः इव गर्जन् 'घातय, प्रहर' इति वदन् निर्भीकतया शत्रुसैन्यं प्रविष्टवान् । व्याधभटाः सरभसं तम् अनुसृतवन्तः । उद्रिक्तानां तेषां शूलप्रहारैः अगणिताः शत्रुभटाः भूमौ न्यपतन् । किञ्चिद्दूरे उन्नते स्थाने स्थितैः धनुर्धारिभिः प्रयुक्तैः निशितैः बाणैः घातिताः अपि शत्रुपक्षीयाः बहवः भटाः यमसदनं प्राविशन् । अन्यत्र स्थिताः वासुदेवय्यस्य अनुचराः शत्रुसैन्योपरि महाशिलाः अपि अपातयन् । एवं बहुप्रकारैः पीडिताः शान्तराजस्य सैनिकाः किञ्चिदिव अधीराः जाताः । यद्यपि पराक्रमेण एव अयुद्ध्यन्त, तथापि मध्ये स्थितान् तान् परितः तिसृभ्यः दिग्भ्यः तिसृभिः सेनाभिः युगपत् आक्रमणं कृतम् इत्यतः ते किमपि कर्तुं न अशक्नुवन् । शान्तराजोऽपि निरुपायतया युद्धविरामं चिन्तयन् आसीत् ।

तावता राजपक्षीयाणां मध्ये हाहाकारः समुद्भूतः । नञ्जराजः जीवितेच्छां विहाय शूलपाणिः सन् शत्रुसेनां प्रविष्टवान् । तदैव केनचित् शत्रुणा प्रयुक्तेन लघुना खडेन वक्षसि घातितः सन् भूमौ न्यपतत् । व्याधभटाः झटिति तम् उन्नीय सेनायाः पृष्ठभागं नीतवन्तः । "सुमहान् घातः एव जातः !" इति अवदत् कश्चन अनुभवी भटः । तत् श्रुत्वा सर्वेऽपि सैनिकाः नितरां दुःखिताः सन्तः हाहाकारम् अकुर्वन् । यदुराजः अपि स्वीयेन सैन्येन सह दुर्गस्य अन्तः गतवान् ।

'यदुराजः भीत्या दुर्गस्य अन्तः प्रविष्टवान्' इति विश्वस्य शान्तराजोऽपि स्वीयेन सैन्येन सह दुर्गाभिमुखम् अगच्छत् ।

दुर्गस्य मुख्यद्वारस्य कपाटद्वयमपि महावृक्षस्य स्थूलैः काष्ठफलकैः निर्मितम् । द्वारबन्धोऽपि स्थूलैः अयस्स्तम्भैः दृढं निबद्धः आसीत् । तथापि सैनिकानां परशु-मुद्गर-कुद्दालादीनां प्रहारैः कपाटद्वयमपि भञ्जितम् अभवत् । दुर्गप्रवेशाय निष्कण्टकः मार्गः कल्पितः अभवत् । शान्तराजस्य सैनिकाः उच्चैः जयघोषम् अकुर्वन् । 'दुर्गं प्रविश्य तत्र स्थितान् शत्रून् मशकान् इव ध्वंसयामि' इति विचिन्त्य अन्तः प्रविष्टः शान्तराजः तत्र पश्यति, अहो, पुरतः दृश्यते अन्योऽपि कश्चन दुर्गः ! तस्य दुर्गस्य द्वारं तु सामान्यमेव आसीत् । अतः शान्तराजस्य सैनिकाः सुखेन एव तद् भञ्जयित्वा ततोऽपि अन्तः

प्राविशन् । तत्रापि ते किं वा पश्यन्ति..! मण्डलाकारेण निर्मितानि रिक्तानि गृहाणि, भूताकाराः महावृक्षाः ! नैकोऽपि मनुष्यः दृश्यते तत्र ! द्वित्रसहस्रजनैः युते दुर्गे अधुना एकोऽपि नैव दृश्यते ! कथमेतत् शक्यम्... ! शान्तराजः भ्रान्तः जातः । अत्रान्तरे रात्रिः उपनता । मुख्य-द्वारस्य रक्षणाय केचन तत्र गताः । परन्तु अहो आश्चर्यम्, तद् द्वारम् इदानीं यथापूर्वं समीकृतम् अस्ति ! बहिर्भागे कीलितम् अपि अस्ति !!

अधुना किं वा करणीयम् ? दुर्गात् बहिः सहस्राधिकजनानां कलकलध्वनिः श्रूयते स्म । अन्यथा शान्तराजः पुनरपि मुख्यद्वारस्य भञ्जनम् अकारयिष्यत् । एतावता सर्वेऽपि सैनिकाः नितरां श्रान्ताः आसन् । सर्वेऽपि विश्रान्तिं कामयमानाः कुत्र शयनीयम् इति अचिन्तयन् । ततः निर्मक्षिकाणि गृहाणि प्रविश्य लब्धे स्थाने शय्यादीनाम् अपेक्षाम् अकृत्वा एव शयानाः निद्रावशाः अभवन् ।

'अनेन प्रकारेण शत्रवः बन्धिग्राहं ग्रहीतव्याः' इति यदुराजेन या योजना कृता सा सम्पूर्णतया साफल्यं प्राप्नोत् । शान्तराजात् भीतः इव दुर्गस्य अन्तः प्रविष्टः सः गुप्तद्वारात् ससैन्यं ततः बहिः निर्गतः आसीत् । ततश्च झटिति दुर्गस्य मुख्यद्वारसमीपम् आगत्य अल्पेनैव कालेन भञ्जितमपि तद् द्वारं यथापूर्वं सम्यक् कारितवान् च । वस्तुतः इदानीं तु तद् द्वारं तथा दृढम् आसीत् यत् कथमपि दुर्गस्य अन्तःस्थितैः तस्य उद्घाटनं सर्वथा न शक्यमासीत् । 'दुर्गः अस्माभिः जितः' इति चिन्तयन्तः शत्रवः स्वयमेव तस्य अन्तः बन्धनं प्राप्तवन्तः आसन् !

दुर्गात् बहिः चतरग्रामसमीपे शान्तराजस्य सेनायाः काचित् वाहिनी आसीत् या च आहारादिसामग्रीणां रक्षणं कुर्वती आसीत् । कृष्णराजः गृध्रः इव तदुपरि आक्रम्य तां पराजित्य तत्रत्याः सामग्रीः स्वायत्तीकृतवान् । अनेन तेन शताधिकाः तुरगाः दशाधिकाः गजाश्चापि विनायासं प्राप्ताः ।

परेद्यवि उषसि एव उत्थिताः सैनिकाः 'अधुना कस्याम् अवस्थायां स्मः वयम्' इति ज्ञातुं प्राकारभित्तिम् आरोहन् । ततः तैः दृष्टं यत् दुर्गात् बहिः वर्तमाने विशाले क्षेत्रे राजपक्षीयाः सहस्राधिकसंख्यया सम्मिलिताः सन्ति ! तेषु अग्रे स्थिताः केचन धनुर्धराः दुर्गोपरि दृष्टान् सर्वान् अपि निशितैः बाणैः घातयित्वा अधः पातयन्ति स्म । गोपबालाः चटकान् इव एतेऽपि प्राकारभित्तेः उपरि दृष्टान् शत्रुपक्षीयान् सैनिकान् निपातयन्ति स्म ।

‘हन्त ! वयं बन्धिनः एव जाताः किम् ?’ इति चिन्तयन्तः शान्तराजप्रभृतयः दुर्गात् बहिः निष्क्रमणयोग्यः मार्गः कोऽपि दृश्यते वा इति परिशीलनम् अकुर्वन् । परन्तु न कोऽपि तादृशः मार्गः दृष्टः । तन्मध्ये मध्याह्नकालोऽपि सन्निहितः । अधुना तु मृत्युभयादपि उदरपूरणस्य का गतिः इत्येव चिन्ता तान् अबाधत । द्विसहस्रस्य जनानां भोजनं कथं कल्पनीयम् .. ?

क्रमेण सायङ्कालोऽपि जातः । दुर्गात् अनतिदूरे आहारादिसामग्रीणां रक्षणाय नियुक्ताः सैनिकाः केनापि उपायेन आहारम् अत्र प्रापयेयुः इति दुर्गान्तर्वर्तिभिः चिन्तितम् । परन्तु ततः न कस्यापि वार्ता ! ‘का गतिः अस्माकम् !’ इति परस्परं मुखं पश्यन्तः ते ततः निराशाः सन्तः तत्र दृष्टानि औदुम्बरफलानि, जम्बूफलानि, अन्यानि खादनयोग्यानि पर्णानि च खादित्वा यथेच्छं जलं च पीत्वा तावता एव उदरसेवां निरवर्तयन् ।

अन्येद्युः एव शान्तराजः दुर्गस्य मुख्यद्वारस्य उपरि स्वीयशरणागतिसूचिकां श्वेतपताकां प्रादर्शयत् । ततः उपरिष्टात् लम्बितां तन्तुनिर्मितां निश्रेणिम् अवलम्ब्य तदीयौ अधिकारिणौ अधः अवतीर्णौ । यदुराजस्य शिबिरं प्रविष्टौ तौ तत्र तेन सूचितान् सर्वान् अपि समयान् अङ्गीकृत्य सन्धिपत्रे हस्ताक्षरं कृतवन्तौ ।

चमत्कारकारिणी इयं विजयवार्ता स्वयमेव चतसृषु अपि दिक्षु प्रसृता अभवत् । राजपक्षीयाणाम् अभिमानिनः च मैसूरुनगरे अन्यत्र च सन्तोषेण रहसि एव शर्करावितरणम् अकुर्वन् । नारिकेलसमर्पणेन मङ्गलनीराजनेन च भगवन्तम् अपूजयन् ।

कुत्रापि गत्वा स्थिताः चतरग्रामनिवासिनः सर्वेऽपि अधुना झटिति स्वग्रामं प्रत्यागताः । हारतोरणादिबन्धनेन सुधालेपनादिना च ग्रामम् सालङ्कृतम् अकुर्वन् । पुरतः शोभमानां विजयपताकां गृहीत्वा विजयोत्साहेन प्रमत्ता वीरसेना ग्रामं प्राविशत् । सेनायाः अग्रे विराजमानं भद्रनायकं तस्य पत्नी सुमङ्गलाभिः सह गत्वा नीराजनं कृत्वा प्रत्युद्गतवती ।

विजयवार्तया अनया राजपक्षीयैः आनन्दः यथा, तथा विषादोऽपि अनुभूतः । यतः पक्षरूपेण तेषां सङ्घटनं संवर्धनं च येन कृतं सोऽयं नञ्जराजबहद्दूरः क्षतितः सन् शयानः आसीत् । तीव्रं व्रणितः सः अधुनापि विसंज्ञः एव आसीत् । शरणाम्बायाः आधीन्ये विसृष्टः सः भद्रनायकस्य भवनैकदेशे स्थापितः आसीत् । शरणाम्बया क्रियमाणया विलक्षणया शुश्रूषया सः अधुनापि धृतप्राणः आसीत् ।

अतीतेषु अष्टसु दिनेषु, नञ्जराजः क्रमशः संज्ञां प्राप्तवान् । परन्तु अधुनापि सः भाषणे शक्तः न आसीत् । तथापि कदाचित् क्षीणेन स्वरेण - 'युद्धस्य वार्ता का ?' इति तेन पृष्टा शरणाम्बा उक्तवती - "अस्माभिः जयः प्राप्तः । शान्तराजः बन्धिग्राहं गृहीतः" इति ।

"शरणार्ये ! शर्करा पततु ते मुखे । मदधीनेषु ग्रामेषु अन्यतमः तुभ्यं प्रदीयते ईदृशी वार्ता श्राविता इति हेतोः । कृपया युद्धवातार्ं विस्तरेण कथ्यताम्" इति उक्त्वा नञ्जराजः उद्विग्नतया उत्थाय उपाविशत् ।

शरणाम्बा शिष्यायाः साहाय्येन तं पुनः शाययित्वा अवदत् - "वीर-शिरोमणे ! नैवम् आत्मा आयासनीयः भवता । दिनचतुष्टयानन्तरम् उत्थातुम् अर्हति भवान् । सद्यः तु शयनमेव कर्तव्यम् ।"

"तथैव अस्तु वैद्ये ! नाहं भवत्याः आज्ञातिक्रमणे शक्तः । शरणार्ये ! भवती दर्शनेन वृद्धा इव भाति । परन्तु भवत्याः कण्ठस्वरः तु युवतीनाम् इव नितरां मञ्जुलः अस्ति । देहयष्टिः अपि बन्धुरा दृश्यते । कथम् एतत् शक्यम् ?"

"महानुभाव ! आजन्मव्रतिनी अस्मि अहम् । अतः प्रकृतिसहजाः वयोविकाराः न मां बाधन्ते । अन्यच्च, महिलानां कण्ठस्वरः तु प्रकृत्या एव मञ्जुलः खलु..?"

"भवत्याः किं वयः ?"

"स्त्रियः न जानन्ति वयोगणनाम् । मम माता वदति यत् चामराजस्य जन्मोत्सवदिने एव जाता अहम् इति ।"

"तन्नाम षष्टिः वर्षाणि भवत्याः .... ! नाहं विश्वसिमि....." नञ्जराजः विस्मयेन अवदत् ।

"उक्तं खलु, नाहं जानामि वयोगणनाम् इति । किं चामराजस्य जन्म षष्टेः वर्षेभ्यः पूर्वम् अभवत् ?" इति वदन्ती शरणाम्बा ईषत् अहसत् ।

एकदा मध्याह्नकाले नञ्जराजः शयानः उत्स्वप्नवचनानि अवदत् । स्वप्रकोष्ठे उपविश्य भस्मधारणं कुर्वती शरणाम्बा तत् श्रुत्वा झटिति उत्थाय तत्र गतवती ।

'पुनः किं जातं स्यात्' इति चिन्तयन्ती सा नञ्जराजस्य हस्तं गृहीत्वा नाडी-परीक्षणं कृतवती । ज्वरः नास्ति इति निश्चितं तया । ततः तस्य लोलालके ललाटे च हस्तेन मृदुस्पर्शं कृतवती । प्रतिदिनं

क्रमशः स्वस्थतां प्राप्नुवतः तस्य मुखे विलसन्ती शान्तकान्तिः तया लक्षिता । अधुनापि नञ्जराजः निद्रावस्थायामेव आसीत्, सुखमयस्वप्नदर्शनेन आविर्भूता स्मितिमुद्रा इतोऽपि तस्य मुखे शोभमाना आसीत् । तां शोभां दृष्ट्वा सा सावधानेन तस्य गल्लं चुम्बितवती ।

तेन मृदुमधुरसुखस्पर्शेन जागरितः इव नञ्जराजः मन्दं नेत्रे उन्मील्य अपश्यत् । झटिति एव सा तापसी विद्युद्वेगेन ततः धावन्ती स्वप्रकोष्ठं प्रविष्टवती ।

"अहो, सैवेयम्..." इति वदन् नञ्जराजः मञ्चात् अधः उत्प्लुत्य तामेव अनुसरन् प्रकोष्ठं प्रविश्य - "अहो उमे ! मे मनोरमे !" इति उक्त्वा तस्याः हस्तं गृहीतवान् । इतोऽपि पूर्णतया भस्मलेपनं न कृतम् आसीत् इत्यतः उमायाः रहस्यम् उद्घाटितम् अभवत् । नञ्जराजः प्रेमपारवश्येन तां दृढम् आलिङ्गितवान् ।

"किमिदम् उद्दामम् आचरणम् ? किम् एषः वैद्येषु व्यवहारक्रमः ....?" इति आक्षिपन्ती उमा - "क्षतः अधुनापि आर्द्रः अस्ति । वक्षसि वेदना स्यात्" इति उक्त्वा तस्य वक्षःस्थले क्षतोपरि प्रेम्णा हस्तसञ्चालनं कृतवती ।

तावता तस्याः शिष्या नीला स्वेन धृतं काषायवस्त्रं परिहाय शाटिकां धृत्वा उमायाः निमित्तमपि दुकूलवस्त्राणि आनीतवती । तां वीक्ष्य नञ्जराजः - "अयि नीले ! किम् एवमपि भवती वञ्चितवती माम् ... ?" इति अपृच्छत् ।

"तत्र को विशेषः ? भवतः भाविन्या पत्न्या एव यदा भवान् वञ्चितः तदा तदीयया दास्या मया किमपराद्धम् ?" - हसन्ती उक्तवती नीला ।

"का आसीत् ईदृशवेषधारणस्य आवश्यकता .....?"— सः अपृच्छत् ।

"कथयामि । भवान् स्वीयं प्रकोष्ठं गच्छतु" इति उक्त्वा उमा तं प्रेषयित्वा वस्त्राभरणानि धृत्वा पुनः तत्समीपम् आगतवती, पृष्टवती च - "का वञ्चना कृता मया ?" इति ।

"चतरग्रामम् आगतवत्याः भवत्याः मासः अतीतः । तथापि आत्मनः वास्तविकः परिचयः नोद्घाटितः भवत्या । इतोऽप्यधिका वञ्चना का भवितुम् अर्हति ?" इति वदन् नञ्जराजः तां चारुसर्वाङ्गीं बाहुभ्यां परिष्वज्य समीपे उपवेशितवान् ।

“भवता न ज्ञातं किं यत् सद्यः एव मैसूरुनगरम् आगतः कश्चन विरागी मां वञ्चितवान् इति .....?”

नञ्जराजः तस्याः गल्लम् अङ्गुल्या प्रहृत्य - “अहो, किं तदर्थम् एवं कृतम् ? ऋणं प्रत्यर्पितं तर्हि । भवतु, भवत्योः का वार्ता ? कथ्यताम्” इति अवदत् ।

“मम पितुः भीरुस्वभावः भवता ज्ञातः एव । न जाने कदा अहं तस्य धूर्तस्य शान्तराजस्य दृष्टिपथम् आगता इति । तेन मम पिता प्रार्थितः यत् अहं तस्मै देया इति । पित्रा निराकृतम् । तदा तु सः मारनायकद्वारा वाचितवान् यत् शान्तराजाय उमा दातव्या । अन्यथा भवदीया सम्पत् बलात् स्वायत्तीकरिष्यते इति ।”

“अहो धाष्टर्यं तस्य ! ततस्ततः ... ?”

“ततः किम्, मम पिता शान्तराजं दृष्ट्वा निवेदितवान् यत् उमा नञ्जराजाय वचसा दत्ता अस्ति । तयोः परस्परम् अनुरागः अस्ति । अतः तौ न पीडनीयौ इति । किन्तु भवतः नाम्नः श्रवणमात्रेण नितरां क्रुद्धः मारनायकः अगर्जत् - ‘तन्न शक्यम् । उमा शान्तराजाय दातव्या एव इति ... ।”

“किं भवत्याः पित्रा तत् अङ्गीकृतम्..?”

“आम्, अनन्यगतिकतया अङ्गीकृतम् । अतः एव अहं वेषपरिवर्तनं कृत्वा अत्र आगता ।”

“एवम् ! तौ चाण्डालौ यदि न दण्डयिष्यामि तर्हि नाहं नञ्जराजः” इति उक्त्वा दन्तान् कटकटायितान् कृतवान् सः । ततः पृष्टवान् च - “अत्रान्तरे देवकीदेव्याः का गतिः जाता ? मारनायकः तां परिणेतुकामः आसीत् ननु ?”

“उमायाः पाणिग्रहणे भवान् मम साहाय्यं करोतु, अहं देवकीदेव्याः पाणिग्रहणे भवतः साहाय्यं करिष्यामि इति शान्तराजः मारनायकम् उक्तवान् अस्ति । परस्परं सहकारकरणे प्रतिबद्धौ तौ । अतः मारनायकः महाराज्ञीं पुनः पुनः पीडयन् अस्ति इत्यपि श्रुतम् ।”

अयि वाचकवरेण्याः ! कञ्चित् कालं यावत् उमां नञ्जराजं च आपृच्छन्ताम् ।

* * *

मैसूरुनगरे स्थितः मारनायकः चतरग्रामस्य वार्तामेव प्रतीक्षमाणः आसीत् । तेन चिन्तितं यत् 'शान्तराजः शत्रून् पराजित्य प्रतिनिवर्तिष्यते । तदा मया बलात्कारेण वा देवकीदेवी परिणेतुं शक्या । ततः परं न कोऽपि मे प्रष्टा । मम स्थानमपि सुस्थिरं भविष्यति' इति ।

चतरग्रामात् अश्वारूढः वार्ताहरस्तु समागतः । परन्तु तेन आनीता वार्ता तु अनिष्टकरी एव । तां श्रुत्वा सन्तप्तः क्रुद्धश्च मारनायकः स्वस्यैव करपृष्ठम् अदशत् । वार्ताहरं च कोपेन प्राहरत् । सरभसम् इतस्ततः सञ्चरन् पुरोवर्तिनीं भित्तिमपि अदृष्ट्वा शिरसा घट्टितः जातः सः । ततः शयनागारं प्रविश्य सम्यक् आच्छाद्य सुप्तं तेन । तथापि सन्तृप्तिम् अप्राप्य उत्थाय पुनरपि तं वार्ताहरम् आनाय्य साधुवचनैः तं सन्तोष्य तन्मुखात् समग्रं युद्धवृत्तान्तं सः श्रुतवान् । ततश्च प्रमुखाणां गोष्ठीं समायोज्य तैः सह विचारविनिमये निरतः अभवत् ।

"अधुना एव चतरग्रामोपरि आक्रमणं कर्तव्यम् । शत्रवः गरुडनीडदुर्गे स्थातुं न शक्नुवन्ति । यतः तत्र अस्मदीयाः निगृहीताः सन्ति खलु । अतः शत्रवः दुर्गात्तु बहिरेव सम्मुखीकर्तव्याः" - अनुभववान् कश्चन वीरः एवं सूचितवान् ।

"जयप्पेन यदुक्तं तत्तु शोभनमेव । परन्तु अन्यदपि चिन्तनीयम् अस्ति । अधुनैव चतरसैन्ये चतुस्सहस्राधिकाः सन्ति । अत्रत्याः राजपक्षीयाः अपि क्रमशः तत्र गत्वा सम्मिलन्तः सन्ति । अस्माकं सैन्येऽपि सन्ति चतुस्सहस्रमिताः एव । एवं सति बहिः क्रियमाणे युद्धे अस्माकमेव जयः भविष्यति इत्यत्र कः विश्वासः ?" - अपरः कश्चन अधिकारी स्वाभिप्रायम् एवं प्राकटयत् ।

"समस्तमपि सैन्यं यदि तत्र नयेम तर्हि मैसूरुनगरस्य रक्षणं कः कुर्यात् ? चतरग्रामः प्राप्तः, मैसूरुनगरं हस्तच्युतम् अभवत् - इत्येतादृशी स्थितिः न भवेत् खलु ?" - अन्यः अवदत् ।

"गरुडनीडदुर्गे अस्माकं सेना निगृहीता अस्ति । तस्याः का गतिः भवेत् ? चतरग्रामः कदाचित् अस्माभिः जीयेत । किन्तु तदा शत्रवः दुर्गान्तर्वर्तिन्याः अस्माकं सेनायाः आहारादीनाम् आपूर्तिव्यवस्थामेव नाशयेयुः अपि कदाचित् ।"

सर्वेषाम् अभिप्रायं श्रुत्वा अन्ते मारनायकः निर्णीतवान् यत् शत्रवः यदा मैसूरु-नगरोपरि आक्रमणं करिष्यन्ति तत्काले एव करणीयं कृत्यं चिन्तनीयम् इति ।

* * *

मैसूरुराजभवनं प्रति नित्योपयोगिनां वस्तूनाम् आपूर्तिं करोति जम्बुलिङ्गः । तस्य पुत्री कामाक्षी कदाचित् प्रातःकाले विविधानि फलानि, मल्लिका-चम्पक-पारिजात-बकुलादीनि पुष्पाणि, अन्यानि पत्राणि च कण्डोले संस्थाप्य कण्डोलं कस्यचित् सेवकस्य शिरसि आरोप्य तेन अनुगम्यमाना सती राज्ञीवासं प्रति गतवती । सा प्रतिदिनम् आगच्छति इत्यतः न कोऽपि रक्षकः तां किमपि अपृच्छत् । सः सेवकः काञ्चित् वेष्टीं विचित्ररीत्या धृतवान् आसीत् । वक्ररूपेण तिलकं धृतवान् आसीत् । राज्ञीवासप्रवेशसमनन्तरमेव कामाक्षी कण्डोलात् काञ्चित् वस्त्रग्रन्थिं सेवकस्य हस्ते निधाय तं प्रकोष्ठस्य अन्तः प्रेषितवती । स्वयं च द्वारं पिधाय तत्रैव स्थितवती ।

किञ्चित्कालानन्तरं प्रकोष्ठस्य द्वारम् उद्घाटितम् । ततः अधुना बहिः आगतः तु आसीत् न सः सेवकः, अपि तु धृतकौशेयवस्त्रः धृतपट्टोष्णीषः च यदुराजः !

तावता कामाक्ष्या महाराज्ञी विज्ञापिता - "यदुराजः अत्र आगत्य भवत्याः दर्शनार्थी द्वारे प्रतीक्षते" इति ।

तत् श्रुत्वा महाराज्ञी सम्भ्रमेण - "किं यदुराजः आगतः इति ? अपि एतत् सत्यम् ? तम् अविलम्बेन अन्तः प्रवेशय" इति आदिष्टवती ।

यदुराजस्य नामश्रवणमात्रेण मातुः पार्श्वे एव स्थितवत्याः देवकीदेव्याः मुख-कमलं विकसितम् अभवत् । आनन्दातिशयेन हृदयं चञ्चलम् अभवत् । मनोरमणस्य मुखं कदा पश्येयम् इति उत्कण्ठिता सा लज्जया शिरः अवनमय्य मातुः पृष्ठभागे स्थितवती ।

तदानीमेव प्रासादं कम्पयन् इव पदनिक्षेपं कुर्वन् सः पुरुषसिंहः अन्तः आगतवान् । देवकीदेवी न ज्ञातवती यत् किं सः प्रासादं प्रविष्टवान्, उत स्वस्य हृदयम् इति । तेजःपूर्णं तस्य मुखं देवकीदेवीं कथं व्यामुग्धम् अकरोत् इत्येतत् तया एव वक्तुं शक्यं, न तु अन्यैः । तत्रापि परपुरुषैः तु सर्वथा नैव शक्यम् ।

महाराज्ञी परमादरेण तस्मै उपवेशनाय आसनं दर्शयन्ती उक्तवती - "यदुराज ! महान्तं पराक्रमं दर्शयता भवता विजयः प्राप्तः इत्येतत् ज्ञात्वा नितराम् आनन्दिताः वयम् । कदा वा भवतः दर्शनभाग्यं लभ्येत इति उत्कण्ठितम् आसीत् मम हृदयम् । विनायासेन अत्र आगत्य दर्शनभाग्यं कल्पयता भवता भृशम् उपकृताः वयम्" इति ।

“देवि ! मयि विश्वस्य सेनापतित्वं दत्तं भवत्या । दैवकृपया भवत्याः आशीर्वादबलेन च अस्य सेवकस्य यत्नः सफलः अभवत्” - यदुराजः विनयेन उक्तवान् ।

“अम्ब ! मया नैके युद्धप्रसङ्गाः श्रुताः । परन्तु चतरे प्रवृत्तमिव विस्मयावहं युद्धं नान्यत्र कुत्रापि श्रुतम्” इति वदन्ती देवकीदेवी यदुराजे कटाक्षपातम् अकरोत् ।

पुनः कञ्चित् कालं यावत् वार्तालापः प्रवृत्तः । यदुराजस्य दृष्टिः तु कमलकोशे लग्नस्य भ्रमरस्य इव तस्याः मुखकमले बद्धम् आसीत् । अनेन तस्याः वधूमणेः शरीरं शनैः अकम्पत । स्वेदकणैः आर्द्राः अङ्गुलयः तया मार्जिताः । तयोः तादृशीं मनोवृत्तिं जानती महाराज्ञी मनसि एव सन्तोषम् अनुभूतवती । प्रतापशालिनं सुरूपिणं सत्कुलप्रसूतं च महात्मानं जामातृरूपेण प्राप्तुं का वा कन्याप्रसूः न इच्छेत् ?

महाराज्ञी यदुराजं सानुरोधम् उक्तवती यत् भवता अत्रैव अल्पाहारः स्वीकरणीयः इति । यदुराजः एतत् अङ्गीकृतवान् । कामाक्षी महाराज्ञी देवकी च तस्य सज्जतार्थम् अगच्छन् ।

देवकीदेवी यदा स्वकेशपाशं समीकृत्य बध्नती आसीत् तदा तत्र स्थितायाः मालायाः त्रिचतुराणि पुष्पाणि गलितानि सन्ति अधः न्यपतन् । यदुराजः सम्भ्रमेण तानि उत्थाप्य स्वकञ्चुके निक्षिप्तवान् । पृष्ठतः प्रवृत्तम् अपि एतत् देवकीदेव्या ज्ञातमेव । अनेन स्वमनोहरस्य प्रेम मयि निश्चितरूपेणापि संलग्नम् अस्ति इति ज्ञात्वा सा आनन्दातिशयेन यदुराजस्य मुखं पश्यन्ती विलासेन अहसत् ।

विशालं चतुश्शालकं प्रविष्टाः सर्वे । पाचिका पीठानि प्रकल्प्य पुरतः सौवर्णस्थालिकाः सौवर्णचषकांश्च सज्जीकृत्य स्थापितवती । अपरा तत्र नानाविधानि व्यञ्जनानि परिविष्टवती । ततः यदुराजः पाणिपादं मुखं च प्रक्षाल्य पीताम्बरं धृत्वा अल्पाहाराय उपविष्टवान् ।

तस्य पुरतः अनतिदूरे देवकीदेवी कामाक्ष्या तत्र आनीतानि पुष्पाणि ग्रथ्नती उपविष्टा । दृष्ट्या एव यदुराजस्य सुपुष्टं वज्रकायं पिबन्ती इव तं पश्यति स्म सा । यथा यथा मालायाम् एकैकं पुष्पं योजयति तथा तथा स्वस्योपरि कटाक्षं पातयन्तीं तां पश्यतः यदुराजस्य अल्पहारस्वीकरणं कथं वा भवेत् ?

चन्द्रमुख्याः तस्याः विशाले ललाटे विराजमानस्य लोलालकस्य शोभां दृष्ट्वा सः - “मलिनमपि हिमांशोः लक्ष्म लक्ष्मीं तनोति” इति उच्चैः अवदत् । अनुक्षणमेव ‘अहो, किं कृतं मया’ इति विचिन्त्य जिह्वां दशन् मुखम् अवनमय्य शष्कुलीखण्डमेकं मुखे संस्थाप्य भक्षणे निरतः अभवत् । महाराज्ञी संस्कृतं सम्यक् न जानाति । अतः तस्याः कालिदासोक्त्याः भावः तया नावगतः । परन्तु विदुषी देवकी तु यदुराजस्य आन्तरङ्गिकं भावम् अवगत्य चेलाञ्चलेन मुखम् अपवार्य हसितवती ।

अल्पाहारं समाप्य ताम्बूलस्वीकरणस्य अनन्तरं यदुराजः महाराज्ञीम् अपृच्छत् - ‘‘मया श्रुतं यत् तत्रभवत्याः पुत्रीं परिणेतुम् इच्छन् मारनायकः नितरां पीडां जनितवान् इति.... ।’’

‘‘सत्यमेव । एकदा तु अत्याचारम् अनुष्ठातुमेव आगतः आसीत् सः । किन्तु राजभवनस्य प्रमुखः अळसिङ्गरायः ‘धिक् भवतः जीवितम् !’ इति वदन् तं निवारितवान् । दैवकृपया अळसिङ्गरायस्य साहाय्येन पुत्र्याः मानः रक्षितः’’ इति उक्तवती महाराज्ञी देवकीदेव्याः स्कन्धे हस्तं संस्थाप्य । तस्याः नेत्रयोः अश्रुबिन्दवः दृष्टाः ।

‘‘मास्तु चिन्ता । पूर्णः अस्ति तस्य पापकुम्भः । इतः मासाभ्यन्तरे एव तं निगृह्य तत्पश्चादेव तत्रभवत्याः दर्शनं करिष्यामि’’ - यदुराजः तप्तस्वरेण उक्तवान् ।

यदुराजः प्रस्थितः । तदा देवकीदेवी तस्य समीपं गत्वा - ‘‘मया श्रुतं यत् यदुराजः पुष्पाणि स्पृहयति, सः म्लानानि अपि पुष्पाणि प्रेम्णा संगृह्णाति च इति । तत्कृपया इयं पुष्पमाला एव स्वीक्रियताम्’’ इति अभिधाय तस्य मुखम् आतृप्ति वीक्ष्य पुष्पमालां तस्य हस्तयोः न्यक्षिपत् ।

‘‘मम प्रस्थानसमये भवत्या इयं माला प्रदत्ता इत्येतत् शुभशकुनमेव मन्ये । अहं चिन्तयामि यत् विजयश्रीः एव अनया मालया मम कण्ठम् अलङ्कृतवती’’ इति श्लेषेण उक्त्वा यदुराजः ततः वेषपरिवर्तनं कृत्वा कामाक्ष्या सह प्रस्थाय तस्याः गृहं प्राप्तवान् । तद्दिने तस्य आनन्दः अवर्णनीयः एव आसीत् । सः क्वचित् हसति, क्वचित् गायति, क्वचित् मनोरथमेव आरुह्य दिगन्तपर्यन्तमपि गत्वा आगच्छति ।

* * *

अधुना राजपक्षीयाणां पर्याप्तमात्रेण सैन्यबलम् आसीत् । ते प्रतीक्षमाणाः आसन् यत् मैसूरुनगरं कदा वा आक्रमणेन वशीकुर्याम इति । प्रतिदिनमपि विविधान् दुर्गवशीकरणोपायान् यदुराजकृष्णराजौ सैनिकान् शिक्षयतः स्म । दुर्ग-भित्तिपातनाय यन्त्राणि अपि सज्जीकृतानि । शस्त्रनिर्माणकुशलाः लोहकाराः तक्षकाश्च तदर्थम् अहोरात्रं कार्यम् अकुर्वन् । हस्तिपकाः गजेभ्यः शिक्षणम् अयच्छन् । सैनिकेभ्यः उत्साहप्रदानाय तेभ्यः पारितोषिकाणि यच्छन्तु इति समीप-ग्रामस्थाः धनिकाः निवेदिताः । युद्धे यदि कोऽपि म्रियते तर्हि तत्परिवारसंरक्षणाय भूरि धनं प्रदीयते इति आश्वासनमपि प्रदत्तम् ।

समाप्तासु सर्वविधासु सज्जतासु कदाचित् यदुराजः चतरग्रामे महति क्रीडाङ्गणे सर्वान् सम्मेल्य स्वयं च उन्नतां शिलाम् आरुह्य स्थित्वा उच्चैः अवदत् - ''सैनिकाः, अधिकारिणश्च ! पराक्रमेण युद्धं कृतवद्भिः भवद्भिः पूर्वतने युद्धे विजयः सम्पादितः । परराजानां साहाय्येन अस्माभिः सह योद्धुम् इच्छति दुष्टः मारनायकः । साहाय्यार्थं परेषाम् आगमनात् पूर्वं वयमेव मैसूरुनगरोपरि आक्रमणं करिष्यामः । अयमस्ति भवतां पराक्रम-प्रदर्शनस्य उचितः अवसरः । मारनायकस्तु प्राणापायम् अपि अविगणय्य व्याघ्रः इव उग्रं युद्ध्येत । यदि अस्मिन् युद्धे अस्माभिः पराजयः प्राप्येत तर्हि न केवलम् अस्माभिः, अपि तु चामराजपरिवारीयैः, अन्यैः राजनिष्ठैश्चापि नानाविधं दण्डनं प्राप्तव्यं भवेत् ! अतः भवद्भिः सर्वैः धैर्येण योद्धव्यम् । शूरेषु साहसिकेषु राजभक्तेषु च भवत्सु मया निवेदनीयं किमपि नास्ति । भवतां स्वागताय प्रतीक्षारता अस्ति मैसूरुनगरदेवता । भवन्तः यत्र गच्छन्ति तत्र विजयः भवेत्'' इति ।

ततः सः 'विजयतां श्रीचामराजः' इति जयघोषम् अकरोत् । सैनिकाः अपि ''विजयतां श्रीचामराजः'' इति उद्घोष्य ततः ''विजयतां यदुमहाराजः'' इत्यपि उद्घोषणम् अकुर्वन् ।

ततः तृतीये दिने अरुणोदयकाले राजपक्षीयं तत् सैन्यं महता उत्साहेन मैसूरु-नगराभिमुखं प्रातिष्ठत । पदातीनां पतिः आसीत् भद्रनायकः, अश्वारोहिणां नायकः कृष्णराजः, कुन्तधराणां प्रमुखश्च आसीत् नञ्जराजः । युद्धसामग्री-रक्षणभारः वासुदेवय्यस्य आसीत् ।

शत्रूणाम् आगमनवार्तया मारनायकः विचलितः नाभवत् । सः तान् सम्मुखीकर्तुं सज्जः अभवत् । ''यदि अस्माकं जयः भविष्यति तर्हि भवत्सु धनकनकवृष्टिमेव करिष्यामि'' इति सैनिकान् उक्तवान् सः । मारनायकः अपि महापराक्रमी एव इति जानन्तः सैनिकाः तस्य सेनापतित्वे स्वपक्षस्य एव जयः इति निश्चितवन्तः ।

यदुराजस्य सैन्यं मध्याह्ने मैसूरुनगरं प्राप्नोत् । तदा एव दुर्गोपरि आक्रमणं कृतम् । मारनायकस्य भटाः दुर्गप्राकारे स्थित्वा निशितान् शरान् प्रयुक्तवन्तः । यदुराजपक्षीयाः अपि धिन्वनः तेषु बाणप्रयोगं कुर्वन्तः अनेकान् सैनिकान् अमारयन् । त्रिचतुराः घण्टाः यावत् एवमेव महत् युद्धं प्रवृत्तम् । परन्तु यदुराजपक्षीयैः एव अधिका हानिः प्राप्ता । ततः यदुराजः स्वसैन्यं पृष्ठतः सारितवान् । तावता रात्रिः सन्निहिता । मारनायकः अपि स्वसैनिकान् युद्धविरतान् अकारयत् ।

परन्तु यदुराजः हतोत्साहः नाभवत् । सः अनेकाः महाशिलाः काष्ठस्तम्भांश्च शकटैः आनायितवान् । ततः चत्वारिंशता गजैः, चतरात् आगतैः व्याधभटैश्च सह मध्यरात्रसमये दुर्गसमीपम् आगतवान् । ततः परिखायाः एकदेशं काष्ठैः शिलाभिश्च पूरयित्वा तेन मार्गेण गजान् प्राकारभित्तिसमीपं प्रेषितवान् ।

तावता अधः प्रवर्तमानं कोलाहलं श्रुत्वा अपायसूचनां च प्राप्य रक्षकाः काहलघोषम् अकुर्वन् । तं श्रुत्वा समागताः धनुर्धराः अधः स्थितान् उद्दिश्य बाणवृष्टिम् अकुर्वन् । यदुराजस्य व्याधभटास्तु वृक्षान्तरिताः सन्तः तेषाम् उपरि शरवर्षम् अकुर्वन् । अधः विद्यमानाः अन्धकारवशात् न दृश्यन्ते स्म । परन्तु दुर्गोपरि स्थिताः सम्यगेव दृष्टिगोचराः भवन्ति स्म । अतः रात्रियुद्धे मारनायक-सैनिकाः एव अधिकसंख्यया मृताः अभवन् ।

अत्रान्तरे यदुराजः खनित्रमुद्गरादिभिः यन्त्रैश्च दुर्गस्य भित्तिं पातयितुं प्रयत्नम् अकरोत् । पातिताभिः शिलाभिः परिखां पूरयितुं प्रायतन्त केचन सैनिकाः । उषःकालात् पूर्वं भित्तौ त्रिचतुराणि रन्ध्राणि निर्मितानि अभवन् । तैः केचन अन्तः प्राविशन् । तन्मध्ये मारनायकः तत्र आगत्य सैन्यपथकं नियोज्य आदिष्टवान् यत् अन्तः प्रविष्टाः सर्वे मारणीयाः इति । परन्तु यदुराजपक्षीयाः अपि तदर्थं सज्जाः एव आसन् ।

उषःकाले तेषां रन्ध्राणां पुरतः एव महत् युद्धं प्रवृत्तम् । यदुराजः यत्र आसीत् तत्र शत्रूणां संख्या अत्यधिका आसीत् । तथापि सः धैर्येण युद्धं कुर्वन् तान् पलायितान् अकरोत् । तावता नञ्जराजः तु पुरोवर्तिनं शत्रुगणं खण्डशः विच्छिद्य दुर्गं प्रविश्य काहलघोषं कारितवान् । तत् श्रुत्वा प्राप्तप्रोत्साहाः राजपक्षीयाः तम् अनुसरन्तः दुर्गस्य अन्तः प्राविशन् ।

अत्रान्तरे यदुराजः इतस्ततः पश्यन् नञ्जराजस्य समीपमेव आगतवान् । ततः कञ्चित् कालं यावत् तुमुलयुद्धं प्रवृत्तं, यत्र रक्तनदी एव प्रावहत् । उभयपक्षेऽपि असंख्याः सैनिकाः वीरस्वर्गं प्राप्तवन्तः । तन्मध्ये अश्वारूढः मारनायकः यदुराजं संहर्तुकामः तत्र उपस्थितः अभवत् । तदा भद्रनायकः मध्ये तिष्ठन् तं निरुद्धवान् । परन्तु पश्चिमे वयसि वर्तमानः भद्रनायकः मारनायकस्य पुरतः अधिककालं स्थातुं न शक्तवान् । यावत् सः यदुराजस्य साहाय्यार्थं गतवान् तावता एव मारनायकः निशितेन खड्गेन तस्य वृद्धवीरस्य भद्रनायकस्य शिरश्छेदं कृतवान् ।

"अहो दुष्ट ! किम् अकार्यं कृतं त्वया... !" इति वदन् यदुराजः चपलतया खड्गं सञ्चालयन् गृहीतखड्गमेव मारनायकस्य हस्तम् अच्छिनत् । छिन्नहस्तः सः यावत् भूमौ निपतितः तावता एव खड्गस्य अन्येन प्रहारेण दुष्टस्य मारनायकस्य शिरः अपि अकर्तयत् यदुराजः ।

मारनायकस्य मरणवार्तां श्रुत्वा शत्रुसैनिकाः दिशम् अजानन्तः पलायनम् अकुर्वन् । केचन शस्त्रसंन्यासं कृत्वा यदुराजं शरणं गताः । तदा राजपक्षीयाणां सिंहनादेन समग्रमपि मैसूरुनगरं प्रतिध्वनितम् अभवत् । विजयिनः सैनिकाः चामराजनामाङ्कितं ध्वजम् अग्रे कृत्वा महतीं शोभायात्राम् आयोजितवन्तः । ततः तं ध्वजं राजभवनस्य उन्नते स्थाने प्रतिष्ठापितवन्तः । पुरप्रमुखाः सेनापतयश्च राजभवनं प्रविश्य सिंहासनस्य समीपं गतवन्तः । यदुराजस्य हस्ते विद्यमानं खडं सिंहासनस्य उपरि स्थापयित्वा सर्वे प्रणामपुरस्सरं पूजां कृतवन्तः ।

श्याम-अय्यङ्गार्यः सर्वान् उद्दिश्य उक्तवान् - ''अद्य आरभ्य मैसूरुराज्यस्य आधिपत्यं भवति तत्रभवत्याः महाराज्ञ्याः । अस्य विजयस्य कारणीभूताः वीराः सेनापतयश्च अधुना श्रान्ताः सन्ति । सर्वे विश्राम्यन्तु । श्वः प्रातः सभा भविष्यति । सर्वैः आगम्यताम्'' इति ।

परेद्यवि सोऽपि शुभमुहूर्तः सन्निहितः । सभामन्दिरम् अतिरमणीयतया अलङ्कृतम् आसीत् । तस्य पुरोभागे सिंहासनं शोभमानम् आसीत् । तस्य पार्श्वद्वयेऽपि शुभ्रैः आच्छादकैः उपेताः शताधिकाः तल्पाः, तदुपरि कौशेयवस्त्रावृतानि उपधानानि च आसन् । सर्वेऽपि सिंहासनस्थं खडं प्रणम्य क्रमशः उपविष्टवन्तः । किञ्चित्कालानन्तरं तत्र प्रविष्टः कञ्चुकी महाराज्ञ्याः आगमनवार्तां निवेदितवान् । सर्वे गौरवभावेन उदतिष्ठन् ।

शुभ्रवसनधारिणी महाराज्ञी समागता । श्वेतं चित्रितं च राङ्कवमपि सा धृतवती आसीत् । पीताम्बरं धृतवती रत्नाभरणैः अलङ्कृता देवकीदेवी साक्षात् श्रीदेवी इव मातरम् अनुगच्छन्ती समागता । तयोः आसनग्रहणानन्तरं सर्वेऽपि स्वीयेषु आसनेषु उपविष्टवन्तः ।

ततः नञ्जराजः उत्थाय - ''महादेवि ! वीराग्रेसराः ! प्रियाः प्रजाजनाश्च । भगवत्याः चामुण्डेश्वर्याः अनुग्रहेण सुदिनम् एतत् दृष्टम् अस्माभिः । वयं जानीमः यत् एतदर्थम् अमात्यवर्येण राजभक्तश्रेष्ठेन वासुदेवय्येन, कुबेरकल्पेन श्रीशैलश्रेष्ठिना च गृहादिसर्वस्वमपि परित्यज्य महता परिश्रमेण कार्यं कृतम् इति । अयं च नरशार्दूलः यदुमहाराजः अस्मदपेक्षयापि अधिकं परिश्रम्य विजयप्राप्तेः कारणीभूतः अस्ति । चतरयुद्धे तेनैव अधिकं परिश्रान्तम् । परह्यस्तने रात्रियुद्धे दुर्गभञ्जनं कृत्वा मारनायकस्य सैन्यमपि अनेनैव विनाशितम् । कार्त्तिकेयसदृशः पराक्रमी अयं महाशयः यदि प्राप्तः न स्यात्, तर्हि दुष्टस्य मारनायकस्य निग्रहणं नैव शक्यम् आसीत् । अतः एवमपि वक्तुं शक्यं यत् राज्यमिदं पुनः तेनैव प्रतिष्ठापितम् इति । एतस्य महानुभावस्य विषये मया कथनीयम् अन्यदपि किञ्चिदस्ति । यदा

अस्माभिः कार्यमिदम् आरब्धं तदा एव कदाचित् स्वप्ने दृष्टः भगवान् नञ्जुण्डेश्वरः माम् अवदत् - 'नञ्जराज ! श्रावणपूर्णिमायां चामुण्डेश्वरी-सन्निधाने यदुराजं द्रक्ष्यसि । तस्य साहाय्यं स्वीक्रियताम् । सः मारनायकं पराजित्य मैसूरुनगरं पूर्वस्थितिं प्रापयिष्यति । सः एव सिंहासने अभिषिच्यताम् । तद्वंशीयाः चिरकालं मैसूरुराज्यं न्याय्येन मार्गेण परिपालयिष्यन्ति' इति । पूर्वमपि मया स्वप्ने यद् दृष्टं तत् सत्यमेव जातम् । एतदपि तथैव भविष्यति इति मम पूर्णः विश्वासः अस्ति । इतःपरं महादेवी अन्ये ज्येष्ठाश्च प्रमाणम्'' इति ।

तत्पश्चात् अमात्यः श्याम-अय्यङ्गार्यः उत्थाय अवदत् - ''नञ्जराजस्य आशयः एव अस्माकमपि आशयः । यदुराजस्य पराक्रमः सर्वविश्रुतः । तस्य विलक्षणा बुद्धिमत्ता, सौजन्यं, निर्मलम् आचरणं च अवर्णनीयानि । एतादृशः गुणनिधिः अयं महाभागः साक्षात् यदुवंशसम्भूतः एव अस्ति । अहं महादेवीं निवेदयामि यत् अयमेव अस्माकं महाराजः इति अङ्गीक्रियताम्, अस्मै राजचिह्नानि च समर्प्यन्ताम् इति । अन्यदपि किञ्चित् निवेदयितुकामः अस्मि । सर्वेषाम् अस्माकम् अभिप्रायः अस्ति यत् राजकुमार्याः देवकीदेव्याः अनुरूपः वरः यदुराजः एव । तथापि यथा इच्छा तथा अनुष्ठातुम् अर्हति महादेवी । वयं तत्र सहमताः एव'' इति ।

महाराज्ञी सोल्लासं स्मयमाना भाषितुम् उदतिष्ठत् । ''अयि भोः नागरिकाः ! यदुराजेन अस्माकं राज्यं यत् उपकृतं तत् कथमपि निर्यातयितुम् अशक्यम् । भवन्तः सर्वे निवेदयन्ति यत् तस्मै उदारचरिताय मैसूरुराज्याधिपत्यं दातव्यम् इति । तत् निवेदनं मया ससन्तोषम् अङ्गीक्रियते । एतदपि वयं जानीमः यत् देवकीदेवी यदुराजश्च परस्परम् अनुरक्तौ इति । तयोः परिणयः भवतु इति वयमपि इच्छामः । यदुराजकुमार ! अत्र आगम्यताम् । एतानि राजचिह्नानि स्वीक्रियन्ताम् । अस्याः देवकीदेव्याः पाणिग्रहणं च क्रियताम्'' इति अवदत् सा ।

महाराज्ञ्याः कथनस्य अनन्तरं सर्वेऽपि 'विजयतां यदुमहाराजः !' इति जयघोषम् अकुर्वन् । मङ्गलवाद्येभ्यः पटहेभ्यः काहलेभ्यश्च निस्सृतः निनादः सैनिकानां जयघोषेण सम्मिलन् नभोमण्डलं भित्त्वा उपरि अगच्छत्, यदुराजस्य पट्टाभिषेकवार्तां सुरलोकं प्रापयितुम् ।

## 2 पाठः

# पादत्राणे

**इटालियामूलम्- ग्रेत्सिया देलेद्दा**

एषु दिनेषु अधिवक्ता एलिया कारायः तदा तदा कार्यरहितः भवति स्म । यतः कष्टकालः एषः । जनाः अपि स्वीयं विवादं न्यायालयं नेतुं नोत्सहन्ते । अतः सुप्रसिद्धाः अधिवक्तारः अपि सामान्याः न्यायवादिनः इव कार्यं कुर्वन्ति । परन्तु कार्याभावेऽपि एलिया कारायः प्रतिदिनं न्यायालयं गच्छति एव । तत्र उपविश्य स्वपत्न्याः प्रशंसापरकाणि पद्यानि लिखति स्म सः, तदेव स्वस्य कार्यम् इति मन्यमानः । न्यायालयपरिसरः सर्वदापि कोलाहलपूर्णः भवति स्म । व्यवहारार्थम् आगताः निर्धनाः, महिलाः, साक्ष्यं निरूपयितुम् आगताः वञ्चकाः, अधिवक्तारः इत्यादिभिः पूर्णे तादृशेऽपि स्थाने सः निर्लिप्ततया उपविश्य प्राचीनया एव शैल्या पद्यानि विलिख्य तानि स्वपत्न्यै उपहारीकरोति स्म । तादृशस्य कस्यचित् पद्यस्य भावः एवम् आसीत् -

एतत् जगत् अहं सम्यक् जानामि । अत्र भवितव्यं भवत्येव । अत्र प्रवृत्तं किमपि दृष्ट्वापि अहं विस्मितः न भवामि । यतः अहमस्मि कश्चन कविः, दार्शनिकः । जीवनमिदं दोलायते । कदाचित् उपरि, पुनः कदाचित् अधः तस्य स्थितिः । हे मम स्वर्णकमलिनि ! ममापि सुदिनानि सन्निहितानि भवन्ति । मम मातुलेन अगोस्तीनेन स्वपत्न्याः विवाहविच्छेदः कृतः अस्ति । तदीयायां सम्पदि वराटिकामपि सा न प्राप्नोति । कदाचित् मातुलः मां स्मरेत् ! ममापि साहाय्यं कुर्यात् । तदा आवां नवोढौ दम्पती इव सुखेन जीवनं करिष्यावः... ।

* * * *

शीतकालस्य कस्मिंश्चित् प्रभाते कश्चन शाकटिकः शयानस्य एलिया कारायस्य भुजे आस्फालनम् अकरोत् । शिलया घट्टितः इव अकम्पत एलिया कारायः ।

''उत्तिष्ठतु । झटिति प्रस्थानं करोतु । ग्रामं गतः अहं ततः अधुनैव प्रतिनिवर्तमानः अस्मि । तत्र भवतः मातुलः अगोस्तीनः मिलितः आसीत् । वराकः सः नितराम् अस्वस्थः अस्ति....।''

एलिया क्षणं यावत् मौनेन अतिष्ठत् । अतीव वेदनया इव स्वहस्तेन केशान् अस्पृशत् ।

''अधुनैव मम पत्नी सूचनीया एतद्विषये..।''

परन्तु वार्ताम् इमां श्रुतवत्याः तस्य पत्न्याः न कोऽपि आघातः जातः । गृहदेहल्याम् उपविश्य आतपस्नाने मग्ना सा ततः न उत्थितवती अपि । सुष्ठु अलङ्कृता ललना सा । पादयोः पादत्राणे, आधुनिकः केशविन्यासः । परन्तु धृतः पुरातनः निचोलः तस्याः दरिद्रतां सूचयति स्म ।

एलिया काराय: तस्या: शिर: आमृद्नन् अवदत् - ‘‘जानाति किम् इदानीं  किं करोमि इति ? तत्र गत्वा आगच्छामि... ।’’

‘‘कुत्र... ?’’

‘‘कुत्र इति ? तस्य वचनं न श्रुतं किम् ? मातुलम् अगोस्तीनं द्रष्टुं ग्रामं गच्छामि । अद्य वातावरणम् अपि हितकरम् अस्ति ।’’

यद्यपि तस्य मनसि वक्तव्या: अन्येऽपि विषया: आसन् तथापि स: सर्वं न अवदत् । परन्तु तया तत्सर्वमपि ऊहितमेव । तत: नितरां क्षुण्णे छिद्रत्वं प्राप्ते पत्यु: पादत्राणे पश्यन्ती सा उक्तवती - ‘‘तत्र गमनाय धनं नापेक्षितं किम् ?’’ इति ।

‘‘धनं पर्याप्तमात्रेण अस्ति मम सविधे । वृथा मा चिन्तयतु भवती । अस्मिन् जगति अन्ते वा सर्वं सुष्ठु भविष्यित एव । तावत्पर्यन्तं सोढव्यं.... तावदेव । अद्य एतदेव चिन्तयन् आसम् । पश्यतु, मया किं लिखितमिति....’’ इति वदन् स: स्वीयपुस्तकात् एकं पृष्ठं निष्कास्य तस्या: ऊर्वो: उपरि पातितवान् । स्वस्य ग्रामात् प्रतिनिवर्तनपर्यन्तं तदेव तस्या: सर्वस्वम् ।

* * * *

एलिया काराय: पादाभ्यामेव गमनाय उद्युक्त: । यत: तत्सकाशे ‘लैर्’त्रयमितमेव धनम् आसीत् । तेन वाहनप्रयाणं नैव शक्यम् आसीत् । अन्यस्मात् ऋणरूपेण धनं प्राप्तुमपि समय: न आसीत् ।

पादाभ्यां गमनस्य रूढि: आसीत् तस्य । अत: स: विनायासं चलितवान् । तस्य एका एव चिन्ता आसीत्, स्वस्य छिन्नयो: पादत्राणयो: विषये ।

‘ओरोसेयि’ग्रामपर्यन्तं स: सुखेनैव अगच्छत् । परन्तु तत्र प्राप्तिसमये एव अन्धकार: जात: । तत: षड् घण्टा: यावत् यदि निरन्तरं चलति तर्हि तेन गन्तव्य: ग्राम: प्राप्यते । परन्तु सर्वत्र गाढान्धकार: । शैत्यमपि क्रमश: वर्धमानम् आसीत् । हिमपात: अपि आरब्ध: । पादत्राणयो: छिद्रत: अन्त: प्रविशत् हिमं तस्य पादौ आर्द्रौ अकरोत् । छिद्रसहिते पादत्राणे धृत्वा चलनं महते क्लेशाय । तत् न शोभते अपि । परन्तु अधुना तस्य समीकरणमपि नैव शक्यम् आसीत् । अन्ये क्रेतुं तु स: सर्वथा असमर्थ: आसीत्, धनाभावात् । ‘मातुलस्य पुरत: भिक्षुक: इव छिन्ने पादत्राणे धत्वा कथमहं तिष्ठानि ....? भाविनं लाभं मनसि निधाय स्वपत्न्या: गौरवरक्षणाय वा मया नूतनं पादत्राणयुगलं सम्पादनीयमेव....! परन्तु कथम्....?’ तस्य मनसि किमपि न अस्फुरत् ।

ग्राम: नीरव: आसीत् । कुत्रापि जनसञ्चार: न आसीत् । चतुष्पथस्य समीपस्थे कस्मिंश्चित् वसतिगृहे मन्दं दीपप्रकाशं दृष्ट्वा एलिया काराय: अन्त: प्रविश्य रात्रिनिवासनिमित्तं स्थलं प्रार्थितवान् । अग्रिमधनदानानन्तरं तेन अवकरादिभि: पूर्णे प्रकोष्ठे प्रसारिता एका शय्या प्राप्ता । प्रकोष्ठे इत:पूर्वमेव द्वौ शयानौ आस्ताम् । तयो: अन्यतर: घोरिकाशब्दं करोति स्म । एलिया वस्त्रपरिवर्तनम् अपि अकृत्वा

शय्यायाः उपरि निपतितः । बहुकालं यावत् तेन निद्रा न प्राप्ता । निमीलिताभ्याम् अपि नेत्राभ्यां सः जगत् एव पश्यति । जगतः सर्वेषु मार्गेषु, गृहेषु, अन्यस्थलेषु च पादत्राणानि एव दृश्यन्ते ! यत्र यत्र जनाः सन्ति तत्र सर्वत्र पादत्राणानि एव पादत्राणनि ! कानिचन पादत्राणानि निधानिकासु कपाटिकासु च दृश्यन्ते । पुनः कानिचन स्वस्वामिनां शय्यायाः अधोभागे उपविश्य तान् रक्षन्ति ! अन्यानि कानिचन प्रकोष्ठात् बहिः तिष्ठन्ति । तेषु कानिचन पादत्राणानि स्वीये पादत्राणे इव निर्धनताप्रदर्शकानि ।

बहिः वायुगर्जनम् । अन्तः घोरिकाशब्दः । अतः बहुकालपर्यन्तं सः निद्रां नैव प्राप्तवान् । तस्य मनसि बहवः विचाराः । 'अनपत्यः मातुलः अगोस्तीनः यदि स्वीयां सर्वामपि सम्पत्तिं स्वस्य नाम्ना लिखति तर्हि आवां सुखेन जीवनं कर्तुं शक्नुवः... ।'

तदा एव तस्य मनसि विनूतनः कश्चन विचारः स्फुरितः । सः पार्श्वे शयानस्य महान्तं घोरिकाशब्दं कुर्वतः जनस्य पादत्राणे स्वीकर्तुम् उद्युक्तः अभवत् । सुदृढे पादत्राणे ते । तयोः अधोभागे कीलितानाम् आणीनां स्पर्शेन तस्य अङ्गुल्यः शैत्यम् अन्वभवन् । ते तत्रैव स्थापयित्वा तत्पार्श्वे शयानस्य अन्यस्यापि पादत्राणे अन्वेष्टुं सः इष्टवान् । परन्तु अन्धकारे ते न लब्धे ।

तदा बहिः कस्यचन पादध्वनिः श्रुतः इव । एलिया भीतः अभवत् । 'हन्त ! कीदृशी दुःस्थितिः मम' इति अभासत तस्य । शनैः द्वारसमीपं गत्वा दृष्टवान् सः । परन्तु तत्र न कोऽपि दृष्टिपथम् आगतः । मन्दप्रकाशे भित्तिम् आलम्ब्य उपविष्टः कश्चन मार्जालः दृष्टः । तस्य पार्श्वे दृश्यते सुन्दरं पादत्राणयुगलम् !

एलिया काराय: झटिति ते पादत्राणे उन्नीय स्वीयवस्त्रमध्ये निगूहितवान् । ततः निश्शब्दतया वसतिगृहात् बहिः आगतवान् । शीघ्रं शीघ्रं चलन् समुद्रतीरं प्राप्तवान् । तत्पार्श्वस्थेन मार्गेण वेगेन चलितवान् च । अर्धघण्टां यावत् चलनानन्तरं सः सकृत् स्थितवान् । इदानीम् उषःकालः सन्निहितः आसीत् । सः चोरिते ते पादत्राणे धर्तुम् इष्टवान् । अतः एकत्र उपविश्य स्वीये पादत्राणे निष्कास्य तत्स्थाने चोरिते ते पादत्राणे धृतवान् । आनन्देन तस्य मुखं विकसितम् अभवत् । अतीव मृदुनी विशाले च पादत्राणे ते । ते एव पश्यतः तस्य मनसि स्वस्य दुरवस्थां स्मृत्वा दुःखमपि जातम् ।

'यदि कश्चित् माम् अनुसृत्य आगतवान् स्यात् तर्हि मम अकार्यं तेन ज्ञायते एव... । वार्ताम् एतां श्रुत्वा पत्नी किं वदेत् .....?' 'यदि चौर्यमेव करोति तर्हि मिलियन्लैर्मितं धनं कुतः न चोरितम् । किम् अनेन क्षुद्रेण पादत्राणयुगलेन.... ?' इति वा.... ?'

'मिलियन्लैर्मितं धनम् ! कुत्र लभ्यते तावत् धनम् ! यदि लभ्येत अवश्यं चोरयामि एव...' इति सः अचिन्तयत् । पादत्राणयोः अन्तः स्थिताः तस्य अङ्गुलयः अधुना नितरां वेदनाम् अनुभवन्ति स्म । पादयोः अपि महती वेदना ।

तथापि सः किञ्चिद्दूरं तथैव अग्रे चलितवान् । इदानीं तु तस्य स्वीये पादत्राणे कक्षे वस्त्रग्रन्थौ आस्ताम् । घण्टां यावत् कथमपि चलितवान् । पादयोः वेदना द्विगुणिता जाता । तन्मध्ये असह्या पापप्रज्ञा । दूरे

कस्यचित् पादध्वनिः श्रुतः इव  सः प्रतिक्षणं भीत्या कम्पते स्म । प्रकाशमानः सूर्यः अपि तं भाययति स्म इव ।

'त्वरया धावन्तं मां केऽपि दृष्टवन्तः स्युः । तैः मम कक्षस्था वस्त्रग्रन्थिः अपि दृष्टा स्यादेव । वसतिगृहे पादत्राणचौर्यस्य वार्ता यदा सर्वैः ज्ञायते तदा ये केऽपि तथा पलायनं कृतवन्तं मां स्मरेयुः एव । तदा बहवः जनाः लगुडधराः माम् अन्विष्यन्तः अत्र आगच्छेयुः अपि ! हन्त ! किं करोमि इदानीम्... ?'

पुनरपि घण्टां यावत् अग्रे तथैव चलितवान् सः । तस्मात् ग्रामात् सः इदानीं सुदूरम् आगतः आसीत् । मातुलग्रामं प्राप्तुम् इतोऽपि द्वित्राः घण्टाः यावत् वा चलनीयम् । परन्तु पादवेदनया सः इदानीं पूर्ववत् चलितुं न शक्नोति । प्रतिपदं वेदनाम् अनुभवति । तन्मध्ये पापप्रज्ञा । 'लगुडधराः अनेके माम् अनुसरन्तः सन्ति । कथं न दण्डयेयुः ते माम्... !'

अन्ततो गत्वा सः कमपि निर्णयम् अकरोत् । धृते ते चोरिते पादत्राणे निष्कास्य मार्गपार्श्वे स्थापितवान् । वस्त्रग्रन्थितः स्वीये पादत्राणे निष्कास्य ते एव धृतवान् । इदानीं निश्चिन्तता प्राप्ता इव । ततः अग्रे चलितवान् ।

ऊहूँ... ! तथापि निश्चिन्तता नैव प्राप्ता । 'अनुसृत्य आगच्छन्तः जनाः मार्गपार्श्वे ते पादत्राणे दृष्ट्वा किं चिन्तयेयुः । नष्टे पादत्राणे प्राप्ते चेदपि मां चोरं मन्यन्ते एव । अवश्यं दण्डयन्ति च माम् । तेषां ताडनानि प्राप्य वा मया सत्यं वक्तव्यमेव भवेत् । तदा का कथा मम गौरवस्य । मम पत्नी किं वा चिन्तयेत् ... !'

'अहो भ्रान्तिः... ! मया गृहतः नैव प्रस्थातव्यम् आसीत् । तत्रापि दुराशया तयोः पादत्राणयोः चौर्यं तु सर्वथा न करणीयम् आसीत् । वृथा मनश्शान्तिः नष्टा । मन्ये, मातुलस्य सम्पत्तिः अपि न तथा सुखेन लभ्येत । कियन्तः विधिविषयकाः क्लेशाः सन्ति वा तत्र... ! तन्मध्ये अनेन व्यवहारेण मम गौरवमपि विनष्टम्... !'

एतावता सः घण्टां यावत् चलित्वा अग्रे आगतवान् आसीत् । इतः प्रायः घण्टाद्वयं यावत् चलितं चेत् मातुलग्रामः प्राप्यते ।

परन्तु तस्य मनः पुनः दोलायमानम् अभवत् । 'मया तु मूर्खेण इव ते पादत्राणे मार्गपार्श्वे स्थापिते । ते सुदूरं क्षेपणीये वा आस्ताम् । परन्तु तथापि, अन्ये केऽपि न ज्ञास्यन्ति चेदपि मया चौर्यं तु कृतं कृतमेव ननु ! तत्र तु किमपि परिवर्तनं न भवति !'

ततः सः परिवृत्य शनैः शनैः चलन् सार्धैकघण्टायाः अनन्तरं तत् स्थानं प्राप्तवान्  यत्र पादत्राणयुगलं स्थापितम् आसीत् । अधुनापि तत् तत्रैव, तथैव आसीत् । सः तत् स्वीकृत्य वस्त्रग्रन्थौ संस्थाप्य ग्रन्थिं च कक्षे निधाय पुनरपि तमेव ग्रामं प्रति प्रस्थितवान् यत्र तेन रात्रिः यापिता आसीत् । चतुर्विंशतिघण्टाभ्यः तेन किमपि न खादितम् आसीत् । शरीरे ईषदपि शक्तिः न आसीत् । अतः इदानीं तु सः एकैकं पदमपि कष्टेन एव निदधाति । तस्य वेगः आसीत् कूर्मस्य इव अत्यल्पः ।

यदा एलिया काराय: तं ग्रामं प्राप्नो ेत् तदा रात्रि: आसीत् । स: तदेव वसतिगृहं प्रविष्टवान् । तत्रत्याय तस्मै पादत्राणस्वामिने पादत्राणे समर्प्य 'स्वीयम् अपराधं क्षाम्यतु' इति सम्प्रार्थ्य अन्यत् चिन्तनं करणीयम् ।' परन्तु वसतिगृहे न कोऽपि तं किमपि अपृच्छत् । पादत्राणे चोरिते इति वार्तापि कस्यापि मुखत: न श्रुता । स: भोजनं कृत्वा शयनाय स्थलं प्रार्थितवान् । पुनरपि तेन स एव प्रकोष्ठ: प्राप्त: । सा एव शय्या अपि ! स: प्रथमं पादत्राणे तत्रैव स्थापितवान् यस्मात् गतदिने ते तेन नीते । तत: स: तस्यां शय्यायां न्यपतत् च । तत: गाढं निद्रित: च ।

* * * *

परेद्यवि विलम्बेन एव स: जागरित: अभवत् । झटिति मुखं प्रक्षाल्य कोशस्थेन एकेन एव नाणकेन सुपिष्टकं क्रीत्वा खादित्वा तत: प्रस्थित: च ।

अद्य तु स: उत्साहेन एव चलितवान् । तदेव जगत् अद्य मोहकं प्रशान्तं सुन्दरं च दृश्यते तेन ! छिन्ने पादत्राणे धृत्वा अपि स: अद्य सुखेन एव अचलत् । मार्गे केऽपि ग्रामीणा: तस्मै अल्पाहारमपि दत्तवन्त: । पञ्चषघण्टा: यावत् चलित्वा स: यदा मातुलग्रामं प्राप्तवान् तदा एव तेन ज्ञातं यत् तत: द्वित्रघण्टाभ्य: पूर्वं स: मातुल: दिवङ्गत: आसीत् । तस्य गृहस्य कर्मकरी तं संशयेन एव अपश्यत् । पृष्टवती च - ''भवान् वास्तविकरूपेण अगोस्तीनोवर्यस्य भागिनेय: वा ? एवं चेत् वार्तां प्राप्य अपि कथं शीघ्रं न आगतवान् भवान्...?''

एलिया काराय: किमपि प्रतिवचनं नावदत् । ''वराक: स: भवन्तमेव प्रतीक्षते स्म । भवते तन्त्रीवार्ता अपि प्रेषिता आसीत् तेन । स: वदति स्म यत् भवान् एक: एव तस्य बन्धु: इति । परन्तु भवान् तं सर्वथा विस्मृतवान् एव । एवं खलु ? अद्य प्रात: अपि भवत: अनागमनं ज्ञात्वा स: नितरां खिन्न: सन् 'स्वीया समग्रा अपि सम्पत्ति: अत्रत्येभ्य: निर्धनेभ्य: नाविकबालेभ्य: वितरणीय:' इति मृत्युपत्रं लिखितवान् वराक:....!''

* * * *

एलिया काराय: स्वग्रामं प्रतिनिवृत्त: । तस्य पत्नी यथापूर्वं निश्चिन्तततया तस्यामेव देहल्याम् उपविश्य आतपस्नाने मग्ना आसीत् ।

''प्रिये ! यदा सा तन्त्रीवार्ता प्राप्ता तदा भवत्या कुतो वा प्रतिवार्ता न प्रेषिता यत् मया तत्रैव प्रस्थितम् अस्ति इति .... ?''

''तावता भवता तत्र प्राप्तव्यम् आसीत् खलु ? कुतो विलम्ब: जात: ? प्रत्यागमने कथम् एतावान् विलम्ब:... ?''

एलिया काराय: किमपि नावदत् !

3 पाठः

# मर्त्यलोकच्छाया

देवेन्द्रः नितरां कुपितः आसीत् । तस्य पुरतः स्थितः आसीत् दीनवदनः कश्चन गन्धर्वः । देवेन्द्रस्य गर्जनध्वनिं कथमपि सम्मुखीकुर्वन् इव आसीत् गन्धर्वस्य करुणापूर्णः ध्वनिः ।

''प्रभो ! अहं चिन्तयामि यत् नाहम् एतादृशस्य दण्डनस्य पात्रम्'' - बद्धाञ्जलिः सन् गन्धर्वः धैर्येण उक्तवान् ।

''तन्नाम....?'' मेघस्तनितमिव अश्रूयत देवेन्द्रस्य कण्ठध्वनिः ।

''मया कृतस्य कस्य अपराधस्य कृते एतादृशं दण्डनम् ...?''

''अस्मदीये लोके तिष्ठता भवता अत्रत्याः नियमाः उल्लङ्घिताः यत् तदर्थम् ।''

''कः नियमः मया उल्लङ्घितः प्रभो !''

''परस्त्रियः कटाक्षेणापि न द्रष्टव्याः इत्येषः... ।''

क्षणं यावत् सभायां मौनं व्याप्तम् आसीत् ।

‘‘तन्नाम, अस्य अयम् अर्थः किं यत् अस्मदीये लोके करुणायाः स्थानमेव नास्ति प्रभो ?’’ - धैर्येण पृष्टवान् गन्धर्वः ।

‘‘केन उक्तं तथा...?’’ - देवेन्द्रः उक्तवान् ।

‘‘तर्हि देव, कृपया मम वचनानि श्रूयन्ताम् । तस्मिन् दिने, तस्यां सन्ध्यायाम् एषः लोकः एव शोकरसे निमग्नः आसीत् । वने स्थिताः मल्लिकालताः शोकभारेण असहायाः सत्यः भुवम् अवनताः अमृतशिलामण्डपम् आवृतवत्यः आसन् । श्वेताम्बरी सा युवतिः तस्मिन् हरिद्वर्णे मण्डपे श्वेते शिलातले उपविष्टा आसीत् । स्रस्तकेशपाशा सा अश्रूणि मुञ्चति स्म । सा च अश्रुधारा न केवलं मम हृदयम्, अपि तु जगदेव विद्रावयितुक्षमा आसीत् । यथा यथा सन्ध्यारुणिमा प्रवृद्धा तथा तथा प्रवृद्धः तस्याः शोकः अपि । करुणापूर्णं मम हृदयं मां तत्समीपम् अगमयत् । कम्पमानौ मम हस्तौ तस्याः हस्तौ अस्पृशताम् । कम्पमानेन स्वरेण मया तस्याः सान्त्वनमपि कृतम्....।’’

साट्टहासम् अहसत् देवसभा । ततश्च उच्चैः अवदत् देवेन्द्रः - ‘‘अहो मूढ ! सा सुन्दरी, तस्याः दुःखम् - सर्वापि माया... । भवतः सत्त्वपरीक्षायै कल्पितं क्रीडामात्रम्.... । तत्र पराजितः भवान्... ।’’

क्षणेनैव देवलोकः अदृश्यतां गतः । शापरूपेण दशवर्षभोग्यं मर्त्यलोकवासं प्राप्य भुवम् अवतीर्णवान् सः गन्धर्वः ।

## - 1 -

सुदीर्घस्य ध्यानस्य अनन्तरं नेत्रे उन्मील्य पुरतः दृष्टवान् सः तपस्वी । तस्य मनसि संशयः उत्पन्नः यत् मया ध्यानार्थम् उपविष्टं स्थानम् एतदेव उत न । परितः सर्वत्र इदमिदानीं मार्जनं कृत्वा जलसेचनं कृतमिव शोभते स्म । पुरतः दृष्टे कुण्डे आरोपितायाः मल्लिकायाः सुगन्धः मनसः मुदं जनयति स्म । आश्चर्येण सः मुखं परिवर्त्य अपश्यत् । तत्र समीपे एव स्वच्छायां शिलायां प्रसारितं मृदु कृष्णाजिनम्, तदुपरि व्यवस्थापितानि पत्रपुष्पाणि, पूजासाधनानि च.. ।

‘का एषा माया... ।’ इति यावत् सः निःश्वसितवान् तावत् अल्पवयस्का काचित् बालिका निःशब्दं चलन्ती पुरतः आगता ।

तपस्वी पुनः नेत्रे निमीलितवान् । बहुकालानन्तरं यदा सः नेत्रे उन्मीलितवान् तदा सा बालिका न दृष्टा । पुरतः कदलीपर्णे निक्षिप्तानि सद्यःक्षालितानि पक्वानि फलानि दृष्टानि ।

बहूनि दिनानि अतीतानि । तपस्विनः ध्यानं बालिकायाश्च सेवा च तथैव अनुवृत्ते ।

एकस्मिन् दिने प्रतिदिनमिव तपस्विनः पुरतः फलानि संस्थाप्य, तं प्रदक्षिणीकृत्य साञ्जलिबन्धं स्थितवती सा बालिका । तपस्वी नेत्रे उन्मीलितवान् । परं तद्दिने प्रतिदिनमिव तस्य नेत्रे शीघ्रं पुनः न निमीलिते । मूर्तिमती सरलता इव स्थितां तां बालिकाम् अपश्यताम् । बालिकायाः दृष्टिः अपि तस्य तपस्विनः मुखे एव लग्ना ।

''का भवती ?'' - करुणापूर्णान्तरङ्गस्यापि तपस्विनः वचसि काठिन्यम् अपि आसीत् ।
''अहं छाया...'' - एतावदेव उक्त्वा सा बालिका पुनरपि तमेव दृष्टवती । तपस्वी नेत्रे निमीलितवान् । बालिका च ततः निर्गता ।

—2 -

अतीतानि पुनः कानिचन दिनानि । एकदा ध्यानं समाप्य नेत्रे उन्मीलितवतः तपस्विनः पुरतः दृष्टा साञ्जलिबन्धं स्थिता छाया । तपस्वी प्रीत्या ताम् उक्तवान् - ''वत्से ! उपविशतु ।''
तमेव पश्यन्ती उपविष्टा छाया ।
''वत्से ! एतत्सर्वं मम निमित्तं कुतो वा करोति भवती ?'' - कुतूहलेन पृष्टवान् सः ।
तस्याः मुखे सदा विराजमाना सरलता क्षणम् अदृश्या जाता । पुनरपि सा प्रत्यागता च ।
''वत्से ! मम निमित्तं कुतः एवं परितपति भवती ?''
छाया किमपि उत्तरम् अयच्छन्ती तूष्णीं शिरः इतस्ततः चालितवती ।
''का भवती ?'' - तपस्वी पुनः अपृच्छत् ।
इदानीं तु छाया मुखम् उद्घाटितवती - ''अहं बहुकालतः अस्मिन् आश्रमे वसामि । अत्र आगत्य ध्यानं तपः वा कुर्वतां महात्मनां सेवां करोमि । तत् मम न कष्टदायकम् । प्रत्युत तेन अतीव आनन्दम् अनुभवामि; भवतः सेवा मम महते सन्तोषाय । आम्, तत् मम प्रियतमं कार्यम् ....'' एतावदुक्त्वा सा ततः निर्गता ।
वर्षाणि अतीतानि । एतेषु वर्षेषु छायायाः सम्भाषणं तु अतीव विरलमेव आसीत् । परं तस्य तपस्विनः सान्निध्ये विशिष्टं किञ्चित् सुखम् अनुभवति स्म सा । अव्यक्ते आनन्दे लीना आसीत् सा ।

- 3 -

''छाये.., मा गच्छतु, अत्र उपविशतु'' - तपस्वी एकदा ताम् अवदत् । तावता दश वर्षाणि अतीतानि आसन् ।
तस्य पदतले उपविश्य छाया शिरः उन्नमय्य तमेव दृष्टवती ।
''अहं भवतीं काञ्चित् कथां श्रावयामि । शृणोतु तावत्.... ।'' तपस्वी उक्तवान् - ''अहं कश्चन गन्धर्वः । दशभ्यः वर्षेभ्यः पूर्वम् इन्द्रलोके आसम् । तत्र मया कोऽपि अपराधः कृतः इति कृत्वा मां भूलोकं गमितवन्तः । अत्र तपः आचरता मया दश वर्षाणि यापितानि । शापावधिः समाप्तः इदानीम् ।''
तपस्वी मौनम् आश्रितवान् ।
''ततः....''
''इदानीं मया इन्द्रलोकः गम्यते । मां नेतुम् इन्द्रलोकतः विमानम् आगमिष्यति अत्र....''
तपस्वी पुनरपि मौनम् आश्रितवान् ।

‘‘तर्हि कदा प्रस्थानं भवतः...?’’

‘‘श्वः प्रभाते अरुणोदयकाले विमानम् आगमिष्यति । झटिति प्रस्थानमेव ।’’

हृदये स्थितं भारम् अवतारयन्ती इव दीर्घं निःश्वसितवती छाया ।

तपस्वी तामेव पश्यन् बहुकालम् उपविष्टवान् आसीत् ।

छाया उत्थाय मन्दस्वरेण उक्तवती - ‘‘महात्मन् ! अहं भवतः कृते नूतनं वस्त्रमेकं वयन्ती अस्मि । तद् धृत्वा एव देवलोकं गच्छतु भवान् ।’’

‘‘तथैव अस्तु ।’’

- 4 -

अनन्तरदिने उषसि एव तत्र आगत्य छाया तपस्विने नूतनं वस्त्रं दत्तवती । आत्मना धृतं वस्त्रं निष्कास्य छायया दत्तं वस्त्रं धृत्वा गमनाय सज्जः अभवत् गन्धर्वः । यथासमयम् इन्द्रलोकात् विमानम् आगतम् । विमानस्य चालकः, अन्ये देवदूताश्च आश्रमात् किञ्चिद्दूरे विमानं संस्थाप्य समीपम् आगत्य स्वकीयम् आगमनं निवेद्य विनयेन प्रतीक्षमाणाः स्थितवन्तः ।

भारहृदयः गन्धर्वः छायायाः कुटीरम् अन्विष्यन् प्रस्थितवान् । तस्य मनसि विचारः आसीत् - ‘दश वर्षाणि यावत्, निरन्तरं मम सेवां कुर्वती सा मुग्धा बालिका कथं मदुपरि स्नेहस्य प्रीत्याश्च वृष्टिमेव कृतवती !’

त्रिचतुराणां महावृक्षाणां मध्ये आसीत् छायायाः तद् लघु कुटीरम् । सर्वत्र निश्शब्दता । कुटीरस्य मार्गे स्थितं वृक्षम् अवलम्ब्य गन्धर्वः क्षणं यावत् स्थितवान् । छाया कुत्रापि न दृष्टा । कुटीरस्य समीपं गत्वा, द्वारदेशे स्थित्वा मन्दस्वरेण अहूतवान् गन्धर्वः -

‘‘छाये.....!’’

न किमपि उत्तरम् आगतम् । तद् द्वारं नुदित्वा अन्तः दृष्टिं प्रसारितवान् गन्धर्वः । किञ्चित्पूर्वमेव स्वेन परित्यक्तं जीर्णं वस्त्रं धृतवत्याः छायायाः शरीरं तत्र निपतितम् अस्ति !

छायायाः शरीरं स्वीये अङ्के निधाय सः गन्धर्वः कुटीरे उपविष्टवान् । तं प्रतीक्ष्य प्रतीक्ष्य निराशाः देवदूताः अन्ते निरुपायाः सन्तः तं विनैव स्वर्गं गतवन्तः !

# भीमाम्बेडकरशतकम्

## शान्तिभिक्षुप्रणीतम्

सरस्यां पङ्कजं प्राप्य गुञ्जन्ति भ्रमरा भृशम् ।

जगत्यां सुजनं लब्ध्वा हर्षं तन्वन्ति मानवाः ॥1॥

अभवन् ये पुरा सर्वे ये भविष्यन्त्यनागते ।

भवन्ति साम्प्रतं येऽत्र मानसे ते स्फुरन्तु मे॥2॥

तेषामत्रावतीर्णानां सुजनानां युगे नवे ।

भीमं संस्मर्तुमिच्छामि शताब्द्यां नरपुङ्गवम् ॥3॥

लोके महारशब्दो यो जातिवाचक आदृतः ।

महाराष्ट्राभिधः शब्दः स सिद्धो देशवाचकः ॥4॥

महाराणां गणे तस्मिन् रामजीतनुसंभवः ।

भीमरावोऽभवन् ख्यातः स्वगुणैः पृथिवीतले ॥5॥

तस्मिन् वंशावतंस आसन् ये संजाताः सतां मताः ।

कबीरादिप्रभावैस्ते बभूवुः प्रभविष्णवः ॥6॥

कुर्युस्ते तु न पाषाणपूजां निर्गुणरागिणः ।

पाषाणेषु वरा तेषां गृहेषु ननु चक्रिका ॥7॥

ते गायन्ति महाधीराः कृत्वा मनसि तं प्रभुम् ।

यस्य प्रभावतो हीना भवन्ति क्लेशजालिकाः ॥8॥

पर्वतान् पूजये सर्वान् दिक्षु दिक्षु व्यवस्थितान् ।

यदि पाषाणपूजातः प्रभोर्लाभो भवेत् क्वचित् ॥9॥

यस्याः पिष्टेन कुर्वन्ति चूर्णकेन महाजनाः ।

बलिपूजादिसत्कारं चक्रिकां तां नमाम्यहम् ॥10॥

चक्रिकाया हि माहात्म्यं को न जानाति भूतले।

यस्या हि घर्घरध्वानं प्रातराह्वयति श्रियम् ॥11॥

चलन्त्याश्चक्रिकायाश्चेद् ध्वनिना पूर्यते नभः ।

लक्ष्मीर्भवति संहृष्टा विचरन्ती समन्ततः ॥12॥

एवं विधविचाराणामाचाराणां च सितप्रभा ।

जनान् यान् समभिव्याप्ता तेषु भीमोऽवतीर्णवान् ॥13॥

हर्षितः स्वजनैर्नित्यं मर्षितश्चोद्धते क्षणे ।

शरदां षट्स्वतीतेषु दःखभागभवच्छिशुः ॥14॥

भीमादेवी हि तन्माता रोगाक्रान्ता स्वकर्मणा ।

चिकित्सितापि न स्वास्थ्यं लेभे स्वर्गमुपाश्रिता ॥15॥

पितृनाथः स ववृधे शिक्षाकालेऽनुभूतवान् ।

अन्त्यजत्वान्महापीडामुच्चवर्णापमानितः ॥16॥

प्रवेशस्तस्य शिक्षायाः संस्थानेषु सुदुर्लभः ।

बभूवान्त्यजविख्यातकुलजन्मतया तदा ॥17॥

पित्रा सह गृहे तिष्ठन् क्रिडाकौतुकतत्परः ।

समुद्धतो बभौ यष्टिलोष्ठरश्मिपरायणः ॥18॥

सेवायां राजकीयस्याभवत्सैन्यस्य तत्पिता ।

ततः प्रवेशस्तस्याभूत् तच्छिक्षायतने सुखम् ॥19॥

शिक्षामुखमुपेतोऽसौ सुबहुक्रमवानभूत् ।

स्वाग्रजानन्दरावेण सहचर्यापरोऽचरत् ॥20॥

शताब्द्यां वर्तमानायां भीमः सप्तमवत्सरे ।

मैट्रिकाख्यां समुत्तीर्णः परीक्षां सततश्रमी ॥21॥

उपलब्धिरियं तस्मिन् काले बहुविधार्चिता ।

चर्चिता च महाह्लादपरैः स्वजनबान्धवैः ॥22॥

केलुस्करप्रभृतिभिः समवेतैः शुभैर्जनैः ।

भीमोऽभिनन्दितः प्रीत्या दत्तः प्रोत्साहनाञ्जलिः ॥23॥

भीमस्य संस्तुतिं ज्ञात्वा सर्वभावेन सज्जनः ।

तस्मै समर्पयामास बुद्धजीवनपुस्तकम् ॥24॥

भीमस्य पितरश्चाह शिक्षयैनं सुबालकम् ।

साहाय्यं तव कर्तास्मि यथाशक्ति यथाक्षणम् ॥25॥

आसीत्समुत्सको भीमः संस्कृताध्ययने परः ।

तस्याग्रजस्तथैवासीत् संस्कृते ह्यनुरागवान् ॥26॥

विप्रस्तत्राध्यापकोऽभूत् किन्तु वर्णानुरागवान् ।

अवर्णो हीनजातिस्तत् कथं स्यादवकाशभाक् ॥27॥

भीमो न संस्कृताध्येता न तद्भ्राता ततोऽभवत् ।

पारसीकं वचः श्रुत्वा तौ लब्धौ कृतकृत्यताम् ।।28।।

भीमः स्वेन प्रयत्नेन स्वबुद्ध्या संपरिष्कृतः ।

श्रेष्ठः सिद्धो हि भाषायां तस्यां निपुणतां गतः ।।29।।

महाराणां समाजो हि तत्साफल्येन मोदितः ।

अस्पृश्यबालकस्यैषा लब्धिरासीत् सुपूजिता ।।30।।

भीमः परिश्रमी सिद्धः स्वकीयाध्ययनेक्षणे ।

विहाय सर्वान् संसर्गान् विद्यालक्ष्यपरायणः ।।31।।

तत्पिता किन्तु विश्रामकाललब्धोपवेतनः ।

समर्थो नाभवद् धीरः शिक्षयितुं सुतद्वयम् ।।32।।

ततो भीमाग्रजं पुत्रमानन्दं भृतिकर्मणा ।

कस्यांचित् कर्मशालायां कृतोत्साहो न्ययोजयत् ।।33।।

भीमस्तु पित्रानुमतो विद्याध्ययनतत्परः ।

पाणिं जग्राह रमाया नवोढो व्यलसत् सुखम् ।।34।।

लभते स्म प्रवेशं च स विद्यायतने ततः ।

एल्फिष्टनाह्वये धीमान् योऽभवच्चातिदुर्लभः ।।35।।

विशेषाद् हीनवर्णत्वाद् धनहीनस्य तत्क्षणे ।

सवर्णावर्णभावेन कलुषेऽत्र नृणां गणे ।।36।।

केलुस्करोऽभूत् कल्याणमित्रं पुण्यानुभाववान् ।

सयाजीरावतः सोऽभूच्छात्रवृत्युपलब्धिमान् ।।37।।

वृत्तिः सा तरतो विद्यार्णवे नौकोपमायऽभवत् ।

प्रसन्नः सोऽपि चित्तेऽभूत् स्वानुरक्तजनैः सह ।।38।।

तस्मिन् हि विद्यायतनेऽस्पृश्यत्वाज्जातिवर्णतः ।

तिरस्कृतो बभूवाति सवर्णैश्छात्रशिक्षकैः ।।39।।

मुल्लरोऽध्यापकः किन्तु स्निग्धो भीमे सदाऽभवत् ।

भीमाय प्रददौ प्रीत्या वासांसि नितरां सुधीः ।। 40।।

# कौमुदीमहोत्सवनाटकम्
## विजयाम्बिकाप्रणीतम्

### प्रथमोऽङ्कः।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

**श्रीमद्वैयाघ्रचर्मास्तररचिततले स्थण्डिले संनिषण्णः**
**कृत्वा पर्यङ्कबन्धं फणमणिकिरणक्षारिणा तक्षकेण।**
**नानात्वग्ग्रन्थिभेत्रीं धियमिव विकिरन्दन्तकान्तिच्छलेन**
**ब्रह्मव्याख्याननिष्ठस्तव भवतु तमःकृत्तये कृत्तिवासाः।।१।।**

(परिक्रम्य) अये। अयं समुपस्थितः सर्वजनसामान्यमहोत्सवभूतःशरत्समयसमवतारः। तथा हि-

**हंसः सैकतमुत्सुकेन मनसा प्रत्यागतः प्रेक्षते**
**भृङ्गो मङ्गलपाठकः सरसिजं प्राप्तोदयं सेवते।**
**रिक्तोऽपि ध्वनिपूरितत्रिभुवनं कृत्वा वदान्यप्रथां**
**पश्चादेति शनैः शनैः परिणतो मेघः परामुन्नतिम्।।२।।**

अपि च-

**कृष्णशारां कटाक्षेण कृषीवलकिशोरिका।**
**करोत्येषा कराग्रेण कर्णे कलममञ्जरीम्।।३।।**

तदानीं तत्र भवतः पाटलिपुत्राधिपतेः सुगृहीतनाम्नो देवस्य कल्याणवर्मणः प्रतिनवराज्यलाभसंवर्धितदृष्टिवृद्धिपरसंकुलेऽपि राजकुले पुनरयमपरः प्रत्यासीदति कौमुदीमहोत्सवारम्भः, तदहमपि स्वकुलोचितेन सङ्गीतकसेवाधिकारेण लब्धावसरो राजकुलं प्रविशामि। **(प्रविश्य)** प्रयुक्तपूर्वेषु पूर्वसूरिसूक्तिविशेषेषु का पुनरभिनवरमणीया कृतिरभिनेतव्या। भवतु, यत्तदस्यैव राज्ञः समतीतं चरितमधिकृत्य (विज्जिकया निबद्धं नाटकम्(। तदिदानीमग्रतः कृत्वा मगधराजान्तःपुरमवतरामि। तत्र मे सन्तः सहायाः -

**विरसापि कृतिः प्रपत्स्यते**
**मधुनिष्यन्दमयं दशान्तरम्।**
**यदि नाम सतामनुग्रहः**
**शिशिरः प्राप्य रवेरिवातपम्।।४।।**

(विलोक्य ससम्भ्रमम्)

**तपसेव विभक्तविग्रहं**
**किमिदं धाम गृहीतवल्कलम्।**
**पुनरुक्तमिवोपलक्ष्यते**
**वटुवेषगृहणं विभावसोः।।५।।**

हन्त! विज्ञातम्, अस्मत्पक्षपातात्स्वयमेव पारिपार्श्वको मुनिशिष्यभूमिकामादाय इत एवाभिवर्तते। तदहमप्यनन्तरोचितेषु करणीयेषु व्याप्रिये। **(निष्क्रान्तः)**

**स्थापना।**

(ततः प्रविशति मुनिशिष्यः)

**मुनि-**अहो तु खलु कुलपतेराश्रमपदस्य महती सम्भावना। यतस्तदा विद्याविनीते गुरुजनानुज्ञाते समं सवयोभिः स्वकुलोचिते कर्मण्यधिकर्तुं प्रस्थिते कुमारे

**पुष्पं बाष्पजलोपमं क्षितितले मुक्तं मुहुः पादपै-**
**र्यावद्दृष्टिपथं तपोवनमृगैरुद्ग्रीवमुद्वीक्षितम्।**
**चिन्ताशून्यधियो निमीलितदृशः सास्राः क्षणं तापसाः**
**शङ्के शोककलङ्किताः कुलपतेः कण्ठे गिरः कुण्ठिताः।।६।।**

अथवा सर्वमिदं कुमारमुद्दिश्येति नात्र विस्मयनीयं पश्यामि। कुतः-

**श्रीवृक्षाङ्कमुरःस्थलं हरवृषप्रस्थानखेलं गतं**
**पादावङ्कुशकेतुलाञ्छिततलावाजानुलम्बौ भुजौ।**
**प्राप्तं चारु मुखं ललामरचनामुन्मेषिणीमूर्णया**
**पर्याप्तं गुणसम्पदा नृपसुतः सङ्केतगोष्ठीगृहम्।।७।।**

**(परिक्रम्य)** अये। अयं काश्यपायनः। **(आकाशे)** किमाह भवान्- कौत्स, कुतो भवानागच्छति - इति? कुलपतिनिदेशादभितश्चण्डिकायतनं पम्पासरःसमीपवर्तिनि कुलक्रमागतस्य सख्युः कुञ्जरकस्य परिग्रहभूते व्याधकिष्किन्धनाम्नि दुर्गस्थाने प्रतापावसरप्रतीक्षया प्रच्छन्नोषितं कुमारं कल्याणवर्माणं सुखमहर्विहारं पृष्ट्वा प्रतिनिवृत्तोऽस्मि। किमाह भवान् - कथमितः प्रथिततरमेव वैरिवर्गाधिष्ठितराज्यप्रत्यानयनोपायचिन्तकः पाटलिपुत्रं गतो नाद्यापि प्रतापावसरमापादितवान्मन्त्रगुप्तः- इति ? ननु प्रमादभीरुत्वात् विवेकिनां कालक्षेपवत्यः कार्यसिद्धयः। किमाह भवान् - कथं च कुलपतिरेव जाबालिस्तपःप्रभावेन तां सिद्धिं नाभ्यर्थितः कुमारेण- इति ? पराक्रमोपनतामेव

सिद्धिमभिकाङ्क्षते क्षात्रं तेजः। किं ब्रवीषि - एवमेतत्, गच्छतु भवान्, अहमपि समित्कुशकुसुमानन्युपहरामि - इति ? साधयतु भवान्, अहमपि कुलपतिं द्रक्ष्यामि।

(इति निष्क्रान्तः)

**विष्कम्भकः**

**(ततः प्रविशति कुमारः)**

कुमा- **येषामाख्या सहायान्गणयति गणनां नैकयाप्यङ्गुलीनां**

**तेषां तोयप्रदानं परिहरति रणस्वर्गिणां पूर्वजानाम्।**

**तेषां सुप्तेव कीर्तिः प्रतिवसति यथा स्वे गृहे सालभञ्जी**

**येषां शेषामिवाज्ञां शिरसि नृपतयः श्रद्धदाना वहन्ति।।८।।**

तावदस्य तपनीयाशोकतरोधश्च्छायायामुपविशामि यावत्कुञ्जरकसकाशात् प्रतिनिवर्तते वयस्यवैखानसः। (तथा कृत्वा) अहो प्रवालशीतलेयं तरुतलच्छाया।

**सम्प्रत्यहं भृङ्गकुलानुयातैः**

**गृहीतगन्धद्विपदानगन्धैः।**

**विन्ध्यानिलैः शैशवभुक्तमुक्तं**

**प्रबोधितः पाटलिपुत्रवासम्।।९।।**

(निःश्वस्य ) तामेव शैशवकथामनुस्मरामि। तदा हि-

**सन्नद्धः कवची शरासनधरस्तातो रुषा प्रोषितो**

**जाता धौतकपोलपत्रलतिका बाष्पाम्बुभिर्मातरः।**

**एकाकी चलकाकपक्षविभवो नीतोऽस्म्यहं तापसै-**

**र्मिथ्येव प्रतिभाति शैशवकथा स्वप्नो नु माया नु मे।।१०।।**

अथवा कृतमनया कातरजनोचितया निपातोदन्तचिन्तया। तेजस्विनो हि पुरुषस्य सम्पदुद्योतनप्रतिपक्षभूता विपदपि न च्छायेव परिहरति पार्श्वम्, न पुनरुदाराः परिहीयन्ते। कुतः-

**ध्वस्तः सुन्दरपाटलो निपतितः कात्यायनः शक्तितः**

**प्राप्तं भैरवमन्धकारगहनं प्रद्योतकारागृहं।**

**तेजोराशिरवाप्तवानुदयनस्तैस्तैरुपायक्रमैः**

**कौशाम्बीं च सुयामुनं च विजयी भूयोऽपि वत्सेश्वरः।।११।।**

भोः पाटलिपुत्रगतमन्त्रगुप्तदूतप्रतिप्रेषणावधिकमपि काललेशमत्रैव तिष्ठन्नप्रतिप्रसरवन्ध्यममर्षं धारयितुं न शक्नोमि। **(निमित्तं सूचयित्वा )** किं नु खलु स्फुरति दक्षिणो मे बाहुः !

**स्वजने शोकसन्तप्ते प्राप्तैश्वर्येष्वरातिषु।**
**नाद्यापि धनुरादत्ते बाहुर्वामेतरो मम।।१२।।**

**(शब्दं रूपयित्वा)** को नु खल्वेष कमलमधुपानमत्तकलहंसनिर्भरो निनादः श्रूयते ? अथवा नेदं कलहंसविरुतम्। कुतः-

**काञ्चीकलरवोन्मिश्रं पादक्रमविलम्बितम्।**
**मञ्जुवाचामिदं मन्ये मञ्जु मञ्जीरशिञ्जितम्।।१३।।**

भवतु, शब्दानुसारेण चक्षुर्विक्षिपामि। **(तथा कृत्वा)** अये! पल्लवितमिव जीवलोकं पश्यामि। का नु खल्वेषा परिमितपरिवारा तारागणपरिवृता शशाङ्कलेखेव लक्ष्यते कुमारी ?

**वामोरूमूरुजातां विदुरुरुजघनामुर्वशीं विश्वयोनेः**
**सीतां सीताप्रसूतिं श्रियमपि मथितादम्बुराशेरुशन्ति।**
**न त्वस्या जन्म जाने जननयनमधुस्यन्दिनी कान्तिलक्ष्मी-**
**र्मध्येवेदिप्रसूतां द्रुपददुहितरं वेदिमध्यां वदन्ति।।१४।।**

(ततः प्रविशति ससखीगणा कीर्तिमती काञ्चुकीयश्च)

का- इत इतो भवती।

की- हला णिउणिए, किं णु खु पसण्णं विअ मे हिअअं ? (हला निपुणिके, किं नु खलु प्रसन्नमिव मे हृदयम्?)

नि- भट्टिदारिए, भअवदीए भत्तजणाणुकपिणीए पादवंदणं करिअ णिग्गदासि, कीस ण पसणा होइ दे हिअअं? (भर्तृदारिके, भगवत्या भक्तजनानुकम्पिन्याः पादवन्दनं कृत्वा निर्गतासि, कथं न प्रसन्नं भवति हृदयम्?)

की- जुत्तं तुए भणिदं, सोढव्ववेदणं दाणिं मे तादस्स अंबाए अ विओअदुक्खं भअवदीदंसणेण। (युक्तं त्वया भणितम्, सोढव्यवेदनमिदानीं मे तातस्याम्बायाश्च वियोगदुःखं भगवतीदर्शनेन)

नि- अइरादो पसादवि दसइस्सदि भअवदी। (अचिरात्प्रसादमपि दर्शयिष्यति भगवती)

कु – सर्वथा मकरकेतुमन्तरेण नास्याः समुत्पत्तिं पश्यामि। तथा हि-

**सर्गान्तराणि सकलान्यति वर्तमान-**
**मस्या वपुर्न खलु शिल्पफलं विधातुः।**
**शङ्के वृषाङ्कविजयाय मनोभवेन**
**तप्तस्य सोऽयमनघस्तपसो विपाकः।।१५।।**

की- कोकिलकंठराअकोमलगीदिसहो चडुलदाआणिवहो कंचणणिंमिदो किं एस पासादो?

(कोकिलकण्ठरागकोमलगीतिशब्दः चटुलपताकानिवहः काञ्चननिर्मितः किमेष प्रासादः?)

नि- भट्टिदारिए, णत्थि एत्थपासादो, एसो खु कुसुममंजरीपुंजपिंजरिअसाहास-हरसो मंदपवणंदोलिअपल्लवपुडो महुअरमहुरुल्लावमणोहरो असोअरुक्खो।

एदिणा पच्चादिट्ठा दाणिं पमअवणपावपाणं समिद्धी। (भर्तृदारिके, नास्त्यत्र प्रासादः, एष खलु कुसुममञ्जरीपुञ्जपिञ्जरितशाखासहस्रो मन्दपवनान्दोलित पल्लवपुटो मधुकरमधुरोल्लापमनोहरोऽशोकवृक्षः। एतेन प्रत्यादिष्ट इदानीं प्रमदवनपादपानां समृद्धिः )

की- हंजे, अत्थि किं इमस्स सुहसीदलं तलच्छाआमण्डलं?

(हञ्जे, अस्ति किमेतस्य सुखशीतलं तलच्छायामण्डलम्?

नि- को एत्थ संदेहो? (कोऽत्र सन्देहः?)

की- कहं तुवं दूरगदा जाणिस्ससि? (कथं त्वं दूरगता जानासि?)

नि- आकिदिप्पच्चएण भणामि। जह अत्थि तदो किं? (आकृतिप्रत्ययेन भणामि। यद्यस्ति ततः किम्?)

की-- उमत्तिए, परिस्संतो जणो विस्समं लभेदि। (उन्मत्ते, परिश्रान्तो जनो विश्रमं लभते )

नि-- अथ, परिस्संता भट्टिदारिआ। (आर्य, परिश्रान्ता भर्तृदारिका )

का- भोः परिश्रान्ता सिद्धायतनेषु वाहनारोहणातिक्रमः परिहरणीय इति पादचारप्रवृत्ता भर्तृदुहिता। देवि, मुहूर्तमस्य तपनीयाशोकतरोरधश्च्छायायामुपविशामः, स्वयमेवोपकल्पितमावासस्थानमन्तःपुराधिकृतः सिंहलको निवेदयिष्यति।

**(सर्वे परिक्रामन्ति)**

कु – संप्रति चरितार्थं चक्षुः-

पादौ पल्लवकोमलौ करिकरश्रीचोरमूरुद्वयं
विस्तीर्णं जघनस्थलं तनुतरो मध्यः स्तनावुन्नतौ।
बाहू चम्पकपुष्पदामरुचिरौ पूर्णेन्दुकल्पं मुखं
केशाः कुञ्चितमेचकाः नववधूरेषा वधूलक्षणम्।।१६।।

(सर्वे कुमारं दृष्ट्वा संभ्रान्ताः)

का— महदिदमाकारबद्धं तेजः, यदस्य दर्शने बहुदिवसाधिष्ठितराजान्तःपुरस्यापि तत्पूर्वोपनतराजदर्शनस्येव शिथिलीभूतः सत्त्वावष्टम्भः। कोऽसाविति जिज्ञासमानोऽपि नैनमनुपोद्धातः प्रष्टुमुत्सहे। सर्वथा तावत्-

कणार्न्तविश्रान्तविलोचनश्री-
ज्र्याघातरेखारचितप्रकोष्ठः।
तेजोनिधिर्नूनमसौ कुमारः
कुलस्य सारोद्धरणं नृपाणाम्।।१७।।

कु— स्वागतमत्रभवतः, अत्र पूर्वोपविष्टा वयम्, तदिहास्यतां भवतीभिः।

विन्ध्याद्रिगन्धगजदानसुगन्धयोऽमी
पम्पासरःसलिलवीचिविमर्दशीताः।
श्रोणीपयोधरसमुद्वहनप्रवृत्तं
मार्गश्रमं व्यपनयन्तु वनान्तवाताः।।१८।।

(सर्वे उपविष्टाः)

नि-- (जनान्तिकम्) भट्टदारिए, किं णु पुंणमासीचंदमडलादो विअ इमस्स मुहादो अमुअरसनिस्संदो निस्सरइ? (भर्तृदारिके, किं नु पौर्णमासीचन्द्रमण्डलादिव एतस्य मुखादमृतरसनिष्यन्दो निःसरति?)

की-- (आत्मगतम्) एंतरं पेक्खंखंतरस वि जणस्स चंदसिलामअं विअ मुअरसणिस्संदणिब्भरं होइ हिअअं। (प्रकाशम्) हला, अग्गदो होहि। (एतदन्तरं प्रेक्षमाणस्यापि जनस्य चन्द्रशिलामयमिवामृतरसनिष्यन्दनिर्भरं भवति हृदयम्। (प्रकाशम्) हला, अग्रतो भव।

नि—अपुरुवपुरुसदंसणेणण ण वड्ढाविदा भट्टिदारिआ। (तथा कृत्वा) (अपवारितकेन सस्मितम्) अइ, परिहरइ चंददंसणं कमलिणि त्ति सच्चो दाणिं लोअष्पवादो। (अपूर्वपुरुषदर्शनेन न वर्धापिता भर्तृदारिका। (तथा कृत्वा) (अपवारितकेन सस्मितम्) अयि, परिहरति चन्द्रदर्शनं कमलिनीति सत्य इदानीं लोकप्रवादः)

की-- (भ्रुकुटीकुटिलनिरीक्षितकेण निपुणिकां पश्यति)

कु-- आर्य, आश्चर्यदर्शनं हि कुतूहलस्थानं तदुच्यते। आकृतिप्रत्ययादेवास्या राजवंशाभिजनत्वमनाख्यातनिश्चितम्, किंतु-

**सा राजपुत्री सुगृहीतनाम्नां**
**किंनामधेयं कुलमीश्वराणाम्।**
**अन्वग्रहीज्जन्ममहोत्सवेन**
**श्रीरेव साक्षादिव सागराणाम्।।१९।।**

का- श्रोतुमर्हति महाभागः। अस्ति शूरसेनो नाम जनपदः। तेषां स्वामी विख्यातकीर्तिः कीर्तिषेणो देवः,

**अन्ये मन्युमहाभुजङ्गमितरे नीतिग्रहावग्रहं**
**प्राप्य प्राञ्जलयोऽपरे बलरजोवेतालरुद्धा दिशः।**
**तन्त्रावापविदो नरेन्द्रपदवीं यातस्य यस्याधिकं**
**रक्षाभूतिमिवोद्वहन्ति शिरसा श्रीपादधूलीर्नृपाः।।२०।।**

कु - श्रूयते शूरसेनाधिपतिः कीर्तिषेणो देवः। स इदानीं मध्यमो मध्यमलोकपालानाम्। ततस्ततः।

का- ततस्तस्येयमेका दुहिता प्राणेभ्योऽपि गरीयसी कीर्तिमती नाम।

कु - हिमवतो ननु गङ्गा प्रभवति। किमर्थं पुनरिदानीम्-

**हर्म्याग्रसञ्चरणदुर्ललितौ पुरे द्वौ**
**मञ्जीरमञ्जुरवशिञ्जितराजहंसौ।**
**धत्तः पदं मुनिवने मनुजेन्द्रपुत्र्याः**
**प्रौढप्ररूढकुशकण्टकसीम्नि पादौ।।२१।।**

का- एतदपि श्रूयताम्। सेयमपर्याप्तशैशवक्रीडारसैव-

**यौवनारम्भयोगेन शोभामसदृशीं गता।**

**शिक्षागुणविशेषेण सूरेरिव सरस्वती।।२२।।**

कु - ततस्ततः।

का- ततो यत्प्रतिपन्नयौवनासु पितृभिः प्रतिपत्तव्यं तद्भगवत्यनुमतेनैव वर्त्मना इति कृतनिश्चयः स्वयमेव दुहितरं 'चण्डिकायतनं गत्वा कानिचिदहान्याराधयतु भगवतीं विन्ध्यवासिनीम्' इति साभिसरामेनामितः प्रेषितवान्यदुनाथः। भद्रं तव।

कुमा- अशक्यारम्भप्रवृत्तं तत्रभवन्तं मथुरेश्वरं पश्यामि-

**इदं किलाविष्कृतकान्तिविप्लवं**
**तुषारवातातपदर्शनेष्वपि।**
**शरीरमुद्यानशिरीषपेलवं**
**तपोवनक्लेशसहं भविष्यति।।२३।।**

कीर्ति- (आत्मगतम्) हद्धी धीलत्तणं हिअअस्स। जणप्पढिसिद्धप्पसरा वि पुणोपुणो तहिं एव्व दिट्ठी सज्जइ। (हा धिक् धीरत्वं हृदयस्य। जनप्रतिषिद्धप्रसरापि पुनःपुनस्तत्रैव दृष्टिः सज्जते)।

चेटी- जेदु भट्टिदारिआ, सीसरइअअजलिपुडो सिंहलओ विण्णवेदि- कप्पिदं आवासट्ठाणं, भअवदीए जोअसिद्धीए अभिप्पेदं एदं एव्व पवेसमुहुत्तअं ति। (जयतु भर्तृदारिका, शीर्षरचिताञ्जलिपुटः सिंहलको विज्ञापयति- कल्पितमावासस्थानम्, भगवत्या योगसिध्या अभिप्रेतमेतदेव प्रवेशमुहूर्तकमिति)

काञ्चु - देवि, आपृच्छयतां महाभागः, गच्छामो वयम्।

कुमा- गम्यतां पुनर्दर्शनाय। न विस्मरणीयोऽयमनुषङ्गदृष्टो जनः।

**(कीर्तिमती कुमारं कटाक्षेणावलोकयन्ती सपरिवारा निष्क्रान्ता )**

कुमा- **गता प्रिया प्रस्नुतचित्तरागै-**
**रारेचितभ्रूललितैरपाङ्गैः।**
**कर्षत्यसौ मानसमस्मदीयं**
**मयि स्वमात्मानमुतार्पयन्ती।।२४।।**

कथमियमस्या मार्गलता गमनविघ्नमाचरति?

**परिवृत्तमुखी नरेन्द्रकन्या**
**विटपोत्कम्पितभङ्गरोत्तरीया।**

**स्तनयोरनयोर्नताङ्ग्यष्टिः**
**स्मरसर्वस्वसमुद्गयोर्भरेण।।२५।।**

कथमेषा वक्त्रामोदप्रसक्तं मधुकरयुवानं लीलारविन्देन निवारयन्ती हन्त! अन्तर्हिता तरुसङ्कटे।

**याता नितम्बगुर्वी**
**यावद्यावन्मृगेक्षणा दूरम्।**
**बिम्बितगात्रीवान्त-**
**स्तावत्तावदवगाढा मे।।२६।।**

(पर्युत्सुकस्तिष्ठति) (प्रविश्य विदूषकः)

विदू- मअधष्पच्चंतवासिणं सवरपुलिदाणं कुजरएण पुरुसो पेसिदो- जह भणइ अंअमंतगुत्तो तह होदव्वं ति। जावचंडिआअदणजिण्णुज्जाणगदं वअस्सं उवसप्पामि। (मगधप्रत्यन्तवासिनां शबरपुलिन्दानां कुञ्जरकेण पुरुषः प्रेषितः - यथा भणति आर्यमन्त्रगुप्तः तथा भवितव्यमिति। यावच्चण्डिकायतनजीर्णोद्यानगतं वयस्यमुपसर्पामि )

(उपेत्य) जेदु वअस्सो। (जयतु वयस्यः).

कुमा -(विदूषकं हस्ते गृहीत्वा ) सखे वैखानस,

**स्वप्नोपनता लक्ष्मीः**
**प्राप्ता गन्धर्वनगररेखा या।**
**प्रादुर्भूय नृपसुता**
**भूयः सहसा तिरोभूता।।२७।।**

विद् - का सा राअदारिआ णाम? (का सा राजदारिका नाम ?)

कुमा- एवमिव।

विद् - अविहा अंधस्स कूपपतणं संवुत्तम्, पुव्वं रज्जणासो तते इत्थिआतंतुणा बंधणं। (हा! अन्धस्य कूपपतनं संवृत्तम्, पूर्वं राज्यनाशः ततः स्त्रीतन्तुना (बन्धनम्)।

कुमा-वैखानस, मा मैवम्; इतस्तथा प्रस्थितायाः-

**अस्याः सखे क्षणमदृश्यत रोमराजी**
**स्रस्तेंऽशुके स्तनभरान्मृगलोचनायाः।**
**मालेव षट्पदमयी भुवनानि जेतुं**

**मौर्वीकृता भगवता मकरध्वजेन।।२८।।**

विदू - हीं! ही! पेक्ख पेक्ख, पुंफणिमलो अअं ओदणरासी दीसइ। (ही! ही! पश्य पश्य, पुष्पनिर्मलोऽयमोदनराशिर्दृश्यते)

कुमा- (दृष्ट्वा) अयं तस्या लतावसक्तपतितः प्रभावर्षी मौक्तिकहारः। आनीयतां तावत्।

विदू- साहु! ण मौत्तिअआरो बुभुक्खिदस्स मे ओदणरासी दीसइ। (गृहीत्वोपहरति)(साधु! न मौक्तिकहारो, बुभुक्षितस्यौदनराशिर्दृश्यते).

कुमा- (हारमादय)

**प्रस्थानक्षणसम्भ्रममुक्तं मुक्तास्वरूपेण।**

**परिवृत्तं पश्य सखे किं नु तया विस्मृतं हृदयम्।।२९।।**

विदू- भोवअस्स, अंमाणं कुंभीलाणं आकिण्णेण परकेरएण गहिदेण? (भो वयस्य, अस्माकं कुम्भीराणामाकीर्णेन परकीयेन गृहीतेन?)

कुमा- वयस्य, मा मैवम्। अस्ति तावदस्माकममुना प्रयोजनम्। पश्य-

**मन्दारपुष्पस्तबकाभिरामैः**

**सिन्दूरितोनायकरत्नमाभिः।**

**श्रीविभ्रमाम्भोजमृणालकान्ति-**

**र्माङ्गल्यहेतोरयमस्तु हारः।।३०।।**

(**प्रविश्य चेटः**)

चेटः-जेदु भट्टा, गहिदसंभाराम वाआमभूभौ वअव्सगणो पडिपालेदि। (जयतु भर्ता, गृहीतसंभाराः स्म, व्यायामभूमौ वयस्यगणः प्रतिपालयति।)

विद्- उट्ठेदु उट्ठेदु भवं, कालो वाआमभूमिगमणस्स। (उत्तिष्ठतूत्तिष्ठतु, कालो व्यायामभूमिगमनस्य।)

**(सर्वे परिक्रमन्ति)**

कुमा- **तामेवानुगतं चेतो मुक्तमूलमिदं मम।**

**स्रोतोदैर्घ्यवशात्तोयं ह्रदस्येवावसीदति।।३१।।**

अपि च -

**स्तनकलशघनोष्मणेव तप्तं**

पृथुलनितम्बभरादिवावसन्नम्।
मम हृदयमधिष्ठितं मृगाक्ष्याः
स्फुरदधरप्रभयेव रक्तमासीत्।।३२।।

(निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः समाप्तः।।

# द्वितीयोऽङ्कः

(ततः प्रविशति मधुमञ्जरिका)

मधु-अमो! पच्चासण्णो दाणिं कुसुमसरसिबिरसंणिवेससंणिभो महुमासो। जह साहाग्गोलंबा सिलीमुहसणाहा वंमहसिहिसंणिभा कुसुमगुच्छआ दीसंति असोअरुक्खाणं। हद्धि। वमहसरदूमिअहिअआए भट्टिदारिआए पडिऊलदंस्सेणां महुमासो।

(अंहो। प्रत्यासन्न इदानीं कुसुमशरशिबिरसन्निवेशसन्निभो मधुमासः। यथा शाखाग्रावलम्बाः शिलीमुखसनाथा मन्मथशिखिसन्निभाः कुसुमगुच्छकाः दृश्यन्तेऽशोकवृक्षाणाम्। हा धिक्! मन्मथशरधूमितहृदयाया भर्तृदारिकायाः प्रतिकूलदर्शनो मधुमासः।

**(प्रविश्य भामिनिका)**

भामि- असंणिहिदाए मए ण जाणिदं तपोवणवासकिलेस किलंतसरीराए केरिसो

खु रत्तिगतो बुत्तंतो। (असन्निहितया मया न ज्ञातं तपोवनवासक्लेशक्लान्तशरीरायाः कीदृशः खलु रात्रिगतो वृत्तान्तः।

मधु- एसा भामिणिआ हिओरत्तीए सहपुरोहिंदेहि देव्वोपहारं णिव्वत्तिअ चंडिआअअणादो पडिणिवुत्ता। एसा वि रहस्सरक्खिणीणं सहीणं मज्झे णिउणिआए गणिज्जइ। ता इमं वि विदितबुत्तंते करेमि। (उपेत्य) अह कुसलं सहीए? (एषा भामिनिका। ह्यस्तनरात्र्यां सहपुरोहितैर्देवोपहारं निर्वर्त्य चण्डिकायतनतः प्रतिनिवृत्ता। एषापि रहस्यरक्षिणीनां सखीनां मध्ये निपुणिकया गण्यते। तदिमामपि विदितवृत्तान्तां करोमि। (उपेत्य) अपि कुशलं सख्याः?)

भामि- अइ, कुदो अह्माणं कुसलावसरो तादिसं भट्टिदारिआए अणिंणीदणिदाणं आतंकं चिंतअतीणं?

(अयि, कुतोऽस्माकं कुशलावसरस्तादृशं भतृदारिकाया अनिर्णीतनिदानमातङ्कं चिन्तयन्तीनाम्?)

मधु- जइ एव्वं, णिव्वुदा होहि, णिंणीदं से आदंकणिदाणं। (यद्येवम्, निर्वृता भव, निर्णीतमस्या आतङ्कनिदानम्।)

भामि - दिट्टिआ पसंणा भअवदी विञ्झवासिणी। इमस्स सहआररुख्वस्स पच्छाये णिसंणिअ संलवामो।

(दिष्ट्या प्रसन्ना भगवती विन्ध्यवासिनी। एतस्य सहकारवृक्षस्य प्रच्छाये निषद्य सल्लपावः)

मधु-एव्वं वहोदु। (एवं भवतु) (उभे उपविशतः)

भामि- कहेहि। कहेहि! (कथय! कथय!)

गधु- सुणिअदु, हिओरत्तीए किंवि उक्कठिदा विअ णिस्सेसणिवारिअपरिजणा णिउणिआमेत्तसहीजणा सअणिज्जं गदा भट्टिदारिआ। (श्रूयतां, ह्यस्तनरात्र्यां किमपि उत्कण्ठितेव निःशेषनिवारितपरिजना निपुणिकामात्रसखीजना शयनीयं गता भर्तृदारिका)

भामि- तदो तदो। (ततस्ततः).

मधु- तदो जाव अणंतरसअणिज्जं गदा ओसुत्ता णिउणिआ दाव उक्कठिदाए अणिद्दाए णिव्विणोदाए कहंविकस्सं जोह्णा सहर्णे पडंते संणिहिदेहीं वणणएहिं एक्को वंमहजंमतराकिदी कुमारो आलिहिदो ताव पडिबुद्धाए णिउणिआए दिट्ठा कमलमुउलकोमलं सीसे अञ्जलिं गेह्निअ 'अइ हिअअवल्लभ, णिग्घिणोसित्ति भणंती भट्टिदारिआ। पच्चा अह्माणं णिउणिआ मंतिदं। (ततो यावदनन्तरशयनीयं गतावसुप्ता निपुणिका तावदुत्कण्ठितया अनिद्रया निर्विनोदया कथमपि ज्योत्स्नाश्लक्ष्णे पटान्ते सन्निहतैर्वर्णकैरेको मन्मथजन्मान्तराकृतिः कुमार आलिखितः। तावत्प्रतिबुद्धया निपुणिकया दृष्टा कमलमुकुलकोमलं शीर्षेऽञ्जलिं गृहीत्वा 'अयि हृदयवल्लभ, निर्घृणोऽसि' इति भणन्ती भट्टिदारिका। पश्चादस्माकं निपुणिकया मन्त्रितम्)

भामि- दिट्ठेआ एव्व पभादं! पुढमं एव्व अह्माणं हिअअतुलिओ एसो अत्थो। को उण सो? अहवा को एत्थ विआरो? णं सो एव्व जो अंमेहिं चंडिआअअणे दिष्टो। (दिष्ट्यैव प्रभातम् ! प्रथममेवास्माकं हृदयतुलित एषोऽर्थः। कः पुनः सः? अथवा क एष विचारः ? ननु स एव योऽस्माभिश्चण्डिकायतने दृष्टः)

मधु- अह इं। को अण्णो पुण्णमसचंदं मोत्तूण कुमुदिणीए हिअअवल्लभो? (अथ किम्। कोऽन्यः पौर्णमासचन्द्रं मुक्त्वा कुमुदिन्या हृदयवल्लभः ?)

भामि-होदु, अब्भंतरं एव्व पविसामो। (निष्क्रान्ते) (भवतु अभ्यन्तरमेव प्रविशावः).

**प्रवेशकः**

**(ततः प्रविशति विदूषकः)**

विदू- (निःश्वस्य) दिढं ह्मि णिव्विण्णो इमस्स वयस्सस्य अदेसकालुप्पुण्णुं मादव्वाहिं उवअरंतो। जोचिअ पुढमं हुदसेसेहिं सकारुचेत्तहिं भिख्वाहारेहिं संवड्ढिअसरीरो संबुत्तो सोचिअ अहं वि

लहिअपरदुद्दिट्ठी कडंगरीअअसब्बंमआरी अलद्धकज्जंतरप्पवेसो कडअप्पाहुणिओ विअ वंज्जिदसइदं विह्मिदब्बो इदो तदो आहिंडेमि। जइ णिमंतणकाले णिमंतिदेहिं बह्मणेहिं सह अब्भंतरं पविसाभि तदो किं मए पडिवत्तव्वं? होदु, इमस्स लदामंडपस्स बाहिरपच्छाए मुहुत्तं विस्समिस्सं। (तथा करोति).

(निःश्वस्य) दृढमस्मि निर्विण्णोऽस्य वयस्यस्य अदेशकालोत्पन्नोन्मादव्याधिमुपचरन्। य एव प्रथमं हुतशेषैः सकारुचित्रकैः भिक्षाहारैः संवर्द्धितशरीरः संवृत्तः स एवाहमपि लघूकृतपरदुर्दृष्टिः कडङ्गरीयसब्रह्मचारी अलब्धकक्ष्यान्तरप्रवेशः कटकप्राघुणिक इव वर्जितशपितव्यबृंहितव्य इतस्ततः आहिण्डामि। यदि निमन्त्रणकाले निमन्त्रितैर्बाह्मणैः सहाभ्यन्तरं प्रविशामि ततः किं मया प्रतिपत्तव्यम्? भवतु, अस्य लतामण्टपस्य बाह्यप्रच्छाये मुहूर्तं विश्रमिष्यामि)

(तथा करोति )

(ततः प्रविशति निपुणिका)

निपु- रत्तिप्पआअरकिलन्तसरीरा गहिद्कुमुदिणिव्व दिवाणिद्दं गदा भट्टिदारिआ। जाव आवासगदां एव्व भअवदिं जोअसिद्धिं पेख्वामि। सा एव्व णो इमस्सिं संकटप्पवाहं सकमो भविस्सिदि। (परिक्रामति)

(रात्रिप्रजागरक्लान्तशरीरा गर्भितकुमुदिनीव दिवानिद्रां गता भर्तृदारिका। तावदावासगतामेव भगवतीं योगसिद्धिं प्रेक्षे। सैव न एतस्मिन्सङ्कटप्रवाहे सङ्क्रमो भविष्यति (परिक्रामति)

(ततः प्रविशति परिव्राजिका )

परि-

**अप्याजवज्जवसुखान्यवधीरयन्ती**
**खद्योतवैद्युतरुचिक्षणभङ्गुराणि।**
**कृष्टाहमीश्वरसुतागुणपाशवन्यै-**
**र्बद्धं कलेवरभरं पुनरुद्वहामि।।१।।**

भोःतथाभूते स्वजनवृत्तान्ते निर्वेदप्रव्रजिताध्यायुषजीविनमात्मानं मन्यमाना देशाद्देशान्तरं परिसरन्ती ! रसेनमथुरां प्राप्य तत्र च कीर्तिषेणमहिष्या राजन्वत्या साकमध्याससमावसनकृतसख्या यदृच्छया शू प्रतिवसामि। तद्दुहितरि मदङ्गसंवर्द्धितायामपत्यस्नेहवती तपोवनाभिमुखीमप्येनामनुगतास्मि। यावदेनामनुरक्तपतिं कुलगामिनीं पश्यामि तावत्कुतो मे निःसङ्गता ? कुतः-

आश्रयति माधवी चेदाश्रमसहकारपादपस्कन्धम्।
स्वार्थक्रीतां लभते निर्वृतिमारण्यको वर्गः।।२।।

सा पुनरमीषु दिवसेषु किञ्चिदकल्यरूपा लक्ष्यते। वक्ति च लोकः-

वनवासमिमं कथं सहेत सा पितुरुत्सङ्गसुखैधिता तथा।
क्लममेष्यति यत्र नैष्ठिकस्तरुवल्कावरणोऽपि तापसः।।३।।

अपि च-

क्षणक्षीणौ बाहू च्युतपतितकेयुरवलयो
परिम्लानावस्थः श्वसनपवनैरोष्ठरुचकः।
निवृत्तस्नानीयः शिरसिजकलापो वपुरभू-
दसूर्यम्पश्यायाः (सरस)निभृतं राजदुहितुः।।४।। इति।

मम पुनरयं प्रतर्कः। तस्या हि-

जातं विभ्रमदृष्टिपातशवलं पाण्डुद्वयं गण्डयो-
र्गाढे यौवनसोष्मणी स्तनतटे गाढोऽपि चिन्ताज्वरः।
अव्यक्तस्तनिमा स्वकान्त्युपचयादप्येवमालक्ष्यते
प्रभ्रष्टाभरणप्रदेशविषमेष्वङ्गेष्वनङ्गामयः।।५।।

को नु खल्वेष नभसः श्येनचरणभ्रष्टो निपतितश्चित्रपटः?

दृष्ट्वा नभस्तः शिखिबर्हभारशारोदरं चित्रपटं पतन्तम्।
अनभ्रसंसर्गमभूतपूर्वमैन्द्रं धनुः खण्डमनुस्मरामि।।६।।

भवतु, अभूमिस्पृष्टमेनं सम्भावयामि।

(गृहीत्वा शिलातले समुपविश्य निर्वर्णयति)-

निपु- एत्थ भअवदीए लदामंडपं। (प्रविष्टकेनावलोक्य) एस भगअवदी एक्कं चित्तपडं पेख्वती सिलाअले णिसण्णा। अंहो! एसो चित्तपडो जो एक्कंते णिसण्णाणं बहुएहिं आसाबधेहिं सहीणं आमिसखडलुद्धेण सेणेण आख्वित्तो। (अत्र भगवत्या लतामण्डपम्। एषा भगवती एकं चित्रपटं प्रेक्षमाणा शिलातले निषण्णा। अहो! एष चित्रपटो य एकान्ते निषण्णानां बहुभिराशाबन्धैः सखीनामामिषखण्डलुब्धेन श्येनेनाक्षिप्तः)

परि— महदिदमाकारबद्धं तेजः! अस्य हि-

दर्पणगतमिव सवितुः  पटान्तरचितं महानुभावस्य।
प्रतिबिम्बमिव प्रतिमुखपतितं प्रतिहन्ति मे दृष्टिम्।।७।।

(पुनः सावधानं दृष्ट्वा)  हा!  महादेवि,  (मोहं गता).

निपु- हद्धि। चित्तपडं पेख्वती हा!  महादेवि त्ति मोहं गदा भअवदी। महत्तेण उप्पादेण होदव्वं। (सहसोपसृत्य तामुत्सङ्गेनादाय)  समस्ससिहि समस्ससिहि। (हा!  धिक्,  चित्रपटं प्रेक्षमाणा हा महादेवि इति मोहं गता भगवती। महतोत्पातेन भवितव्यम्।)  समाश्वसिहि समाश्वसिहि।

परि-  (ईषदिव समाश्वस्य)  हा!  महादेवि,  तदा तुए यदिलोअं पत्थिदाए जो मम हत्थे णिख्वित्तो, जो पडिपख्वभयादो चलकाकपख्वओ अरवमहरेहिं अमच्चकुमारेहिं कल्लाणसिरी।  (पुनरपि मूर्छिता  (हा! महादेवि,  तदा त्वया पतिलोकं प्रस्थितया यो मम हस्ते निक्षिप्तः,  यः प्रतिपक्षभयाच्चलकाकपक्ष अमात्यकुमारैः कल्याणश्रीः[रक्षितः])

विद्- किं णु खु लआघरब्भंतरे सद्दो विअ?  होदु,  विडपंतरेण पेख्वामि।  (तथा कृत्वा) वअस्सपडिकिदिं पेख्वती एका परिव्याजिआ मोहं गआ;  तं पुण एका इत्थिआ उच्चंगे गेह्णिअ समस्सासं कुणइ। तक्केमि सा एसा विणअंधरेत्ति णिव्वेदपव्वाजिदा।  (किं नु खलु लतागृहाभ्यन्तरे शब्द इव ? भवतु,  विटपान्तरेण प्रेक्षे।  वयस्यप्रतिकृतिं प्रेक्षमाणका परिव्राजिका मोहं गता; तां पुनरेका स्त्री उत्सङ्गे गृहीत्वा समाश्वासं करोति। तर्कयामि सैषा,  विनयन्धरेति निर्वेदप्रव्रजिता)

निपु- समस्ससिहि समस्ससिहि।  (समाश्वसिहि समाश्वसिहि)

परि- (समाश्वस्य)  जइ सोअविख्वदसरीरो एत्ताह एत्तिअं परिवड्ढिदो  भवे। (यदि सोऽविक्षतशरीरः एतावता एतावान्परिवर्द्धितो भवेत्)

निपु- (आत्मगतम्)  अवि णाम भअवदीए स जणो भट्टिदारिआए हिअअवल्लवो जणो भवे? (प्रकाशम्) भअवदि,  को एसो अब्भाआरिअजणजोग्गो आआसो? का एसा विण्णाणविसेसविसरिसी असक्कयावाणी?  (अपि नाम भगवत्याः स्वजनो भर्तृदारिकाया हृदयवल्लभो जनो भवेत्?  भगवतिक , एषोऽभ्यागारिकजनयोग्य आयासः ?    कैषा विज्ञानविशेषविसदृशी असंस्कृता वाणी?)

परि-- (प्रत्यवमृश्य)  अये!  निपुणिका। (अयि निपुणिके)

निपु-- (आत्म) मोहं पडिबुद्धाए इमाए सव्वं विण्णवेमि। (मोहं प्रतिबुद्धाया अस्याः सर्वं विज्ञापयामि। (प्रकाशम्) कंहिं सो कुमारो कल्लाणसिरी? (कुत्र स कुमारः कल्याणश्रीः ?)

परि – **वाष्पान्धापि यदादरं दश दिशो दृष्टिः समुद्वीक्षते**
**स्थाविर्येऽपि परिस्नुतस्तनमुखं वक्षो यदुत्कण्ठते।**
**चिन्तातूलिकया मनोरथमये कुड्ये यदालिख्यते**
**प्रभ्रष्टं तदपत्यकं निपुणिके दग्धो विधिः पृच्छताम्।।८।।**

(पुनरपि चित्रपटं निरीक्ष्य)

**यौ द्वौ शैशवमुष्टिभेदविशदौ रेखातपत्राङ्कितौ**
**क्षीणो चङ्क्रमणे[1] मदङ्गुलिमुखं याभ्यां समालिङ्गितम्।**
**वन्द्ये यावपि कारितौ गुरुजने मात्रा बलादञ्जलिं**
**तौ हस्तावुरगेन्द्रभोगसदृशप्रौढप्रमाणौ कथम्।।९।।**

(बाष्पं विकिरति)

निपु-(पत्रपुटेन गोत्रवारि गृहीत्वा) भअवदि, इदं मुहोदअं। (भगवति, इदं मुखोदकम्)

परि— ईषदिव प्राप्तानृण्या बुद्धिः।

निपु- भअवदि, एदसरिसवण्णो कुमारो भट्टिदारिआए दिट्ठो। ता इयं आलिहिदा तस्स पडिकिदी। सहीजणहत्थादो आमिसखंडलुद्धेण सेणेण आक्खित्तो पुणोवि गअणा भअवदिहत्थं पत्तो जइच्छाए अअं चित्तपडो। (भगवति, एतत्सदृशवर्णः कुमारो भर्तृदारिकया दृष्टः। तदियमालिखिता तस्य प्रतिकृतिः। सखीजनहस्तादामिषखण्डलुब्धेन श्येनेनाक्षिप्तः पुनरपि गगनाद्भगवतीहस्तं प्राप्तो यदृच्छयायं चित्रपटः)

परि—एवं भोः। कथय, कथमेवंवर्णकारस्तया कुमारो दृष्टः।

निपु—एव्वं विअ। (एवमिव)

परि-अपि नाम तयायमालिखितः स एव मगधकुलाङ्करः कुमारो भवेत्। न तदाकारानुकारी कश्चिदेकः।

निपु- अच्चाहिदं एदं हि अअं अण्णं अणु भट्टिदारओ भअवदीए। (अत्याहितमेतद्धि। अयमन्यश्च ननु भर्तृदारको भगवत्याः?

---

[11] **क्षोणीचङ्क्रमणे के.टि.पि**

परि--निपुणिके, कथयामि ते भूतार्थम्। आसीत्पुरा सुन्दरवर्मा नाम मगधेश्वरः। तस्याग्रमहिषी मदिरावती नाम। तस्या धात्रेयिका सखी कुमारधात्री च भूता दैवादन्तर्हिते तत्र राजकुले निर्वेदप्रव्रजिताहं मथुरां प्रविश्य प्रतिवसामि। सम्प्रति पुनः कीर्तिमती मे सर्वस्वम्।

विदू-- ही। ही। एस णातकोह्मि संबुत्तो; दुंमेदो वैखाणसो त्ति मंतगुत्तो मंतेदि। (हि! हि! एष स्नातकोऽस्मि संवृत्तः; दुर्मेधो वैखानस इति मन्त्रगुप्तो मन्त्रयति)

परि-- (आत्मगतम्) लब्ध इदानीमवसरः पृच्छामि तावदेनाम्। यत्कीर्तिमतीमन्तरेण तदखिलं निपुणिका वेत्ति।

(नेपथ्ये गीयते)

**न शशाक शशाङ्कमीक्षितुं न समाकर्णयितुं सुखोदितम्।**
**न च पल्लवभङ्गकल्पिते शयनीये शयितुं नृपात्मजा।।१०।।**

परि--अहो! यावत्साधु गीतमेतयोर्वैतालिकयोर्वैतालिकीयम्। निपुणिके, कीर्तिमतीमन्तरेण किञ्चिदिह भवतीं पृच्छामि।

निपु-- भअवदि, आणवेदु। (भगवति, आज्ञापयतु)

विदू- तक्केमि राअदारिआए एसा पच्चअं गदा सही। (तर्कयामि, राजदारिकाया प्रत्ययं गता सखी)

परि—

**आकस्मिकीमरतिमुद्वहतीव तस्या**
**वक्त्रं कुतो वसुमतीपतिनन्दनायाः।**
**च्योतद्विलोचनजलाविलगण्डरेखं**
**नीहारनीरकणिकार्द्रमिवारविन्दम्।।११।।**

निपु- एसो भट्टिदारिआए चित्तगदो कुमारो पुच्छिदव्वो भअवदीए। सा दाणिं णीसासजिण्णहिअआ कोमलकदलिआ विइ इदी तदो पलोट्टती मणोरहसहीजणं वि मुंचइ। जइ तं अंतरेण भअवदी ण साहु पेक्खिस्सदि, तदो सा अवस्सं तवस्सिणी सोअघरणिधरसिहरारूहिया भविस्सिदि?

(एष भर्तृदारिकायाश्चित्तगतः कुमारः प्रष्टव्यो भगवत्या। सा इदानीं निःश्वासदीर्णहृदया कोमलकदलिकेव इतस्ततः प्रलुठन्ती मनोरथसखीजनमपि मुञ्चति। यदि तामन्तरेण भगवती न साधु प्रेक्षिष्यते, ततः सावश्यं तपस्विना शोकधरणिधरशिखरारूढा भविष्यति)

परि— **सा राजपुत्री नयति त्रियामां**

**कान्तं विना जागरणारुणाक्षी।**

**मामेव मन्ये प्रतिपालयन्ती**

**प्रत्यूषवेलामिव चक्रवाकी।।१२।।**

विज्- ही! ही! भिक्खं गदी णिमंतणिमंतणं पत्तो। (सहसोपसृत्य) एस वैखाणसो पणमदि। (ही! ही! भिक्षां गतो निमन्त्रनिमन्त्रणं प्राप्तः। एष वैखानसः प्रणमति)

परि- अये! वैखानसः प्राप्तः, का नामेयमनभ्रवृष्टिः?

निपु- (आत्मगतम्) को एसो आकिदीए मक्कडओ वाआए गद्दभो? (क एषः अकृत्या मर्कटको, वाचा गर्दभः?)

विदू- एसो कल्लाणसिरिणो णमुक्कारो। (अञ्जलिं गृह्णाति) (एष कल्याणश्रियो नमस्कारः)

निपु--(अत्मगतम्) एस वअस्सो तस्स जणस्स। (एष वयस्यस्तस्य जनस्य)

परि— **सामन्ताग्रवधूकरव्यतिकरैः सञ्चारितो दर्पणः**

**सौधोत्सङ्गनिवेशितो नवशशी पौरैः समुद्वीक्षितः।**

**बह्वीभिः स्तनदायिनीभिरुचितस्कन्धः पुनर्मातृभिः**

**पुण्यः पुष्पपुरोत्सवः क्व नु गतो वैखानस ब्रूहि मे।।१३।।**

वि- आसण्णं दे पुत्तदंसणम्। अणुवअस्सं राअदारिआ संतप्पदि, राअदारिणादंसणुप्पण्णमदणुंमादो बहुलपख्वचदस्स इव अणुदिणुसंओभीरंतसरीरो वअस्सो दीसइ। (आसन्नं ते पुत्रदर्शनम्। अनुवयस्यं राजदारिका सन्तप्यति, राजदारिकादर्शनोत्पन्नमदनोन्मादो बहुलपक्षचन्द्रस्येव अनुदिनं समबभ्रियमाणशरीरो वयस्यो दृश्यते)

परि— साधु भोः-

**कुवलयदलदीर्घदृष्टिपाशां कुसुमशरासनवागुरां कुमारः।**

**नृपदुहितृमयीं निरुद्धवर्त्मा मृगपतिपोतसमः समाजिहीते।।१४।।**

निपु—उस्ससिदं विअ मे हिअअं। किं णु हु सव्वं भवे? (उछ्वसितमिव मे हृदयम्। किं नु खलु सर्वं भवेत्?)

परि--वत्स, यावदविदितमेतदस्माभिः। केयमतर्किता दृष्टिवृद्धिः?

विदू- एवं वि। (एवमिव)

परि- एवमेतत्। प्रयोजनवदेव मे जीवितधारणम्।

विदू- भोदि, राअदारिआए वअस्सपडिकिदी आलिहिदा, तुए वि मज्झ पडिकिदी आलिहिदव्वा। (भवति, राजदारिकया वयस्यप्रतिकृतिरालिखिता, त्वयापि मम प्रतिकृतिरालिखितव्या)

परि-(सस्मितम्) भजमानमभिहितम्।

निपु- ध्वंस! वडरवडुअ। (ध्वंस! वडर वटुक)

विदू-- होदि, मा कुप्पहि एसो तुह्मे पसादेमि। (उत्तरीयादुन्मुच्य हारं समर्पयति) (भवति, मा कुप्य, एष युष्मान्प्रसादयामि)

निपु--हं! एसो सो हारो जो भट्टिदारिआए पणट्ठो। (हारमञ्जलिना गृह्णाति) (हं! एष स हारः, यो भर्तृदारिकायाः प्रणष्टः)

परि--(आत्मगतम्) उभावपि मदुत्सङ्गसंवर्द्धितौ परस्परं कामातुरौ कीर्तिमती कल्याणवर्मा च। तदनयोर्वागर्थयोरिव समवायं करिष्यामि। (प्रकाशम्) ममायमभिसन्धिः। (धातुरागेण पटान्ते समालिख्य वाचयति ).

**शौनकमिव बन्धुमती कुमारमविमारकं कुरङ्गीव।**
**अर्हति कीर्तिमतीयं कान्तं कल्याणवर्माणम्।।१५।।**

गूढरक्षितमेनं कुमाराय समर्पय प्रदोषे। पुनरात्मा दर्शयितव्यः। (चित्रपटमर्पयति)

विदू- जं भअवदी आणवेदि (यद्भगवत्याज्ञापयति) (चित्रपटं गृहीत्वा निष्क्रान्तः)

निपु-- भअवदि, कहं भट्टिदारिआए पाणा रक्खिदव्वा? (भगवति, कथं भर्तृदारिकायाः प्राणाः रक्षितव्याः?)

परि— माभूत्ते विषादः। पश्य--

**गूढप्रयोगनिभृतापि समर्पयन्ती (प्रियमर्पयन्ती ?)**
**चिन्ताज्वरं व्यपनयानि नृपात्मजायाः।**

**पर्जन्यघोषविमुखीव दिवः पतन्ती**
**भूमेरवग्रहविशोषमनभ्रवृष्टिः।।१६।।**

(इति निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः समाप्तः।

# सुधन्वचरितम्

संस्कृतभाषायामनुवादकः

## पण्डित क.न.वरदराज अय्यङ्गार्यः

अश्वमेधयागक्रमं पृच्छते युधिष्ठिराय भगवान्व्यासः सर्वं तं व्यवृणोत्। चैत्रमासस्य राकायां अलंकृतः हयः यष्ट्वा विमोच्यः। वर्षमात्रमिते अश्वस्य संरक्षणे शूराः बान्धवाश्च नियोज्याः। यज्ञकर्ता असिपत्रव्रतमाचरेत्। तुरगस्य ललाटे कनकफलके यागस्योद्देशः लेखनीयः। यः राजा तं हयं बध्नाति सः जेतव्यः। सर्वासु दिक्षु संचरिष्यमाणेन हयेन सार्धं गच्छन्तः विरुद्धान् राज्ञः विजित्य मित्रैरन्यैश्च राजभिः दीयमानं धनं च संगृह्य अवधिमनतिक्रम्य पुनरागच्छेयुः। एवमेव देवराजः शतं क्रतून् यष्ट्वा इन्द्रपदवीमलमकार्षीत्। एवमुक्त्वा पुनर्व्यासः मधुसूदनं पुरस्कृत्य क्रतुमारब्धुं धर्मनन्दनमसूचयत्। हयस्य रक्षणे भीमादीन् भ्रातॄन् कर्णपुत्रं वृषसेनं घटोत्कचसुतं मेघवर्णं च नियोजयितुं युधिष्ठिरं प्रावोचत्।

व्यासस्य महर्षेः स्पष्टमुक्तानि वचनानि श्रुत्वा धर्मराजः परां चित्तशान्तिमविन्दत। चिन्तयामास 'अहो! भीमादयः सर्वे भ्रातरः महाभारते युद्धे बहुक्लेशिताः आसन्। तैर्विना कथं मम आयोधने महान् विजयः। पुनरपि यागं व्याजीकृत्य तान् पीडयितुं नैव प्रभवामि। कर्णस्य पुत्रः महापराक्रमी। षोडशवर्षीयं तं बालं लज्जां विना तस्य पितृहा अहं कथं तुरगस्य रक्षणे प्रेषयितुं शक्नुयाम्। मनस्तथा तं नियोजयितुं न प्रवर्तते। घटोत्कचपुत्रः मेघवर्णश्च न मया पुनर्युद्धे भयङ्करे प्रेषयितुं योग्यः '' इति। आत्मनः दुःखं व्यासाय भगवते भ्रातृणां सन्निधौ धर्मराट् एवं न्यवेदयत्।

ज्येष्ठस्य भ्रातुः वचनानि तानि भीमः नानुमेने। तं सात्वयन्नब्रवीत् ' 'पूज्यतम! न कदाचिदेवं त्वं पर्यतपेः। भगवतो देवकीनन्दनस्य कृष्णस्य कृपापात्रभूतानामस्माकं पापलेशस्यापि नैव सम्पर्कः। तस्य स्मरणमात्रेण नराः मुक्तकिल्विषा भविष्यन्ति। स एव यज्ञः यज्ञस्वरूपः, यज्ञफलप्रदाता च। तेनैव सूचितैरस्माभिरायोधनं कृतम्। प्रत्यक्षतः स्वयमेव युद्धभूमौ स्थित्वा प्रेरयित्वा अस्मान् सः विजयिनः अकार्षीत्। तेन विना तृणमपि न चलति। कृष्णः यद्यद्यास्माकं समीपस्थः तर्हि वयं सर्वपापैर्विनिर्मुक्ता एव। कुतोऽन्यस्य यागस्यावश्यकता। आस्तां तावत्। भगवान् व्यासः अश्वमेधक्रतुं यष्टुं सूचयति। क्रतुयोग्यस्य तुरङ्गस्य च प्राप्तिस्थानं भगवान् सूचयतु। अहमेव हयमानयिष्ये। विरोधिनः सर्वान् संग्रामे सूदयिष्यामि। वसु हिमालयतः आहरिष्यामि। कृष्णं पैतृष्वसेयं पुरस्कृत्य यज्ञं करिष्यामः। तस्यैव नायकत्वे कृतकृत्याश्च भविष्यामः '' इति।

भीमस्य वचनानि श्रुत्वा व्यासः परां तुष्टिमाप। तमभ्यनन्दत्। भद्रावत्यां पुर्यां वर्तमानं हयं क्रतुयोग्यं निरदिशत्। दशाक्षौहिणीसेनानायकस्य यौवनाश्वस्य हयं तं चानेतुं महान् प्रयत्नः कार्य इति प्रोवाच। यौवनाश्वस्यानुमतिं विना पवनेनापि अश्वस्य स्पर्शनं न शक्यते इत्यब्रवीत्। कृपणेन यथा वित्तं पाल्यते तथा एष तुरङ्गः यौवनाश्वेन रक्षितः इति

वदन्तं भगवन्तं व्यासमहर्षिं पुनः पुनः प्रणम्य भीमसेनः हयमानेतुं प्रतिज्ञामकरोत्। वासुदेवे न्यस्तभरस्सन् अनुपदमेव निर्गन्तुमपेक्षामास। वृषसेनस्तु तं निरुध्य स्वयमेव यौवनाश्वं विजेतुमिच्छां प्राकटयत्। मेघवर्णश्चानुज्ञां युधिष्ठिरमयाचत। व्यासः तेषां यज्ञकणे महान्तमुत्साहं वीक्ष्य धर्मराजस्य अनुमतिं स्वीकृत्य ततो निर्जगाम।

२

अश्वमेधं क्रतुं यष्टुं युधिष्ठिरः निरचिनोत् इति अतीव सन्तुष्टः महर्षिव्यासः अर्धरात्रे एव राजधान्या निर्गन्तु नैच्छत्। भ्रातरस्सर्वे तं संपूज्य तेनानुगृहीतास्सन्तः कंचित् दूरमन्वगमन्। व्यासे भगवति निर्गते भ्रातृभिः साकं धर्मजः चिन्तयामास। वसु न वर्तते। हयः बलिष्ठात् यौवनाश्वात् आनेतव्यः। पुनरपि हयमार्गे विराधिभिरायोधनं कार्यम्। सन्देहमापत्। कथं यज्ञपूर्तिः भवेत्? मधुसूदनं विना नान्यं रक्षकं पश्यामि। स च दूरे द्वारकानगरे वर्तते। सः कथमानेतव्यः? सर्वज्ञः सः किं न जानीयम्। चिन्तया विमूढः सः तमेव शरणमगमत्। उच्चैः ' 'हे कृष्ण! द्वारकावासिन्! रक्षास्मान् शरणं गतान् ' इति चुक्रोश।

रुक्मिणीजानिः तस्यार्तनादं द्वारकायामश्रौषीत्। भक्तजनसंरक्षणैकधुरन्धरः श्रीमान् "मम प्राणाः हि पाण्डवाः" इति वचनं संस्थापयितुमिव द्वारकातः मनोवेगेन हास्तिनं पुरमाजगाम। प्रतीहारः धर्मजादीनामालोचनमन्दिरं प्राविशत्। समागतं जगद्वल्लभं प्रोवाच। अर्धरात्रे समागत इति हृदानन्दकरं वचनं श्रुत्वा कुन्तीपुत्रः झटित्यासनादुत्थाय भ्रातृभिस्साकं दुद्राव, तं सुभद्रानुजं प्रत्युज्जगाम। तं पर्यष्वजत। कृष्णः धर्मराजं भीमं च ववन्दे। अर्जुनादिभिर्वन्दितोऽभवत्। कृतां सपर्यां स्वीकृत्य आसने उपाविशत्। द्रुपददुहिता प्रमोदनिर्भरान्तःकरणां तं प्राणसीत्। अवोचच्च ' 'जगद्वल्लभ! आर्तत्राणपरायण। दुर्वाससः भये समुत्पन्ने एवमेव त्वं ध्यानस्यानुपदमेव समागतान् रक्षितवानभूः। सभाया मध्ये वस्त्ररूपी भूत्वा मम मानसंरक्षणमकरोः। धर्मनन्दनस्य चिन्तासमनन्तरमेवाद्य आगतवानसि। यस्मिन् काले न जननी न पिता न च बान्धवाः भर्तारश्चासहायकाः पितामहाः गुरवश्च मूका आसन्, तदा तव प्राणस्वरूपान् अस्मान् रक्षितवते तुभ्यं किमपि वक्तुं न प्रभवामः। प्रियामङ्कगतामपि त्यक्त्वा अस्मद्रक्षणे समागतवानभूः। यदा यदा ग्लानिः सतां जायते, तदा तदा तवाविर्भावः अविलम्बितः इति वचनं प्रतिष्ठापितवानसि। हे यदुकुलनन्दन! त्वां वयं शरणं गताः " इति वदन्ती पुनः पुनः ववन्दे।

सुखोपविष्टं हसन्मुखं जनार्दनं धर्मराजः कुशलमपृच्छत्। महर्षेः व्यासस्य हस्तिनापुरे आगमनमब्रवीत्। बान्धवानां निषूदनेन संचितानां पापानामपनुत्यै अश्वमेधयागकरणे तस्य सूचनां प्रावोचत्। मरुतेन कृते यागे स्वीकृतं धनं ऋत्विजः हिमालये पर्यत्यजन्निति तस्य धनस्यानयनाय कृतां तस्य सूचनां व्यवृणोत्। यौवनाश्वस्य हयं हृत्वा तस्य यागमुद्दिश्य विमोचनं कर्तुमपेक्षां च प्रोच्य तस्य साह्यं ययाचे। तेन करिष्यमाणेन साह्येन विना यज्ञकरणे स्वस्यासमर्थतां च प्राचीकटत्।

3

धन्या चेयं भारतभूमिः। भिन्नोदरेषु ज्ञातिमात्सर्यस्य सत्वेऽपि सहोदरेषु न तथा संदृश्यते स्म। सुभ्रातृता रामेण त्रेतायुगे भुक्ता परिपालिता च। पाण्डवाः जन्मप्रभृति तां पर्यपालयन्। ज्येष्ठं तं भ्रातरं युधिष्ठिरं पितरं मन्वानाः तस्य

विधेया आसन्। सुखे वा दुःखे वा अभिप्रायेषु भिन्नेष्वपि ऐकमत्येन ते स्मरणीयाः संजाताः। धर्मराजश्च अनुजेषु समानः अवर्तत। तैस्साकं समालोच्य सर्वमपि करोति स्म। भगवति व्यासे अश्वमेधं क्रतुं यष्टुं सूचयति भीमः स्वं बाहुबलं विश्वस्य, पैतृष्वसेये भगवति कृष्णे न्यस्तभरः हिमाचलात् वित्तस्यानयने, पराक्रमिणः यौवनाश्वात् हयस्यानयने च भ्रातरं प्रतिज्ञातवान्। धर्मराजे कृष्णं ध्यायति सोऽप्यागमत्। तस्मै आत्मनां प्राणरूपिणे देवकीनन्दनाय धर्मजः सर्वं विवृत्य आत्मन्यप्रत्ययं चेतः अपि प्रोवाच। सर्वं चेतिवृत्तं सर्वज्ञः प्रभुः शुश्राव। युधिष्ठिरं समाश्वासयितुं, भीमं प्रचोदयितुं चापैक्षत। आत्मनि अतीव विश्वासयुतानां परिहासकरणं सामर्थ्यं तेषां द्रढयतीति भीमं परिहसितुं निरचिनोत्।

"धर्मनन्दन! त्वया यागः कर्तुमसाध्य एव। भीमस्यास्य प्रोत्साहमवलम्ब्य चिन्तितवानसि। मन्त्रालोचने भीमः असमर्थः। बह्वाशी एषः कां सूचनां प्रदीयेत। स्थूलोदराणां मतिर्मन्दा। यदा विवर्णा राक्षसी भार्या अनेन वृता तदैव तस्य मतिः कीदृशी इति न वर्णनीयम्। कैस्साकं मन्त्रालोचनं न कार्यमिति चेत् शृणु, ब्रवीमि। व्यङ्गाः, बधिराः, कामुकाः, जडाः, स्त्रीजिताः, श्वशुरगृहनिवासिनः, एते मन्त्रप्रदाने असमर्थाः। तेषां सूचनानि असुखदानि। जरासन्ध-हिडम्ब-बकाः भीमेन निहताः, सत्यम्। न ते क्षत्रियाः। धर्मिष्ठाः, महावीर्याः जितेन्द्रियाः क्षत्रियाः बहवः सन्ति। ते न सुलभाः। तैस्साकमायोधने विजयः संदिग्ध एव। तथाविधान् क्षत्रियान् भीमः न जानाति। जयद्रथं हन्तुं प्रतिज्ञाय धनञ्जयः कथमभवत् इति विदितमेव। पूर्वमनामन्त्र्य साहसे कर्मणि न झटिति प्रयतेत। अश्वः सर्वां भूमिं चंक्रमति। तत्र तत्र गन्धर्वाः बलिनः सन्ति। अमेयपराक्रमाः मानवाः वर्तन्ते। तेऽपि जेतव्या भवेयुः। पुरा रामः अश्वरक्षणे भरतं भ्रातरं न्ययोजयत्। वीरः सुरथः शुक्तिमत्यां पुर्यां तं भरतं हयेन साकमबध्नात्। तदा राघवः स्वयमेव गत्वा तममूमुचत्। तवाप्यश्वे केनापि प्रगृहीते, अत्र तव रक्षकः कः? तत्र अश्वस्य रक्षकः को वा भवेत्। अनेन पूर्वापरमनालोच्य त्वया कृतः एष निश्चयः कथं साध्यते। एष मे संशयो महान् ' इति प्राकृतवत् वासुदेवः धर्मनन्दनभीमस्य सन्निधौ जगाद। धर्मजस्तं न प्रत्युदतरत्। दीर्घमालोचयितुं समुपचक्रमे। भीमस्तु कृष्णस्य परिहासवचांसि श्रुत्वा चिन्तनं विना झटिति प्रत्युवाच।

४

भीमः कृष्णस्य परिहासवचनानि विवेद। चिन्ताकुलं धर्मराजं चापश्यत्। धर्मराजस्य मनसि यागः असाध्य इति शङ्का समुत्पन्ना इति भावयामास। पाण्डवानां संरक्षणमेव धर्म इति संकल्पितस्य प्रभोः अर्धरात्रे ध्यानानुपदागमनं यागसमाप्तिलक्षणं इति मनसि निरचिनोत्। तस्य कृष्णस्य परिहासवचनानि प्रत्यभाषत। धर्मजं च तत्परं कर्तुमियेष। 'गोपीजनमनोवल्लभ! सर्वज्ञेन त्वया अर्धरात्रे ध्यानमनुसृत्यागमनं शुभोदर्कमिति धर्मजः नाजानात्। तव परिहासवचनानि तथ्यानीति स मनुते। तव सखायं धर्मजं विना कोऽन्यः यागमेनं कर्तुं प्रभवति। स्थूलोदरः मन्दमतिः इत्यवोचः। बह्वाशीः मतिहीन इत्यपि अगदीः। द्वावपि त्वमेव। इदं विश्वं सर्वमपि तवोदरे एव दृश्यते। ब्रह्मादयः सुराः सर्वे सरित्सागरादयः तवोदरे एव दृश्यन्ते। ब्रह्मादयः सुराः सर्वे सरित्सागरादयः तवोदरे अस्माभिर्दृष्टाः। त्वत्समः स्थूलोदरः विश्वस्मिन्नेव विश्वे नास्ति। अहं राक्षस्याः हिडिम्बायाः भर्ता। सत्यम्। गुणशीलरूपादिभिर्विशिष्टा रुक्मिणी

पार्श्वस्था अपि जाम्बवतीं वानरीं त्वां विना अन्यः कथं परिणेष्यति। वराह-मत्स्य-कूर्माणां रूपेण त्वमवातरः। वामनश्चासि। तत एव एतादृशेषु वक्रभाषणेषु समर्थश्चासि। सखे। स्त्रीनिमित्तेन देवलोकात् पारिजातं वृक्षं चाहृतवान् त्वमेव ननु। श्वशुरगृहनिवासिनां मन्त्रालोचने सामर्थ्यं शून्यं घुष्टवानसि। तव च वासः क्षीराब्धाववेति किं व्यस्मरः। यागः अशक्य इति कुतः तर्जयसि। गिरिं गोवर्धनं कनिष्ठया अंगुल्या उद्धृतवति त्वयि पार्श्वस्थे कुतः भीतिरस्माकम्। त्वामेव पुरस्कृत्य शत्रून् विजेष्यामः। अश्वमेधं क्रतुं च समापयिष्यामः। अहमेवाग्रजमसूचयम् 'मम कृष्णः सत्यमत्रागमिष्यति। पाण्डवानामसकं प्रियं करिष्यति। सफला वयं भविष्यामः'' इति। त्वमत्रागतवान्। त्वमेव यज्ञः, यज्ञपतिः, यज्वा, यज्ञाङ्गः, यज्ञवाहनः, यज्ञान्तकृत्, यज्ञगुह्यम् इति सुदृढं जानीमः। आपद्बान्धव, अग्रजः खिन्नः। तमाश्वासय। अस्माननुगृह्य पार्श्वतः वर्तमानस्सन् सनाथान् कुरुष्व। त्वां विना कस्य पुरतः शोचितुं साध्यते अस्माभिः।रक्ष रक्ष जनार्दन' ' इति परिहासरूपवचोभिः वसुदेवसुतं देवमस्तावीत्।

हर्षनिर्भरः प्रभुः आसनादुत्थाय भीममुपसर्प्य दृढं तं पर्यष्वजत्, आत्मनः उदरे पूर्वमेव मृतान् भीष्मद्रोणकृपादीन् दृष्टवता धर्मजेन स्वात्मनि कथं पातकं चारोपितमिति विसिष्मिये। पातकस्य तस्याप्यर्पणेन पूतः भवितुं सः अर्ह इति प्रतिपादयामास। भीमः सम्भाषणकुशलः सत्यभामाधवं प्रोवाच

''त्वत्करे चार्पितं देव स्वल्पंतद्बहुलं भवेत्।

वस्तुजातं नृपो वेत्ति न ददाति हि दुःष्कृतम्।

यज्ञजं सुकृतं हस्ते तव दास्यति पाण्डवः '' इति।

कृष्णः श्रुत्वा भीमस्य वचनं मूकोऽभवत्। सः धानामुष्टिमुचे कुचेलमुनये वित्तेशतामेव प्रदत्तवान्ननु। भीमस्तमेवं स्तुवन् पुनरपि धर्मजं तोषयितुं तं प्रार्थयामास। रामावतारे भगवान् नारायणः

''मित्रभावेन संप्राप्तं न त्यजेयं कथंचन'' इत्युक्त्वा भार्यापहर्तुः भ्रातरं विभीषणं सखायमकरोत्। युद्धप्रयत्नात्पूर्वमेव लङ्काराज्ये समभ्यषेचयत्। एवं स्तुवति भीमसेने, धर्मराजे च दृढनिश्चये कृष्णः पाण्डवानाश्वासयत्। विविधैः कथालापैः रात्रिं तामनैषीत्।

परेद्युः प्रभाते भीमः कर्णपुत्रेण वृषकेतुना, घटोत्कचस्य पुत्रेण मेघवर्णेन च साकं धर्मनन्दनस्य भवनमागमत् कुन्तीं, युधिष्ठिरं, वासुदेवं च नमस्कृत्य हयस्यानयने गन्तुमनुज्ञां प्रार्थयामास। जनन्या प्रदत्तं पाथेयं मोदकांश्च स्व्यकरोत्। तैस्सर्वैः प्रीत्या अनुगृहीतः अर्जुनं पर्यष्वजत्। तं ज्येष्ठं द्विजान् च संरक्षितुमसूचयत्। देवकीनन्दनस्य वासुदेवस्य संस्मरणेन उपद्रवाः लयं गच्छन्तीति तमस्मरत्। ससैनिकं, साश्वं यौवनाश्वं समानयिष्ये इति विश्वासमसूचयत्। पुनरपि केशवं प्रोच्य तस्य अनुग्रहं लब्ध्वा भद्रावतीं पुरीं प्रति प्रातिष्ठत्।

प्राङ्मुखः प्रस्थितो भीमः वृषकेतु-मेघवर्णाभ्यां पुरो गच्छन् तां पुरीं भद्रावतीं तृतीयेऽहनि प्राप। पर्वतं समीपस्थमारुह्य सुन्दरं, रम्यं नगरं ददर्श। नगरस्य परितः मनोहराणि काननानि। सर्वत्र सरांसि। विविधानां पक्षिणां कलकलरवः। अहो रम्यैः तोरणैः, सुन्दरैः भवनैः, मठसत्रमण्डपैश्च नगरी शोभते इति मोदमाप। समीपे नम्राः, फलिता रम्भाः अपश्यत्। सुगुणाः सज्जना इव फलातिभारेण नम्राः ताः दृष्ट्वा सन्तुष्टोऽभवत्। प्रकृतिसौन्दर्यानुभवेन कंचित्कालं

विस्मृतकर्तव्यः सः वृषकेतुमुवाच "तात। सुबलिभिः संग्रामे निष्णातः रक्ष्यमाणः हयः सः मध्याह्ने अत्रागमिष्यति। वयं त्रयः अत्रैव तिष्ठामः। तुरगं ग्रहीष्यामः। वीरास्ते रक्षकाः समनुगता हयं न मुञ्चन्ति। अहमादौ गमिष्यामि मामनुसृत्य युवां भवतम्। प्रयत्नः सुखदः भविष्यतीति भासते मे मनसि' ' इति।

वीरेषु त्रिषु तेषु पश्यत्सु गजाः केचन सरस्तीरमागमन्।ताननुसृत्य हयाः समागताः। हयाननुसृत्य असंख्याकाः सैनिकाः पिपालिका इवागमन्। बहूनां वीराणां तेषां मध्ये गृध्रध्वजयुतः रथः कश्चनासीत्। तस्मिन् एव रथी यौवनाश्वः स्यात् इति ते ऊहामासुः। दुन्दुभिनिस्वनं रौद्रं ते त्रयः शुश्रुवुः। जलपानार्थमागतेषु तेषु असंख्याकेषु हयेषु नानावर्णान् गम्भीरान् शिक्षितगतीन् दृष्ट्वा परं विस्मयमध्यगुः।भीमः अश्वहरणे उत्सुकं मेघवर्णं प्रत्यब्रवीत् "पुत्र! अश्वस्यास्यानयनार्थमागतानामस्माकं पुरतः हयाः अनेकशः समागताः। हयानामेतेषां रक्षणे यौवनाश्वेन साकं वीराः सहस्रेभ्योऽधिका वर्तन्ते। वयं त्रयः असहायकाः। त्वं तु अतीवोत्साहं प्रकाशयसे। कर्तव्यं सर्वं निश्चित्य ततः प्रयतस्व' ' इति मेघवर्णः पूज्यस्य भीमस्य सामयिकानि वचांसि श्रुत्वा प्रावोचत्।

६

हयानां तेषां मध्ये उद्दिष्टः तुरगः वर्तते वा इति भीमसेने संदिहति चामरैः वीज्यमानः वीरैः बहुभिः परिवृतः अश्ववरः मन्दं मन्दं तत्रागमत्। तं दृष्ट्वा, भीमसेनस्य मनसि समुत्थितं सन्देहं च श्रुत्वा मेघवर्णः अब्रवीत् "पूज्यतम! आज्ञापय। तुरगमहमेक एव प्रगृह्य वीरेषु तेषु पश्यत्सु पर्वतस्यास्योपरि नयिष्ये। अथवा अनुज्ञां मे देहि। अद्यैव सपुत्रकं यौवनाश्वं बध्वा अत्रानयिष्ये। मयि अत्र स्थिते तव तत्र गमनं तैरस्माकं चायोधनमहं नापेक्षे। त्वयि आज्ञापयति तैस्माकं क्षात्रधर्मेण युध्वा हयमानयामि " इति। उक्तिमनुसृत्य प्रत्युत्तरस्य च निरीक्षणेन विना सः मेघवर्णः खमुत्पपात। राक्षसीं मायां भयंकरीं संजनयामास। देवा अपि बिभ्युः, देवराजस्याज्ञया तमुपसृत्य, तस्योद्देशं विदित्वा तमभ्यनन्दन्। देवराजं चावदन्। मेघवर्णस्तु गतेषु देवेषु हयरक्षकानाकुलानकार्षीत्। हयं च गृहीत्वा उदडयत्। अपहृते हये रक्षकाः विह्वलाः राजानमूचुः। राजा शूरान् वीरान् दिव्यैः रथैः प्रेषयत्। ते नभसि नीयमानं हयं, हयहर्तारं चापश्यन्। तं रुरुधुः। शरान् मुमुचुः। वीरः मेघवर्णः तान् मुषिवणटना प्रहृत्य गतप्राणानकरोत्। तान् सर्वान् निहतान् दृष्ट्वा पुनरप्यन्यान्यौवनाश्वः प्रेषयामास। ते वीराः बाणैः नभः सर्वं पूरयामासुः। वृषकेतुः हयेन साकमागच्छन्तं मेघवर्णं, तस्य निरोधाय बाणान् विमुञ्चतः यौवनाश्वस्य पराक्रमिणः शूरान् चापश्यत। धनुः जग्राह। प्राणान्तकान् शरान् मुमोच। विस्मयेन तेषु पश्यत्सु वृषकेतुस्तान् प्राणत्यागेन विना निवर्तितुमबोधीत्। देवकीनन्दनस्य स्मृतिपूर्वकं विमुक्तेषु तेषु शरेषु मोघः कोऽपि शरः न संदृश्यते स्म। केचन यौवनाश्वं राजानं गत्वा अपहृतं हयं, हतान् वीरान् च प्रावदन्। केवलैस्त्रिभिरेव एवमभवदिति ज्ञातोदन्तः यौवनाश्वः स्वयमेव रणाजिरमाजगाम। मानुषेषु तादृशाः वीराः नैव स्युरिति मत्वा सः वीरस्तैर्युध्वा स्वं पराक्रमं प्रकाशयितुमियेष। भीतिं विना तिष्ठन्तं सकार्मुकं बालं वृषकेतुमपश्यत्। भीमः गदामुद्धृत्य प्रातिष्ठत। वृषकेतुः तं वारयामास। वीरः अक्षौहिणीसैन्ययुतैः अतिरथमहारथैः विना अल्पसैन्ययुतेन यौवनाश्वेन युद्धं भीमस्यानुचितम् अवमानकरं चेत्यब्रवीत्। निपुणैः सामयिकैः वचोभिस्तं वारयामास। भीमं प्रदक्षिणीकृत्य, नमस्कृत्य अनुज्ञाया निरीक्षणेन निर्ययौ। तीक्ष्णान् बाणान् अमूमुचत्। बहून् वीरान्

पातयामास। व्यपोथितेषु बहुषु वीरेषु गजारूढः यौवनाश्वः पुरः आययौ। पराक्रमभूषितं बालं दृष्ट्वा स्वयं कञ्चन रथमारुह्य यौवनाश्वस्तस्मै रथमारोढुमसूचयत्। तमतीवाभिनन्द्य तादृशेन वीरेण पदातिना वाहनारूढस्य स्वस्य युद्धमनुचितमित्यभिप्रैत्। असहायपराक्रमिणस्तस्य नामगोत्रादीनां जिज्ञासुरभवत्। वृषकेतुस्तं तथापृच्छन्तं प्रत्युदतरत्।

७

बालः वृषकेतुः असमानपराक्रमयुतः बालोऽपि महाभारते युद्धे शत्रुभिः पाण्डवैः दुर्योधनपरतया युध्यमानः सर्वैः संस्तुतश्चासीत्। पितरि कर्णे च मृते पाण्डवान् पितृव्यान् अजानात्।! बहुधा आलोचयामास। दुर्योधनेन कृतं सर्वं चाकृत्यं, सर्वेषां तेषां साक्षिभूतं स्वपितरं स्मारं स्मारं व्रीडितोऽभवत्। सभायां दुश्शासनादिभिः पूज्यायाः द्रौपद्याः वस्त्रापकर्षणं चिन्तयन् तान् कुत्सितानमनुत। पाण्डवानामनुग्रहेणैव पिता भास्करं पदमाप इति मेने। पित्रा संपादिताया अपकीर्तेः सम्मार्जनाय प्रयत्नः महान् कर्तव्य इति संकल्पितवान्। सन्दर्भेषु सर्वेषु, आत्मनः परिचयनामविवरणे गतस्येतिवृत्तस्य कथनेन तृप्तिं च विन्दते स्म।

यौवनाश्वे पृच्छति ब्रवीति' 'वीर! कश्यपकुलसम्भूस्य मम नाम वृषकेतुरिति। सभामध्ये क्लिश्यन्ती द्रौपदी येन संदृष्टा तस्य कर्णस्य पुत्रोऽहम्। स मे पिता दुर्योधनस्य हितमिच्छन् धर्मराजादीनपि नागणयत्। अर्जुनशरविद्धगात्रः दिवं प्रपेदे। धर्मराजस्य मे पितृव्यस्य अश्वमेधयागं समुद्दिश्य तव हयं नेतुमागता वयम्'' इति प्रावोचत्।

परस्परं युद्धमारभत। यौवनाश्वः शरान् व्यमुञ्चत्। वृषकेतुस्तान् मध्येमार्गमच्छिनत्। कृत्तं धनुश्च वीक्ष्य यौवनाश्वः अन्यत् धनुः जग्राह। पुनः शरान् उत्ससर्ज। तान् शरान् कृत्त्वा वृषकेतुः तस्य यौवनाश्वेनारूढस्य रथस्य हयान् चतुरः, सारथिं चाहन्। बाणैः आच्छाद्य तमदृश्यमकार्षीत्। तयोः वीरयोः विविधानामस्त्रप्रत्यस्त्रप्रयोगकौशल्यानां वीक्षणेन सैनिकाः संभ्रान्ताः अजायन्त। यौवनाश्वेन मुक्तेन भल्लेन विद्धः वृषकेतुः भूमौ पपात। भीमः रणं प्राविशत्। घोरमायोधनमकार्षीत्। कृष्णं संस्मृत्य संस्मृत्य गदां भीमः वीजयति स्म। युद्धं तुमुलं रोमहर्षणं चासीत्। यौवनाश्वस्य पुत्रः सुवेगः आजगाम। उभौ समानपराक्रमौ। गदायुद्धमकुरुताम्। बाहुबले प्राकाशयताम्। परस्परं गृहीत्वा चिक्षिपतुः।

मूर्छितः वृषकेतुः लब्धस्मृतिः पुनरपि युद्धमारभत। वृषकेतुस्तं राजानं यौवनाश्वं समुद्दिश्य शरान् प्रायुङ्क्त। ' तैः शरैः विद्धः राजा मूर्छामवाप। कर्णपुत्रस्तमुपसृत्य वस्त्रवातेन समुपचचार। स्वस्य कृष्णाराधनपुण्येन राजा जीवतु इति देवान् प्रार्थयामास। न जीवति तस्मिन् कः आत्मनः पौरुषं विद्यात् इत्यशोचीत्। तं तथा समुपचरन्तं लब्धसंज्ञः यौवनाश्वः संददर्श। तं वृषकेतुं पर्यष्वजत्। पुत्रं वृषकेतुं सैनिकांश्च युद्धं समापयितुमाज्ञापयत्। वृषकेतुं प्राणप्रदातारमुक्त्वा स्वस्य राज्यमेव तस्मै प्रायच्छत्। कृष्णदर्शनकुतूहलं प्रोवाच। भीमं समीपमागन्तुमसूचयत्। गृहीतांश्च मेघवर्णं, सभीमं वृषकेतुं च पुरीं भद्रवतीमनयत्। सपर्याभिस्तान् अतृतुषत्। यथा वृषकेतुः तं मूर्छितमकरोत्, पार्श्वतः उपविश्य विविधैरुपचारैः प्रार्थनादिभिश्च लब्धसज्ञं चकार, तेषां विवरणेन सर्वान् तानभ्यनन्दत्। कृष्णस्य

दर्शने कुतूहलमब्रवीत् । तस्य पत्नी पद्मावती श्रुतकथा तान्  नीराजयित्वा मृष्टान्नं पर्यवेषयत्। मम सुश्लथं माङ्गल्यं कण्ठसूत्रं परिरक्षितमिति ब्रुवाणा वृषकेतुमाशीर्भिः अतोषयत्।

सुप्रभाते यौवनाश्वः राजसभां समुपकाल्पयत्। नगरप्रमुखाः सचिवाः सर्वे समाहूताः। समागतेषु सर्वेषु, राजा यौवनाश्वः सभां प्राविशत्। भीम-वृषकेतु-मेघवर्णाश्च तमनुसृत्यागमन्। राजा अतिथीन् सभ्येभ्यः पर्यचाययत्। हस्तिनापुरस्य राज्ञा धर्मराजेन समुद्दिष्टं हयमेधक्रतुमब्रवीत्। गोपीजनमनोवल्लभं भुव्यवतीर्णं नारायणं वासुदेवं हस्तिनापुरे वर्तमानं यागस्य संरक्षकं ववार। अनुपदमेव पौरास्सर्वे सदाराः सपुत्रबान्धवाः गच्छेयुरित्यादिशत्। स्वयमपि सम्राज्ञ्या प्रभावत्या, सुवेगेन पुत्रेण साकं गमिष्यामीति प्रत्यजानात्। गङ्गायां पुण्यनद्यां स्नानेन, भगवतः कृष्णस्य सन्दर्शनेन, अश्वमेधक्रतौ भागवहनेन च पूतो भवितुमपेक्षामास। भद्रावत्यां पुर्यां बहवः धनिनः आसन्। तेषु सुदेवः कश्चन प्रतिष्ठितः। स च सभायामवर्तत। सुदेवं तस्यानुयायिभिस्साकं पर्याप्तं वसु च गृहीत्वा अनुपदमेव हास्तिनं पुरं गन्तुं राजा यौवनाश्वः आदिदेश। सुदेवस्तथा मित्राणि सर्वाणि गन्तुं सूचयित्वा गृहमगात्। मातरं यज्ञस्योदन्तं प्रोच्य नागरास्सर्वे सवित्ताः प्रस्थिताः इत्यवोचत्। स्वयमपि गन्तु मातुरनुज्ञां प्रार्थयामास। गङ्गायां स्नात्वा, कृष्णस्य सन्दर्शनेन पूतः भवितुमैच्छत्। ' 'यज्ञस्य दर्शनाय पौरास्सर्वे गच्छेयुः।अन्यथा ते हन्यन्ते' ' इतीमां वार्तां मात्रे अब्रवीत्। तत्र गमनाय सिद्धा भवितुं तामसूचयत्। वृद्धा तस्य माता तस्य वचनान्यशृणोत्। हस्तिनापुरं गन्तुं नैच्छत्। आत्मना देवो वा धर्मो वा न श्रुत इत्यब्रवीत्। भर्त्रा वा स्वस्याः पित्रा वा धर्मो न कदाचिदपि अनुष्ठित इत्युक्त्वा धनक्षये तथा पुत्रस्य प्रवृत्तौ प्रचोदकानगर्हत्। यज्ञदानादिकाः वेदाश्चार्थवादाः। लोकस्य वञ्चनामुद्दिश्य द्विजैः प्रवृताः इत्यब्रवीत्। क्लेशेन बहुना सम्पादितस्य धनस्य व्ययः नैव कार्यः इत्यगदत्। ' 'धनव्ययः कुलस्य स्वस्य नैव सुखप्रदः। अकृतं न कुर्यात् ' इति पुत्रमुपादिशत्। सुदेवः एवं मात्रा प्रोक्तः राजानं गत्वा मातुरभिप्रायान् प्रोवाच। मात्रा अप्रदत्तं धनं चोक्त्वा तस्या यागाय आगमनतिरस्कृतिं च स्पष्टीकरोत्। जरद्गवाख्यायाः तस्याः सुदेवमातुर्वचनानि श्रुत्वा राजा तां समाह्वाययत्। हितैः वचनैः तां प्रीणयितुं प्रायतत। 'सर्वे जनाः हस्तिनावतीं गच्छन्ति। धर्मजः कृष्णश्च वर्तेते। साम्बः रुक्मिणी सत्यभामा द्रौपदी कुन्त्यादयः सन्ति। मया सह गजाह्वयं पुरं प्रति प्रातिष्ठथाः। सतां सन्दर्शनेन पातकानि विलयं यान्ति' ' इति स्पष्टीकरोत्।. जरद्गवा पुनरपि आर्जितस्य धनस्य व्ययं नानुमेने। कृष्णेन वा धर्मेण वा कार्यं किमपि नास्तीत्यगदत्। राज्ञः गमनं च नोचितमित्वादीन्। धनस्य नाशेन तथाविधेन क्लेशाः बहवः समुत्पत्स्यन्ते इति च प्रोवाच। स्वकर्मणि कृष्णधर्मादयः यथा व्यग्राः स्थिताः, तथैव स्वयमपि गृहकार्येषु सावधानास्मीति राजानं प्रत्यवदत्। प्राणाः गता अपि वरं, धनस्य नाशः न भवेदिति अभिप्रैत्। यौवनाश्वः तां कृपणां श्रुत्वा प्रहसन् सेवकानाह्वयत्। तां बद्धुमाज्ञपयामास। दोलायां तामारोप्य जरद्गवां ससैन्यः सपुत्रमित्रकलत्रबान्धवः भीमादिभिस्साकं हास्तिनं पुरं प्रति प्रातिष्ठत।

९

आशा हि परमं दुःखं निराशा परमं सुखम्। आशाश्रृङ्खलया बद्धा नराः पूर्वापरचिन्तनेनापि विना धावन्ति। पार्श्वतः तेषां तया बद्धानां दृष्टिः नैव प्रसरति। आशया मुक्तास्तु पङ्गवः। चलनं तेषां कस्यामपि दिशि न प्रवर्तते। केशाः

जीर्यन्ति। दन्ताः जीर्यन्ति। सामार्थ्यविहीनानि चक्षुःश्रोत्रादीनि जीर्यन्त्येव। तेषामायुः मितिश्च परिमिता। आशा न जीर्यते। तस्याः मितिश्च कुत्रापि न दृष्टा। यौवनाश्वः जरद्गवामुदाहृत्य तृष्णायाः आधिक्येन तस्याः धर्मे भगवति च अनासक्तिं भीमाय व्यवृणोत्। तृष्णायाः त्यागादेव जीवन् सुखमाप्नोतीति ववार। सः ससैन्यः साश्वः हस्तिनावतीं पुरीं प्रतिनिर्ययौ। पवनात्मजः वृषकेतुं राज्ञा यौवनाश्वेन साकमागन्तुमाज्ञाप्य तस्य अनुज्ञां च प्राप्य तस्यागमनं धर्मराजाय सूचयितुं निरगात्। सहसा समागतं भ्रातरं भीमं वीक्ष्य धर्मजः तस्यानामयं पप्रच्छ। विदितोदन्तः तं समालिङ्ग्य धर्मराजः साश्वं समागमिष्यन्तं यौवनाश्वं सपरिवारं प्रत्युद्गम्य सम्मानयितुं पुरप्रमुखानवादीत्। भीमादीनां साहसं श्रुत्वा अतीव मुमुदे। द्रौपद्याः रुक्मिण्यादीनां च संदर्शनाय समागच्छन्तीं यौवनाश्वस्य पत्नीं, तथा इतरांश्च श्रुत्वा ताभ्यः व्यवस्थां कर्तुमादिदेश। भीममेव द्रौपदीं प्रभावत्यादीनामागमनोदन्तेन तोषयितुमसूचयत्।

द्रौपदी समागतं भीमं स्वागतोक्त्या अभिनन्द्य निजासनं दत्वा पार्श्वतः उपावेशयत्। क्षणमात्रं वीक्ष्य तं कुशलमपृच्छत्। वृषकेतोः मेघवर्णस्य च कुशलमप्राक्षीत्। तथा ब्रुवन्ती द्रुपदात्मजामभिनन्द्य भीमः सर्वमितिवृत्तं संग्रहेणाब्रवीत्। तुरगस्य सम्पादने कृतं प्रयत्नं वव्रे। वृषकेतोरुपचारेण लब्धसंज्ञः यौवनाश्वः कथमायोधनं संस्तभ्य मित्रैः वसुभिः अश्वेन सम्राज्ञ्या पद्मावत्या च साकं हस्तिनावतीं प्रति प्रस्थितः इत्युक्त्वा धर्मराजेन सूचितमादेशं च प्रावोचत्। असंदृष्टः गोविन्दः कुत इति कृष्णामपृच्छत्। तया अन्तर्गृहे कृष्णं वर्तमानमजानाच्च।

भवनद्वारे तिष्ठन्तं परमपुरुषं धर्मराजादीन् च वीक्ष्य यौवनाश्वः रथादवरुह्य वृषकेतुं तुरगं च पुरस्कृत्य तानुपससार। यौवनाश्वः कृष्णं ववन्दे। धर्मराजं नमश्चकार। तुरगं राज्ञे समार्पयत्। तुरगं धन्यमब्रवीत्। दिव्येषु भवनेषु सर्वे स्थापिता अभूवन्। प्रभावती चान्तःपुरं गत्वा द्रौपदीं, रुक्मिणीं, कुन्तीं च कुशलमाभाष्य आत्मानं धन्यममनुत। यौवनाश्वे समागते कञ्चित्कालं तत्रोषित्वा देवकीनन्दनः द्वारवतीं गन्तुमियेष। धर्मराजस्यानुमतिमलभत। पार्थं सखायं भीमादीन् च प्रोच्य ततो निरगात्। व्यासमहर्षिः तत्रागमत्। यौवनाश्वं चाभिनन्द्य धर्मजं यागमण्डपं कारयितुमादिदेश। यागमण्डपरचने तज्ज्ञान् नियोज्य धर्मनन्दनः धर्मसूक्ष्मान् अधिकृत्य पूज्यं व्यासमहर्षिं चाप्राक्षीत्। तेन गदितानि सर्वाणि विदित्वा परां तुष्टिमगात्।

## 10

धर्मजिज्ञासुः युधिष्ठिरः मूर्तिमान् धर्म एवासीत्।। यक्षप्रश्नोत्तरप्रदाने असमर्थेषु भ्रातृषु दीर्घसुप्तेषु, तेन यक्षरूपेण पित्रा धर्मेण धर्मसंवादे विजयी आसीत्। वारं वारं विदुरेण समालोचनं कृत्वा धर्मसूक्ष्मान् जानाति स्म। शरशयने मृत्युमुखे स्थितेन पितामहेन गाङ्गेयेन सुदीर्घं चर्चया धर्मस्य स्वरूपमविन्दत च। ध्यायं ध्यायं तस्य ज्ञानतृष्णा अवर्धत एव। तस्याः पारं न संददर्श। पदे पदे संदेग्धि स्म। भगवति व्यासे समागते पुनरपि तेन साकं विविधान्विषयान् ज्ञातव्यान् पृष्ट्वा प्रत्युत्तरं चालभत।

परेद्युः सुप्रभाते महर्षिस्तं धर्मनन्दनं कृष्णमानेतुं भीमं द्वारवतीं प्रेषयितुमवोचत्। युधिष्ठिरः भीमाहूय विनयावनतशिरसं तं " भ्रातः! द्वारकां गच्छ। गोविन्दं पुत्रपौत्रैर्युतमत्रानय। यशोदां देवकीं रुक्मिणीं सत्यभामां अन्याश्च संप्रार्थ्य ता सर्वा अत्रानय' ' इति जगाद। भीमः अग्रजं, व्यासं महर्षिं च प्रणम्य द्वारवतीं प्रति निरगात्। देशान् बहून्मार्गे अत्यक्रमात्।

मनोहराणि काननानि फलपुष्पभरितान्यपश्यत्। सरितः बह्वीः ततार। द्वारवतीं दूरतः दृष्ट्वा प्राणंसीत्। भगवतःवासुदेवस्य सान्निध्येन वर्धितशोभा पुरीं दृष्ट्वा प्रमोदमतुलं लेभे। धन्यान् भगवतः सेवैकतत्परान् गोगोपगोपीजनान् अक्रूरादीन्महाभक्तान् पशुपक्षिमृगादींश्च ध्यायं ध्यायं कृष्णं जगत्पतिं मनसा ववन्दे। गोपुराद्बहिः दिव्यं सरः अपश्यत्। तस्मिन् अस्नात्। कालिकाननुष्ठानादीन् समापयत्। पुरं प्रवेष्टुमुपचक्रमे।

भगवतः कृष्णस्य मन्दिरम्। मध्याह्नसमयः। देवक्याः मातुः प्रीत्यै भगवान् भोजनायोपविष्टः। देवकी पुरतः वर्तमानं भक्ष्यं, भोज्यं, पानीयं, फलं सर्वाणि च क्रमशः विवृत्य विवृत्य परिवेषयति स्म। काञ्चननिर्मितेषु विविधाकारेषु पात्रेषु शर्करायुतं पायसं, अन्नं नानाविधं, नानाव्यञ्जनसंयुक्तं, जम्बीररसेनार्द्रं, मरीचिपिप्पलीभिः मिश्रितं रम्भाशर्करया युतं, दुग्धेन संसृष्टं प्रीत्या प्रार्श्वोपविष्टयायशोदया प्रदत्तं स्वीकरोति स्म। पूरिकाः, द्राक्षायुताः प्रलेहिकाः, वर्तुला मण्डका, मधुना परिवेषिताः। मध्ये मध्ये घृतं यशोदा सिञ्चति स्म। सौहालिका पूरिकाः पात्रे आसन्। वेष्टिकाः (जिलेबि) शतच्छिद्राः अदुः। क्षीरविकाराः अपूपिकाः, कर्बुरा, पर्पटाः, माषकूष्माण्डयुताः प्रदत्ताः। रम्यान्वटकान् शुक्ललवणस्योपयोगेन कृतान् स्व्यकरोत्। बह्व्यः पेडारिकाः, मोदकाः, चणकाः, नानारसयुताः परिवेषिताः अभूवन्। तान् सर्वान् कृष्णः बुभुजे। पत्न्यः सर्वाः परवार्योपविशन्त्यः तेन साकं सरसेन सम्भाषणेनअभुञ्जत। कथाः ब्रुवन्त्यः, परस्परं पश्यन्त्यः पारिजातादिपुष्पाणि धारयन्त्यः, भर्तुः कृष्णस्य मनस्सन्तोषमुत्पादयामासुः। सत्यभामा पूर्वे वयसि यद्दृष्टमासीत् तत् कथयति स्म। देवकी स्वानुभवं वर्णयति स्म। यशोदा तस्य बालचेष्टितानि स्मारयति स्म। रुक्मिणी तस्य पाण्डवेषु सक्तं मनः विवृण्वन्ती ताम्बूलं समर्प्य व्यजनेन वीजयामास। सत्यभामायां तेन पुनरपि सम्भाषणं कर्तुमारब्धवत्यां रुक्मिण्याः वचनमनुमृत्य भीमस्तत्रागात्। कृष्णः तमायान्तं विदित्वासैरन्ध्रीमाह्वयत्। तस्य भीमस्य भोजनसमये तत्रागमनं कञ्चित्कालं वारयितुं प्राकृतवत् ऐच्छत्। तस्य उक्तिप्रत्युक्तीनां श्रवणेनात्मानं तोषयितुं, तेषु पाण्डवेष्वभिमानविशेषं प्रकटयितुं चापेक्षामास। कृष्णस्य सन्देशेन साकं सैरन्ध्री ततो निरगात्, भीममवोचच्च।

११

दासी वृकोदरमुपसृत्य तस्य प्रवेशं न्यरुणत्। भीमः,' 'कृष्णेन स्वस्य प्रवेशः प्रयत्नपूर्वकमेव निवारितः '' इति मेने। आगतमात्मानं परित्यज्य किञ्चित् कारणं निमित्तीकृत्य सः भोजनं कुरुते इति जज्ञे। सैरन्ध्रि, महत्या पर्याप्तया वृष्ट्या देशोऽयं सुभिक्ष एव। कथं मामागतं निराकृत्य भुङ्क्ते। किं देवकी मृताः? सत्यभामा दिवमगात्? उत कृष्णस्य पुत्राः पौत्राः राक्षसेन हृताः? अथवा निषिद्धं स्त्रीभिस्सार्धं भोजनं स कुरुते।। ब्रूहि'' इति तामप्राक्षीत्। कृष्णस्तस्य वचनान्यश्शृणोत्। फेणिकानां चर्वणस्वनमकरोत्। पर्पटानां शब्दः महान् कृतः। 'प्रपिबन् कथिकां शब्दं घण्डिकाघटनिस्वनम् अकुरत। कृष्णस्य ओष्टपटुस्य रम्यं शब्दं बहिस्थः वृकोदरः शुश्राव। तक्रं पीत्वा भोजनांते कृतेनानेन क्वथितशब्देन भीमः विस्मितोऽभवत्। तथा शब्दं कुर्वतां नासाच्छेदः करणीयः इत्यवोचत्। शब्दः विरराम। भीमः सैरन्ध्रीमपृच्छत् ''किं भोक्तुः कण्ठे वटकः लग्नः'' इति। पुनरपि प्रालपत्। '' न, न, न तथा मया चिन्तनीयम्। तस्य भोक्तुः अप्राकृतपुरुषस्य कण्ठे महीधराः सन्ति। जीवाः प्रतिक्षणं निरर्गलं विशन्ति। एवं सति वराकस्यवटकस्य तत्र का गणना। गोविन्दः! मा मा कुटुम्बं प्रभक्षय। दूरदेशात्तवान्तिकमागतं मां चाभ्यासबलेन एवमेव मा भक्षय। यदि

मां भक्षयसि नाहमधोगामी। तव शिरः प्रविश्य चराचराणि वीक्षे। पाण्डवभक्षकं त्वां प्रकटयिष्ये! " पाण्डवाः मम प्राणाः "इति तव वचनं असत्यं स्यात्। धर्मराजस्याज्ञया अत्रागतं मां तव दासं विजानीहि इति!

देवकीनन्दनः भीमाय स्वागतमवादीत्। भीमं भोक्तुमसूचयत्। भीमस्तु ' 'त्वयि जगन्नाथे तृप्ते वयं तृप्तिं च परमां प्राप्तवन्त" इत्युक्त्वा तिरोकरोत्। कृष्णस्तु पाण्डवेष्वात्मनः प्रीतिमतुलां प्रतिज्ञाय भीमं च भोजयित्वा तस्यागमननिदानमप्राक्षीत्। पार्श्वस्थं कृतवर्माणमाहूय दुन्दुभेस्ताडनायासूचयत्। अक्रूरप्रमुखाः मुख्याः, प्रद्युम्नानिरुद्धादयः सर्वे हास्तिनं पुरं गच्छेयुरित्याज्ञापयत्। रुक्मिण्यादयः सर्वाश्च वध्वः सन्नद्धाः अभूवन्। दुन्दुभेः स्वनमनुसृत्य पुरप्रमुखा जनाः मन्त्रालोचनसभायाममिलन्।वासुदेवस्तेभ्यः सर्वेभ्यः युधिष्ठिरेण करिष्यमाणं हयमेधक्रतुं विवृत्य दृष्टुं तं सर्वे गच्छेयुरिति प्रोवाच। कृष्णस्यादेशे स्थिताः नानावृत्तिविचक्षणाः ससम्भाराः सपरिवाराः प्रययुः। द्वारकापत्तनमेव क्रमतीव भासते स्म। शकटैः गच्छद्भिः पदा क्रमद्भिश्च मार्गः आक्रान्तः आसीत्। सखीजनपरिवृता काचन शंभली वृषभारूढा अवर्तत। सा कृष्णं परिहसन्ती "अविवेकी हरिः कृष्णः व्यर्थं श्रमं सर्वेभ्यः प्रदास्यति। स च वित्तप्रदानं विना भक्तानां वित्तं हरति" इति अभिप्रैत्। मार्गे कंचन दासेरकं वीक्ष्य तयारूढः वृषभः तां पातयित्वा पलायत। तथाविधां तां समालोक्य सैनिकाः सखीजनाश्च प्राहसन्। कृष्णनिन्दायाः फलमित्यवदन्। सा शम्भली पुनरुत्थिता सती कृष्णं विलोक्य वृषं पुनरारोह। कृष्णस्यस्मरणेन मम पुनः वृषभमारोढुं शक्तिः सम्पादिता इति वदन्ती कृष्णस्मरणपूता महिमानं प्राकाशयत्। पतिता अपि कृष्णस्य स्मरणेन पूता भवन्तीति चकितेभ्यः वृषभात् पतितायाः आत्मनः परिहसनाय परिवृतेभ्यः व्यवृणोत्।

१२

धर्मराजस्य क्रतुं दृष्टुं प्रस्थिताः कृष्णप्रमुखा यादवाः मध्याह्नसमये विश्रान्त्यै अतिष्ठन्। मालाकारी काचन तं देवकीनन्दनमुपससार। कृष्णाय पुष्पहारं समार्पयत्। तैलान्विता अन्या तमुपसर्प्य तैलं प्रादात्। कृष्णस्तस्या वचांसि आहत्य तैलं च स्व्यकरोत्। भीमः कृष्णं परिहसितुमैच्छत्। सरसं सम्भाषणमारभत। कृष्णमवोचत्। "कृष्ण! नान्यथा भावय। सर्वाः एताः योषितः त्वामेव पतिं मन्यन्ते। मालाकार्योः, तैलकार्योः शम्भल्याश्च त्वयि प्रीतिरतुला। ताः स्वासां पतीन्नैव परिगणयन्ति" इति विनोदमकरोत्। कृष्णस्तु तं प्रतिवदन् "ताः पौरुषं चेत् ग्रहीतुमवोचत्। स्थूलोदरस्य भीमस्य ताः अर्हा इति अहसत्। "रुक्मिण्यादयः भार्याः साध्व्यः, कृष्णैकमानसाः। नेर्ष्यां ताः करिष्यन्ति। सपत्नीनामन्योन्यं नान्यत्र वर्तते " इति कृष्णं भीमः चास्तावीत्। अपि च ' 'हे कृष्ण!

साधवो यत्र तिष्ठन्ति तत्र वासश्च ते सदा।

किमत्र चित्रं गोविन्द दुष्टे चित्तं निवेशय।

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।

अपकारिषु यः साधुः स साधुः सद्भिरुच्यते

समदृष्टिर्भवाशु त्वं सर्वभूतेषु केशव' ' इति।।

यादवाः पुरतो ययुः। मार्गे कृष्णः महत्सरः सन्ददर्श। रमणीयं तं प्रदेशं दृष्ट्वा परां तुष्टिमाप। भार्याभ्यः तत् सरः, तत्र पुष्पाणि भ्रमरैस्सेवितानि च विवृण्वन् तत्रैव रात्रिं यापयितुमैच्छत्। तस्यापेक्षामादृत्य कृतवर्मा सर्वां व्यवस्थामकार्षीत्। पशुपालकास्तत्र वर्तमानं गोपालं श्रुत्वा आजग्मुः। प्रीत्या तस्मै प्रणतिपूर्वकं दध्योदानम् फलपुष्पाणि च प्रादुः। आत्माभिरक्ष्यमाणाः गाः प्रादर्शयन्। कृष्णं समागतं ज्ञात्वा स्वग्राममार्गं त्यजन्तः ताः अत्रागच्छन्तीति ऊचुः। प्रहीषत्या तेन साकं भाषमाणाः गोपालाः तस्य तत्र सपरिवारमागमनं कुत इत्यपृच्छन्। गोपालानां स्त्रियस्तासां क्रियमाणानि गृहकृत्यानि विसृज्य कृष्णमागतं द्रष्टुममिलन्। काचन धृतां पुष्पमालामेव तस्मै आर्पयत्। काचनान्या समानीतं नवनीतं प्रादात्। तस्य जगत्पतेः वदनारविन्दे भुवनत्रयं संद्रष्टुमैच्छत्। अन्या धावन्ती समीपमुपसृत्य पादौ दृढं प्रगृह्य नमश्चकार। कृष्णः ततः प्रस्थाय कालिन्दीनदीतीरमगमत्। तत्र निवासमकरोत्। सर्वेषु भुक्तेषु कालिन्द्याः नद्यातीरे समुपविश्य कृष्णः बान्धवान् सुहृज्जनान् सर्वानाह्वयामास। सर्वेषां हस्तिनापुरे यागसमये कर्तव्यानि व्यवृणोत्। स्वानुरूपं कर्तव्यमाज्ञप्तमिति ते तुष्टा अभूवन्।

भगवान् देवकीसुतः तेभ्यः कर्तव्यस्य निर्देशेन तान् सर्वान् तत्रैव स्थातुमाज्ञापयामास। तेषां संरक्षणे भीमं चादिदेश। हयमारुह्य एकाकी धर्मजस्य संदर्शनाय हस्तिनावतीं जगाम। नागरास्तमायान्तं वीक्ष्य प्रत्युद्गम्य स्वागतमब्रुवन्। द्विजास्तस्मै स्वार्जितं सुकृतं सर्वं प्रादुः। यतयः तत्र मिलिताः "नारायणस्त्वमात्मनाऽसि नमस्कृतः। नारायणेति हि गिरास्माभिर्वक्तुं न पार्यते। यतो वाचो निवर्तन्ते स भवान् पादयोर्नतः। वेदान्तवेद्यमभयं प्रत्यक्षं त्वामुपास्महे " इति शरणमगमन्। तान् सर्वानाश्वस्य कृष्णः राजमार्गे जगाम। प्रासादस्थाः चारुलोचनाः योषितः अश्वारूढं पुंसां मोहनरूपं गोविन्द वीक्ष्य आत्मानं धन्यं मेनिरे।

१३

आयान्तं मधुसूदनं श्रुत्वा पौराः अहमहमिकया अमिलन्। अङ्गनाः तं परिवार्य तस्थुः। तस्य हृदयं जेतुं परस्परं चिकीर्षन्ति स्म। षोडशस्त्रीसहस्राणां भर्तुः तस्य संगत्या सकामा अपि तेन निर्मुक्ता भविष्यामः इति ताः निश्चितवत्यः। तं नमश्चक्रुः। तेन तोषिता अभूवन्। संतृप्ताभिस्ताभिः विसृष्टः सः पुरः अगच्छत्। बन्दिनः कृष्णमागतं सच्छ मिलिता आसन्। तेषां नायकः इतरान् तस्य संदर्शनेन अर्थिनामस्माकं सर्वेषां भवदैन्यं गमिष्यतीति सूचयति स्म। ' 'कृष्णवैद्यः समागतः। स एक एव भवरोगस्यौषधप्रदाता, नान्यः इति मित्राण्यवदत्। अस्य नामग्रहणं कर्तव्यम्। नामानि तस्य सुबहूनि वर्तन्ते। नाम्नः महिमानं ज्ञातुं महर्षयश्चासमर्थाः। तस्य पौरुषस्य प्रतिपादकाः मीनकूर्मकोलादिभिः रूपैः अवतीर्य कृताः कथाः। धर्मसंरक्षणार्थाय दुष्टशिक्षणायैवावतरिष्यतः तस्य संदर्शनेन पूताः भवामः " इति बन्दिनां नेता वदति स्म। तस्य कृष्णस्य नामानि श्रोतुं तेषु कश्चनापेक्षामास। रामनाम्ना प्रसिद्धं तं गोपालगोविन्दादिभिः अभिधानैः भक्तजनहृदुल्लासकरं सः नेता पृच्छतेऽन्यस्मै प्रत्यपादयत।

तेषां सम्भाषणकुतूहलेन कृष्णः शृणोति स्म। तस्य वचोभिरतीव सन्तुष्टः स्वकण्ठात् हारमवमुच्य तस्मै प्रादात्। भगवान् देवकीनन्दनः एवमेवान्यैः पौरैरभिनन्दितः पुरो गच्छन् धर्मराजस्य मन्दिरं प्राविशत्। धृतराष्ट्रं, विदुरं, कृपं च

ददर्श। तान् सर्वान् नमस्कृत्य पर्यष्वजत्। पार्थः समीपमागत्य अनुजाभ्यां प्राणंसीत्। कुन्तीं नमस्कृत्य द्रौपदीं चाश्वास्य कृष्णः आसने समुपाविशत्। धर्मराजस्तं सुखोपविष्टं कुशलमपृच्छत्।

कृष्णः धर्मजं यादवान् वसुदेवप्रमुखानागतानब्रवीत्। गंगायास्तटे भीमस्य रक्षणे वर्तमानान् तानवोचत्। आत्मनः धर्मराजस्य तस्य दर्शने अतीव कुतूहलं अग्रे आगमनस्य निदानमित्यब्रवीत्। धर्मराजः पार्थं पुरुस्कृत्य झटिति ततः यत्रवासुदेवादयः अवर्तन्त तत्र गन्तुं सर्वानाज्ञापयामास। द्रौपद्यादयश्च देवकीं कृष्णभार्याश्च संद्रष्टुं निर्जग्मुः। कृष्णेन साकं धर्मराजः प्रातिष्ठत।

नगराद्बहिः धर्मराजः देवकीमपश्यत्। नमश्चकार। भीमः अग्रजमागतं वीक्ष्य तस्मै ववन्दे। परस्परं सर्वे संतुष्टा अजायन्त। ते परस्परं कुशलसम्भाषणमकार्षुः। द्रौपदी कृष्णभार्याः सर्वाः प्रणम्य परस्परं साम्प्रदायिकरीत्या पर्यचाययत्। द्रौपद्यां यशोदां देवकीं नमस्कुर्वत्यां सत्यभामादयः तां द्रुपदराजतनूजां पर्यवारयन्। तस्याः पातिव्रत्यप्रभावेणैव धर्मराजादयः महाभारते युद्धे जयं प्रापुरित्यवदन्। सत्यभामा द्रौपद्या सम्भाषणं पार्थक्येन चिकीर्षन्ती तया सहान्यत्रागात्।

14

सत्यभामा द्रौपद्या साकं पृथक् समालोचनमिच्छन्ती स्मितपूर्वमाबभाषे। ' 'कल्याणि! पञ्च ते पतयः सन्ति। सर्वे त्वया निरन्तरं वश्याः कृताः। जगत्पतिः कृष्णः एक एवास्माकं पतिः। तं वशीकर्तुं नास्माभिः शक्यते। स चैव परमपुरुषः त्वया वशीकृतश्च। तस्य भगिनी त्वं कथं तस्य हृदयं प्राग्रहीः। स च त्वं क्षणमपि परित्यक्तुं नेच्छति। त्वमपि भ्रातरं त्वं सदा ध्यायसि। पञ्चभिः पतिभिः साकं तं देवकीतनयं कथं हृदये बद्धवती असि। तस्मिन् अतुलां प्रीतिं प्रकटयन्ती त्वं कस्मात् अपि न बिभेषि। अस्माकं वा भीतिः न दृश्यते त्वयि। त्वत्तः एतेषां विवरणं श्रोतुमीप्से' ' इति।

द्रौपदी तां भामां श्रुत्वा प्रत्युदतरत् ' 'कृष्णप्रिये! तव मनः सर्वदा सपत्नीमेव अधिगच्छति। जगतां सर्वेषां पतिं वासुदेवं पूर्वेषां जन्मनां फलरूपेण प्राप्य तं कृष्णं व्यर्थं सर्वदा शङ्कसे। कृष्णश्चासकृत् त्वयापमानितः। दुर्योधनः सभामध्ये वस्त्रस्यापकर्षणेन मां पतीनां च पुरतः निर्वस्त्रां कर्तुमैच्छत्। लज्जां विहाय, शङ्कया च विना मां कृष्णाय भगवते आर्पयम्। कोऽन्यः तेन विना अक्षयवस्त्रप्रदानेन रक्षितुं समर्थस्तदा आसीत्। मम भ्राता सः बहूनां पश्यतां सन्निधौ कृष्ण इति मम वचनेन आकृष्टः तस्मिन्नेव न्यस्तभरायै मह्यं वसनानि प्रादात् ननु। कंसचाणूरमर्दनः त्वयि प्रीत्या त्वां च तोषयितुं देवराजेन विग्रहं कृत्वा पारिजातं वृक्षमानीय तुभ्यं प्रादात्। तथाविधं पुराणपुरुषं भर्तारं त्वं नारदाय प्रादाः। देवद्विजगुरूणां निधिस्सः। तस्मिन् पार्श्वस्थे अपि त्वया आत्मा तस्मै न समर्पितः। नारदश्च गर्ह्यः एव। त्वया प्रदत्तं जगन्नायकं कथं सः प्रत्यर्पयत्। कृष्णादप्यधिकं किं सः त्वया लब्धवान् इति न जाने। एष एव द्विजानां मतिः। विप्राः अनेनैव पश्चिमबुद्धय इति प्रथिताः।

सत्या मात्सर्यं विना तया द्रौपद्या प्रोक्तां श्रुत्वा तुतोष। तां ववन्दे। तया साकं तुरगं वीक्षितुमगमत्। देवकीसहिताः ताः वीक्ष्य कृष्णः तासामपेक्षां राज्ञे धर्मराजायासूचयत्। तासां तुष्टिं चापेक्षमाणः सः धौम्यमाहूय तुरगाय पूजां

कर्तुमसूचयीत्। सर्वाभिः ताभिश्च सः तुरगः पूजितोऽभवत्। नृत्यमानं हयरत्वं पश्यन्तस्सर्वे जनास्तत्र मिलिताः हृष्टा आसन्।

महता परिवारेण युक्तः अनुशाल्वः तत्रागमत्। जनार्दनं वीक्षमाणः सः अनुशाल्वः शाल्वस्य वैरं स्मरन् हयमग्रहीत्। हयं पृष्ठे कृत्वा सैन्यं गृध्रन्येन संस्थाप्य सचिवं सुरथमाह्वयत्। अब्रवीच्च "सुरथ मम भ्रातरं सौभं कृष्णः जघान। सः कृष्णः अत्र वर्तते। धर्मराजेन यज्ञार्थमाहूतः स सपुत्रपौत्रः अत्रागतः। मदीयामेनां सेनां स्थिरं पालय। अहं गोविन्दं पार्थं च गृह्णामि। धर्मराजस्य बलं भीमादयः पालयन्तः सन्ति। संग्रामे करिष्यमाणे कृष्णः  पार्थश्च यथा न वर्तेते तथा करिष्ये। कृष्णं यः मोचयितुं प्रयतिष्यते तमहं यः कोऽपि वा भवतु, पातयिष्ये। जनार्दनस्य ग्रहणप्रयत्नं विना ये युध्यन्ते कुत्सितास्ते। कृष्णविमुखैः भृत्यैः युद्धं क्रियताम्। अरिभिः सार्धं युद्ध्यमानेभ्यःवसु दास्यामि" इति। एवमुक्त्वा सः यौवनाश्वेन यागायानीतं हयं दूरतो निनाय।

15

इतिहासपुराणेषु भगवतः प्रग्रहणे कृताः प्रयत्नाः बहवः श्रुताः। दुर्योधनः दौत्येन सभायामागतं हरिं भ्रातृभिस्सार्धं बन्धुमैच्छत्। सत्यभामादयः भार्याः अपि तं कृष्णं प्रीत्या हृदि स्तम्भयितुं बह्वयतन्त। ध्रुवं तं हृदि प्रतिष्ठापयितुमपेक्षमाणा सा नारदस्योक्तीः विश्वस्य तस्मै प्रादात्। किं त्रयाणां जगतां पतिरथ धर्तुं शक्यते? नारदः पुनरपि सत्यभामायै तं न्यवर्तयत्। ध्रुवः तं भक्त्या विजित्य तस्यानुग्रहपात्रं भूत्वा राजते। बलिरपि एवमेव तस्यैव परमपुरुषस्य रक्षणे स्थास्यते। प्रह्लादविभीषणौ कृष्णं नारायणं हृदये रुद्ध्वा तं वेत्तुं कृतप्रयत्नौ। केचन नारायणं नारदवशगं ब्रुवन्ति। तत् सर्वथा मिथ्या। भक्त्या भगवन्तं केचन आराधयन्ति। द्विषन्तः केचन रावणादयः तं तोषयितुमिच्छन्ति। भक्त्या तस्यानुग्रहः पदप्राप्तिश्च विलम्बेनैव। तस्य क्रोधमेव चिकीर्षमाणाः रावणकुम्भकर्णहिरण्यकशिपुप्रमुखाः। विलम्बं विना परमं पदं प्रापुः। अनुशाल्वस्तथाविधः। स्वस्य भक्तिं तस्मिन् प्रकटयितुं साधनमकार्षीत्। तस्य प्रीतिमेव कामयमानः सः तस्य पदं प्रापयितुं समानं पराक्रमिणं वरयितुमपैक्षत। झटिति तुरगं सर्वेषां पुरतः प्रगृह्य हाहाकारं संजनयामास। अलंकारमण्डितान् दिव्यायुधधारिणः वीरान् गृध्रव्यूहेन स्थापयित्वा स्वयं श्वेतातपस्याश्रये विरराज। रथाः प्रणेदुः। पदातयः महान्तं निस्वनमकार्षुः।

तुरगस्य रक्षणे स्थिताः पार्थं कृष्णं च नापश्यन्। तुरगश्च न दृष्टः। कथं तुरगः नीतः। रक्षकौ कृष्णपार्थौ क्व गतौ इति हाहाकारमकार्षुः। सर्वज्ञः सर्वान्तर्यामी कृष्णः ज्ञातपरिस्थितिरपि अश्वस्यादर्शनाय लज्जां प्राकटयत्। दारुकेणानीते रथे समुपाविशत्। पाञ्चजन्यं दध्मौ। धर्मराजमुवाच "अनुशाल्वेन हयः अपहृतः" इति यादवेषु अस्मास्वत्र स्थितेषु, सर्वासु स्त्रीष्वत्र पश्यन्तीषु तेन हयः अपहृत इति त्रपां सूचयामास सात्यकिं, कृतवर्माणं, प्रद्युम्नतनयं, यौवनाश्वं, मेघवर्णं नकुलं सहदेवं च धर्मराजस्य रक्षणे न्ययोजयत्। स्वयमेव चतुरङ्गबलेन वीरैः पार्थप्रद्युम्नवृषकेत्वादिभिः सार्धं अश्वमानेतुं निरचिनोत्। वीटकं वीरेभ्यस्तेभ्यः 'प्रदश्यं वीरः गृह्णातु इति निरदिशत्। वीराः मूकास्सन्तः तूष्णीं तस्थुः। न कश्चन वीटिकस्य स्वीकृत्यै आजगाम। वीटकः मुहूर्तमात्रं कृष्णस्य करे एवावर्तत। ततः प्रद्युम्नः पुर आगत्य वीटकमग्रहीत्। प्रतिज्ञामकरोत्। मीनध्वजं दिव्यं रथं आत्मनः वीर्यं विश्वस्यारुरोह। कृष्णः पुनरपि द्वितीयं वीटकं

गृहीत्वा वीरमन्यं पुर आगन्तुमसूचयत्। तं प्रद्युम्नसहितं गन्तुमियेष। वृषकेतुः वीटकं चागृह्णात्। अनुशाल्वं प्रगृह्य कृष्णस्य सन्निधिं प्रापयिष्ये इति वृषकेतुः प्रतिजज्ञे। कृष्णहस्ताद्वीटकं स्वीकृत्य तं जगत्पतिं नमस्कृत्य अनुशाल्वेन रचितं गृध्रव्यूहं भेत्तुं प्रद्युम्नेन साकमगात्। घोरं युद्धमकार्ष्टां प्रद्युम्न-वृषकेतू। अनुशाल्वः आजगाम। प्रद्युम्नं पर्यहसत्। त्रिनेत्रनयनाग्निना दग्धमनङ्गं जगाद। कृष्णह्रदे प्रविश्य तपसि स्थितानामाश्रमान् विहाय वीराणां युद्धरङ्गप्रवेशः तव नोचित इत्यब्रवीत्। विवेकरहितानां पतिव्रतानां सन्निधावेव तस्य स्थानं युक्तमिति अपाहसत्। प्रद्युन्मः तस्य वचांस्यनादृत्य बाणान् मुमोच। तान् बाणान् वीरः अनुशाल्वः मध्येमार्गं चिच्छेद। बाणं चान्यं प्रयुज्य प्रद्युम्नं वक्षस्यताडयत्। तेन मूर्छा गतः सः कृष्णस्य पादसन्निधौ न्यपतत्।

१६

कृष्णः प्रद्युम्नं मूर्छितमपश्यत्। लज्जितो बभूव रथादवततार। पुत्रस्य समीपमगात्। महता क्रोधेन पदातमताडयत्। प्रावोचत् "मूढ नैषा द्वारवती पूः। न च क्रीडास्थानम्। त्वां पुरस्कृत्य गच्छतो मम भविष्यति लज्जा एवावशिष्टा। वीरवत् त्वया क्रियमाणेन एतादृशेनाभिनयेन अवमानितोऽस्मि। शम्बरात् त्वामरक्षम्। स च व्यर्थोऽभवत्। अतः वनं याहि। फलादो भव। जनमध्ये तव वासस्तु नोचितः " इति बहुधा तमगर्हत्। भीमः प्रद्युम्नं मूर्छितं ततोऽन्यत्र निनाय। "नायं प्रद्युम्नः भयात् भग्नः। अपि तु बाणाघातादत्रागतः। क्रुद्धेन त्वया कृतं पादताडनमस्थाने। कृष्ण! हृदये पौरुषं निवेशयता त्वया जरासन्धे समागते किमर्थं पुरी विसृष्टा। जरासन्धात् भीतेन त्वया सागरस्यैव तीरे पुरी प्रतिष्ठापिता ननु। त्वं सर्वेषां सुखदः। सत्यम्। परदुःखं कथं त्वया ज्ञायते " इति कृष्णं भीमसेनः सान्त्वयामास। कृष्णस्तु अनुशाल्वेन योद्धुं भीमं प्राहिणोत्।वृषकेतुः घोरं युद्धं करोति स्म। भीमस्तु प्रद्युम्नेन लब्धप्रज्ञेन सह तत्र जगाम। कृष्णस्य वचोभिः वर्धितपराक्रमः सः भीमः पदातिस्सन्नेव युयुधे। युद्धं अनुपममवर्तत। कर्णपुत्रः वृषकेतुः भीमेन क्रियमाणमायोधनमपश्यत्। भीममुपसृत्य सप्रश्रयमुवाच "तात! बालके मयि प्रीत्या संग्रामं प्रविष्टोऽपि। त्वदन्यः कः एवं करिष्यति। तव सामर्थ्यस्य पुरतः ईदृशानां सेनानां सहस्राण्यपि न पर्याप्तानि। संग्रामस्यास्य विजयफलं मम भविता। मत्तः त्वया फलं चैतत् गृहीतमिति मन्ये। एवं जनाः तव मम चापयशसे एवं वक्ष्यन्ति भविष्यति। अल्पामिषं फलं त्वया त्याज्यमेव ननु। केसरी क्षुधा पीडितोऽपि गजं विना न कदाचिदपि सर्पं खादति' ' इति।

भीमस्तु वृषकेतुमभिनन्द्य स्वयमेव फलं तथाविध वृषकेतवे दातुमपेक्षामास। अनुशाल्वं प्रत्यभिजगाम। अनुशाल्वस्तु आयान्तं वृकोदरं वीक्ष्य बाणेन तस्य वक्षस्यताडयत्। तेन बाणेन विद्धः मूर्छां प्रापत्। भूमौ पपात च। कृष्णः क्रुद्धः सन् स्वयमेव दारुकेणानीते रथे उपविश्य प्रातिष्ठत। अनुशाल्वः गरुडध्वजं गोविन्दमायान्तमपश्यत्। मधुसूदनं पर्यहसत्। "हे गोविन्द! त्वया मम बन्धुः सौभः निहतः अभवत्। तदा तस्य पार्श्वे अहमासम्। तव सन्निधावेव मया च तव पुत्रः पातितः। मया बिद्धः भीमश्च त्वयि पश्यति अपतन्ननु। अहं युवा, त्वं पुराणपुरुषः। आवां युद्धेऽमुष्मिन् न समानौ। त्वयि मया विना पलायमाने, किं भवेत्। सतां मनः कथं स्यात्। त्वयि पराजिते कोऽन्यः युद्धे मां जेतुं शक्नोति। एतावदुक्त्वा अनुशाल्वः शरैस्तस्य रथस्य हयान् विव्याध। कृष्णः अदृष्टोऽभवत्। अनुशाल्वः सन्देग्धि "कृष्णः मया दृष्टः आसीत्। कुत्र सह निरगात्। किमर्थं सः अदृश्यतां गतः। आत्मनि कृतं दुष्कृतं किमपि न वेद्मिः। मदीये राज्ये

किं केनाप्यन्याय्यं कृतम्। केशवं रणभूमौ कुत्रापि न पश्यामि। कं पृच्छामि। मया कृतं सुकृतं यदि वर्तते तर्हि तत् हरिं दर्शयतु। यद्यहं पुनः कृष्णं न पश्येयं, तर्हि तेन पुण्येन प्रयोजनं किमु। सर्वपापापनुत्तये तमेव हरिं पुनः पश्येयम्' इति बहुधा चिन्तयामास। '

१७

हरेः जगद्वल्लभस्य वीक्षणेन आत्मानं पूतं सोऽमनुत। पुनरपि पराक्रमप्रकाशनेन तस्य कृपापात्रं भवितुमियेष। दृष्टस्य तस्यादर्शननिदानं तस्मिन् बहुधा चिन्तयति भगवान् देवकीनन्दनः आविरासीत्। हसन् अनुशाल्वमुद्दिश्य बाणान् मुमोच। तान् बाणान् छित्वा सः अनुशाल्वः कृष्णं प्रति दिव्यान् बाणान् विमुच्य वक्षस्यताडयत्।

सर्वेषां जीविनां हृदि स्थितः सः भगवान् तेन तस्य प्रहारेण सन्तुष्टान्तरङ्गः मूर्छां प्रापत्। भगवतः हृदयवित् सारथिः दारुकः रथं ततोऽन्यत्र निनाय। हाहाकारः महानभूत्। समरस्थाः सर्वे पर्यतपन्। दारुकेण समानीते रथे मूर्छितं कृष्णं सत्यभामादयः ददृशुः। सर्वाः ताः तं लोकभर्तारमुपाचरन्। कृष्णः लब्धप्रज्ञ इव ताभिः संदृष्टश्च। सत्यभामा तं जगत्पतिं वीक्ष्य पर्यहसत्। स्याच च "शौर्यनिधे! प्रद्युमं रणात् मूर्छितमागतं वीक्ष्य रूक्षाणि उक्तवानसि। कथं त्वं अनुशाल्वभयात् अद्य प्राप्तवानसि। जनाः भीताः सन्ति। पलायन्ते च। मामाज्ञापय। अहमेव चण्डीभूत्वा रणं प्रविशामि। तामनुशाल्वमहमेव हन्मि। महान्तः त्वं अच्छेद्यः अदाह्यः इति वदन्ति। 'नैनं छिन्दन्ति शास्त्राणि नैनं दहति पावकः" इति स्पष्टमेवोक्तम्। वासुदेवस्त्वां निरीक्षमाणः तिष्ठति। यथा त्वं पुत्रं प्रद्युम्नं पदा प्राहरः, तथा त्वां सोऽद्य ताडयति। गतं न शोचितुमर्हसि। कर्तव्यं चिन्तय" इति।

तया प्रचोदितः भगवान् तामाश्वास्य पुनरपि रणरङ्गं प्राविशत, वृषकेतुरायान्तं सत्यभामाधयं वीक्ष्य स्वयमेव अनुशाल्वस्य समीपमुपससार। तं तीक्ष्णैः शरैः विव्याध तुरगान्गतप्राणानकार्षीत्। सारथिं विगतकण्ठं चकार। विरथमनुशाल्वं वीक्ष्य वृषकेतुस्तस्मै अन्यं रथं प्रैषयत्। तस्मिन् रथे चोपविष्टे, वृषकेतुः पुनरपि कठोरान् बाणान् व्यमुञ्चत्। अनुशाल्वस्य रथं प्रविश्य तं हस्तेन गृहीत्वा कृष्णस्य सन्निधिमागमत्। जगद्वल्लभस्य पादयोस्तं पातयित्वा कृष्णं "बद्धेनानुशाल्वेन सार्धं त्वत्प्रसादात् अहं संप्राप्तः। प्रतिज्ञा सफलाऽस्तु मे" इति प्राह। कृष्णस्तं वृषकेतुमभ्यनन्दत्। अनुशाल्वः लब्धचेतनः जगन्नायकमपश्यत्। स्वयमपि कर्णपुत्रं वृषकेतुमस्तावीत्।

"जायते कर्णपुत्राद्य सन्तोषश्च शुभावहः।
ययोर्वैरं तयोर्मैत्री सञ्जाता पौरुषेण ते।।
प्रभूणां हि प्रभावेन संगता संगतं समम्।
दृश्यते शङ्करे वीर विषं चैवामृतं सदा।।'

कृष्णस्य पादयोः प्रक्षेपेण स्वात्मा पवित्रीकृतः इति जगाद। बान्धवाः वा मित्राणि वा भगवतः सन्निधेः प्रापणे असमर्था इति वृषकेतोः अमेयं साहसं शशंस। समीपं तमाकृष्य पर्यष्वजत्। भगवतः कृष्णस्य पादसन्दर्शनेनैव अनुशाल्वः यागहयहर्ता परिवर्तितचितो बभूवेति वृषकेतुः निश्चयमापत्। विस्मितश्च बभूव। कृष्णस्यामेयानि चेष्टितानि अस्मरत्। तस्य प्रसादभाजः सर्वान् ध्रुवप्रह्लादप्रमुखान् संस्मृत्य संस्मृत्य हर्षनिर्भरस्समजनिषत। 'मूकं करोति वाचालं, पङ्गुं

लङ्घयते गिरिम्' 'इति तस्यैव कृपामात्रमात्मानम् अविन्दत। धानामुष्टिमुचे कुचेलमुनये वित्तेशतां प्रादात् इति वृषकेतवे ववार। कृष्णस्य कल्याणगुणानां स्मरणे, मत्तः प्रत्यवरो नास्तीत्यब्रवीच्च।

१८

तथा स्तुवन्तमनुशाल्वं लोककल्याणकृत् हरिः परिष्वज्य, दक्षिणेन हस्तेन गृहीत्वा धर्मराजस्य समीपमनयत्। अनुशाल्वस्तं नमश्चकार। वृषकेतुना समानीतं हयं धर्मराजाय प्रत्यर्पयत्। धर्मराजस्तं सान्त्वयित्वा ममाधुना बान्धवोऽसि' इत्युवाच। वृषकेतुं चाशीर्भिः धर्मजः अतूतुषत्।।

चैत्री पौर्णमासी प्राप्ता। धर्मजः दीक्षां स्व्यकरोत्। द्रौपद्या साकमसिपत्रव्रतं चरितुं प्रत्यजानात्। तुरगं पूजयामास। बद्धचामरं, चन्दनादिभिरुपचारैः तर्पितं हयं मुमोच। हयस्य पालनार्थं पार्थं निरदिशत्। पार्थः अग्रजं धर्मजं नमस्कृत्य कण्ठे मालां दधार। गाण्डीवं धनुः जग्राह। धर्मराजस्तं "वासुदेवप्रसादेन हयं निर्विघ्नं पालय। शिवास्ते पन्थानस्सन्तु। विजयी कुशली च पुनरागच्छ' इत्यवादीत्। कर्तव्यं तस्मै अस्मारयत्। प्रसन्नवदनः पार्थः अग्रजेन विमुक्तः सन् मातरं, देवकीं चोपससार। ते नमश्चकार। पूज्याः रुक्मिण्यादयः प्रोच्य, भ्रातृभिश्च विसर्जितोऽभवत्।

पार्थेन साकं सपरिवारः प्रद्युम्नः निरगात्। कृष्णेनाज्ञप्तः वृषकेतुः सज्जोऽभवत्। अनुशाल्वः स्वकीयैः वारैः सार्धं हयरक्षणे निरगात्। सपुत्रकं यौवनाश्वं कृष्णः स्वयमेव पार्थेन सह अश्वरक्षणे न्ययोजयत्। कुन्ती सर्वान् प्रस्थितान् वीरानाहूय प्रोत्साहयामास। "हरिणा मार्यते जन्तुः हरिणा रक्ष्यते पुनः" इति वदन्ती कृष्णस्तेषां रक्षणं करिष्यतीत्याश्वासयामास। हरिस्मरणेन विजयः करतलामलक इत्यब्रवीत्।

अर्जुनः कृष्णं पुनः पुनः नमस्कृत्य दिव्यं रथमानीतमारुरोह। सैन्यसंवृतः पययौ। कृष्णेन भुक्तः हयः दक्षिणाशां प्रत्यगात्। वीरेषु प्रस्थितेषु वृषकेतुः स्वं भवनमगात्। पत्न्यै सर्वमप्युदन्तं विवृत्य अश्वस्य रक्षणे आत्मानं पार्थस्य सहायं विचचार। पत्नीं कुन्त्यादीनां रक्षणं कर्तुमसूचयत्। भर्तुः स्मरणमेव स्त्रीणां परो धर्म इत्यब्रवीत्। तस्य पत्नी भर्तुराज्ञां पालयामीति प्रत्यजानात्। जागरूकस्सन् यागाश्वस्य रक्षणं कर्तुं सूचयामास। कदापि सः विमुखो न भवेदिति स्मारयति स्म। कार्यसिद्ध्यै गम्यतामिति स्मितपूर्वं प्रेषयामास। तया निर्मुक्तः वृषकेतुः पार्थं समुपससार।

यागस्य हयः माहिष्मतीं पुरीं प्रति ययौ। दुर्गस्य तस्य राजा नीलध्वज आसीत्। जनास्तत्र तुष्टाः पुष्टाश्चासन्। नीलध्वजस्य पुत्रःप्रवीरः कानने रममाणः स्त्रीसहस्रेण युतस्सन् कस्यचन चम्पकवृक्षस्याधः उत्तमे चासने उपविष्टः आसीत्। गायन्तीभिः नृत्यन्तीभिः मधुरैर्वचोभिसंलपन्तीभिः सुन्दरीभिः परिवृतश्चासीत्। नीलध्वजस्य पुत्रेण सूचितास्ताः वनपुष्पाणि चापचेतु इतस्ततः पर्यटन्। तास्वेका प्रवीरमहिषी वनमध्ये चरन्तं हयमपश्यत्। स्वेच्छया तत्रागतं तं वीक्ष्य तस्य सौन्दर्येणातीव मुग्धा सा मदनमञ्जरी प्रवीरं भर्तारं प्रावोचत्। पत्न्याः वचनमादृत्य प्रवीरः हयमपश्यत्। "ताम्राधरं रक्तशफं पीतपुच्छं सुकन्धरम्। कृष्णकर्णं कृष्णनेत्रं" तुरगं दृष्ट्वा अतीव विस्मितोऽभवत्। तस्य फाले सुलिखितं पत्रं च ददर्श। मदनमज्वरी अश्वं सर्वलक्षणसम्पन्नमपेक्षामास। स च प्रवीरः तस्याः प्रियकामनया हयमग्रहीत्। पत्रमपठत्। धर्मराजेन हयमेधमुद्दिश्य विमुक्तं तमजानात्। पार्थेन रक्ष्यमाणं विदित्वा पृष्ठतस्ते वर्तन्ते

इत्यबुध्यत। हयं नगरं नेतुमसूचयत्। सर्वाः स्त्रियः पुरीं प्रैषयत्। धनञ्जयं तृणीकृत्य स्वयं युद्धाय सज्जः सैन्यैस्साकं तेषामागमनं निरीक्षमाणः तस्थौ।

१९

पार्थः आगमत्। तमनुसृत्य अश्वमेव वीक्षमाणः अनुशाल्वः आययौ। प्रद्युम्नवृषकेतू समागतौ। यौवनाश्वश्चाजगाम। यागाश्वः न दृष्टः। व्यूहरूपेण स्थापितसैन्यः प्रवीरः दृष्टोऽभवत्। धनुः करे गृहीत्वा सः नीलध्वजस्य पुत्रः प्रवीरः पुरतः आगतान् तान् तिष्ठत तिष्ठतेत्यब्रवीत्। ' 'तुरगः पुरीं प्रवेशितः। सामर्थ्यं यदि, तर्हि सः पार्थः हयं मोचयतु '' इति वदति स्म। वृषकेतुः आत्मना सार्धमायोधनं कर्तुं तमसूचयत्। प्रवीरः बाणान् मुमोच। वृषकेतुः मूर्छा प्रापत्। अन्येन सायकेन अनुशाल्वश्च प्रवीरेण विद्धः। अनुशाल्वः अनुपदमेव शरान् घोरान् विससर्ज। प्रवीरः तिरोऽभवत्। माहिष्मतीवीरेषु हाहाकारः महान् समजनि। सः अनुशाल्वेन बद्धः आसीत्।

नीलध्वजः श्रुतोदन्ताः रणभूमिं प्राविशत्। घोरमायोधनं कृत्वा पुत्रं प्रवीरममोचयत्। आशीविषसमान् क्रूरान् शरान् प्रयुज्य पार्थस्य सैन्यमाकुलं चकार। धनञ्जयः नीलध्वजस्य पुरतः युद्धायागमत्। भयंकरै शरैः नीलध्वजः परिविद्धो बभूव। मूर्छा चापत्। नीलध्वजस्य जामाता पावकः। सः दूतजनेभ्यः श्वशुरस्य परिस्थितिमज्ञासीत्। पार्थस्य चमूं दग्धुं सः प्रारभत। सेना पलायामास। परिस्थितिं वीक्ष्य पार्थः वारुणास्त्रं प्रायुङ्क्त। पावकस्तेन शान्तो न बभूव। अर्जुनः पावकः मस्तावीत्। नमश्चकार। तस्यैव प्रीतये आरब्धः हयमेव इति असूचयत्। दिव्यो रथः गाण्डीवं धनुश्च तेनैव अदीयेताम् इत्यस्मारयत्। अस्माकं बलं हतं, यज्ञाश्वो नीतः। कथं अग्नेस्तृप्तिर्भवेदिति पर्यतपत्। कथं तस्य पावकस्य नीलध्वजेन सम्बन्धः इति बहुधा चिन्तयामास।

२०

नीलध्वजस्य पत्नी ज्वाला। सा स्वाहानाम्नीं सुन्दरीं प्रासूत। प्रत्यहं वर्धमाना लोकैकसुन्दरी सा कस्मै प्रदेया इति दम्पती चिन्तयामसतुः। पृष्टा सा कुमारी मानुषं भर्तारं नाकामयत्। देववर्यं चापैक्षत। पिता देवराजमसूचयत्। सः सर्वदोषस्य कारणम् इति तं सा निराकरोत्। तस्य परासहिष्णुतां, गौतमभार्यागमनं, जगद्वल्लभस्य अनुजीकरणं, जगन्नाथेऽपि अवरबुद्धिं सा विववार। पावकः सर्वदेवेभ्यः श्रेष्ठः। तं वरयामीति पितरं प्रावोचत्।। नीलध्वजस्तस्याः वाचं श्रुत्वा विस्मितोऽभवत्। तस्य वह्नेः स्वरूपं व्यवृणोत्। ''अग्निः दाहकः सर्वभक्षकः कृष्णवर्त्मा, मेघवाहनः आतुरः, सप्तजिह्वः, धूम्रमुखः, त्रिपात् द्विशीर्षः, सप्तहस्तः, कुरूपः'' इति बहुधा तामवोचत्।

पितुर्वाक्यानि सा श्रुत्वा उपवनम् अगात्। स्नात्वा, शुचिर्भूत्वा, सखीपरिवृता सती हस्ते मालां च गृहीत्वा अग्निं प्रार्थयामास। प्रत्यहं चाप्येवं तस्यां कुर्वत्या नारदेन प्रचोदितः अग्निः विप्ररूपेण तस्य नीलध्वजस्य पुरतः आविरासीत्। राजा तेजस्विनं विप्रमागतं वीक्ष्य सपर्यादिभिः वरासने तमुपावेशयत्। कुशलमपृच्छत्। तस्यागमनस्य निदानं पप्रच्छ। विप्रस्तु आत्मानं कन्यार्थिनं संसूच्य राजकन्यां वरयामास। राजा तु कुमार्याः वीतिहोत्रे अपेक्षां विवृत्य तस्मै अतिथये अन्यां कन्यां प्रदातुं निश्चयमब्रवीत्। द्विजस्तु ''मां विद्धि पावकं राजन् विप्रवेषेण संस्थितम्'' इति जगाद। राजा सन्तुष्टहृदयोऽभवत्। विप्ररूपेण समागतः सः कथं परीक्षयितव्य इति मनस्येव चिन्तयामास। तस्य भावं

विदित्वा प्रधानसचिवः विप्रवरे सन्देहं प्रकट्य त निजं स्वरूपं दर्शयितुं सूचयामास। क्रुद्धः पावकः स्वस्य मुखादग्निं ससर्ज। सचिवस्य कूर्चं ददाह तस्य वस्त्राणि अग्निना दह्यमानान्यभवन्। प्रधानसचिवे दह्यमाने हाहाकारः समभवत्। राजा परिस्थितिं वीक्ष्य दुःखितस्सन् वह्निसूक्तं पपाठ। वह्निः तस्य राज्ञः स्तोत्रेणातीव सन्तुष्टस्सन् प्रसन्नोऽभवत्। सचिवस्य वस्त्राणि कूर्चश्च यथापूर्वं समभवन्।

राज्ञः मातृष्वसा काचन राजसभामागमत्। राजानम् अभाषत "राजन् सः ऐन्द्रजालिकवत् वह्निं दर्शयति। तस्मै ब्राह्मणाय कन्या न दातव्या" इति। राजा तामुवाच "भद्रे, त्वमेव तं तव गृहं नयस्व। परीक्षस्व। विप्रश्चेत् चिन्तयामः। पावकश्चेत् तस्मै कन्या प्रदास्यामि"। सा राजानं तथेत्युक्त्वा तेन विप्ररूपेणोपस्थितेन अग्निना सार्धं स्वभवनमगात्। विप्ररूपः अग्निस्तु स्वाहायामेव न्यस्तमनाः तां कन्यकामनुसृत्य तस्याः भवनं प्राविशत्।

२१

सर्वज्ञः भगवानग्निः राज्ञः मनसः स्थितिं अजानात्। समागतायाः, स्वस्य परीक्षामिच्छन्त्याः कन्यायाः भावं च अजानात्। तस्या आह्वानमादृत्य तया साकं तस्य गृहमगात्। तया प्रदत्तां सपर्यां स्व्यकरोत्। तया च "परीक्षां मे देहि" इत्युक्तवानभूत्। वैश्वानरः क्रुद्धोऽभवत्। परितः ददर्श। वरचित्रैरलंकृतं दिव्यं भवनम्। देवराजस्य सुपुष्पितं दिव्यौषधियुतं खाण्डववनमेव भक्षितवतः, तत् भवनं गणनीयं कथम्? भवनं सर्वत्र ज्वालाभिरावृत्तमभवत्। सा तरुणी बहिरधावत्। भवनं भस्मसाद्बभूव। अग्निस्तां तरुणीं तिष्ठ तिष्ठेति वदन् तस्याः वस्त्राणि ददाह। दह्यमानं बहुमूल्यं वस्त्रं परित्यज्य नग्ना रुदन्ती प्राद्रवत्। वह्निभयात् जनाः सर्वतो दुद्रुवुः। सा कन्या राजानमुपसृत्य अग्निं वारयितुं प्रार्थयामास।

तस्याः वचनमादृत्य राजा अग्निं प्रार्थयामास। शान्तश्चाग्निः तस्य पुर आगमत्। भवनादिकं वीतिहोत्रः यथापूर्वमकल्पयत्। राजा कन्याप्रदानाय समयमसूचयत्। तस्मात् पुरात् न गन्तव्यमित्यब्रवीत्। शत्रवः यदि पुरीमागच्छन्ति ते दहनीयाः इत्यसूचयत्। जामातरं गृहे रक्षितुं निरचिनोत्। स्वाहां दुहितरमाजुहाव। महान्तमुत्सवं समुपकल्प्य अग्नये कन्यां प्रादात्। तत आरभ्य नीलध्वजस्य जामाता पत्न्या स्वाहादेव्या साकं माहिष्मतीं पुरीं रक्षन् अत्र तिष्ठति।

ज्ञातवृत्तान्तः पार्थः कर्तव्यं निरचिनोत्। वारुणास्त्रे विफले नारायणास्त्रं चिन्तयामास। धनुष्यस्त्रं न्ययोजयत्। पावकः ददर्श। शान्तोऽभवत्। पार्थस्य पुरतः तस्थौ तं च समाश्वासयन्नब्रवीत्। धनञ्जय! मया त्वयि रूक्षता प्रदर्शिता। मा स्मान्यथा भावयथाः। धर्मराजः अश्वमेधं क्रतुं यक्ष्यतीति अमन्वे। पुण्डरीकाक्षः सर्वदा पार्श्वे वर्तते। तेन विना यागः कुतः। स एव यज्ञस्वरूपः। वयं तस्याज्ञाधारकाः। तस्मिन् विश्वासः कर्तव्यः। क्षीरार्णवं पार्श्वे प्राप्य अजां दोग्धुं प्रयतमानान् भवादृशान् दृष्ट्वा भ्रान्तोऽस्मि। उदिते सहस्रकिरणे दिवाकरे खद्योतैः किं प्रयोजनम्। त्वं मे सखा। नाहं कृतघ्नः। मया ग्रस्तं सैन्यं पुनर्जीवति। राजा नीलध्वजः मां विश्वस्य पुरीं प्रविष्टवान्। तं निबोध्य तुरगं तेन साकं समानयिष्ये। हयः मन्दुरायां बद्धः " इत्युक्त्वा पावकः पुरीं प्राविशत्।

मदगर्वितः राजा नीलध्वजः सौधे उपविष्टः आसीत्। समागच्छन्तं जामातरं वीक्ष्य धनञ्जयः ससैन्यः दग्ध इत्येवामनुत। "मम बाहुवीर्यं त्वत्सहायं च पार्थः नाजानात्। साधु कृतं त्वया" इति चाग्निं प्रशशंस। अग्निस्तु प्रहसन्व्यर्थहर्षं तमबोधयत्। "राजन्! पार्थस्य सैन्यस्य नेता सर्वपापहरो देवः भगवान् देवकीनन्दनः। केन वा तस्य सैन्यं दग्धुं शक्यते। उत्तिष्ठ। पाण्डवं गोपुरे तिष्ठन्तं समाश्वासय। तुरगः तस्मै समर्प्यताम्। देवराजस्य वनं धन्वी पार्थः देवकीनन्दनेन सहितस्सन् सर्वतः शरैः पूरितवानासीत्। तव जामात्रा मया पूर्वं सन्दर्भशेषः विस्मृत आसीत्" इति राजानं श्वशुरं नीलध्वजं पावकः प्रावोचत्।

२२

नीलध्वजस्य पत्नी ज्वाला हयस्य प्रत्यर्पणे राज्ञा कृतामाज्ञां अश्रृणोत्। राज्ञः निर्णयं नानुमेने। प्रावोचत् "राजन्! भवान् शूरः। पुत्राः पौत्राः बान्धवाश्च पराक्रमिणः। नृणां जीवितमशाश्वतम्। ' 'अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः। पराक्रमः प्रकर्तव्यः। अश्वः न देयः" इत्यवोचत्। प्रियायाः वचनमाकर्ण्य नीलध्वजः हृतबुद्धिरभवत्। सैन्यैर्युतः युद्धाय प्रातिष्ठत। अर्जुनः सतुरगं पावकं निरीक्षमाणः युद्धायागतं नीलध्वजं वीक्ष्य क्रुद्धोऽभवत्। बाणान्विससर्ज। पुत्राः निहताः। राज्ञः भ्रातरः गतासवोऽभूवन्। रथः प्रभग्नः। नीलध्वजः मूर्च्छितोऽभवत्। तथाविधं राजानं वीक्ष्य महता प्रयासेन सारथिः तं पुरीमनयत्। अर्धरात्रे सः लब्धप्रज्ञः पार्श्वे भार्यां ज्वालां ददर्श। दुष्टमतिप्रदात्री तौ बहुधा अगर्हत्। तुरगं निवर्तयितुं सकल्पमकार्षीत्। प्रधानसचिवं प्राह्वयत्। तुरगश्चानीतः। भूरिशः रत्नानि, विविधानि वस्त्राणि, कोचन स्त्रीसहस्रं च आकलय्य तैस्साकं यत्र पार्थस्तत्रागात्। तस्मै नमोऽकार्षीत्। क्षमामयाचत। सर्वमानीतं सतुरग तस्मै समार्पयत्।

पुरीं रात्रौ प्रविष्टः राजा नीलध्वजः युद्धाय प्रातः पुनरागमिष्यतीति पार्थः निरीक्षते स्म। क्षमां याचमानं तं दृष्ट्वा विस्मितोऽभवतु। राजानमाश्वस्य, तमभ्यनन्दत्। तमपि अश्वरक्षणे नियुज्य पुरोऽगच्छत्। अश्वः दक्षिणाशां प्रति जगाम।

भर्ता स्वस्याः वचनं नापालयदिति कुपिता सम्राज्ञी ज्वाला उल्मुकाभिधस्य स्वस्याः भ्रातुः पुरमगात्। भ्रातरं दृष्ट्वा तस्मै नमश्चकार। स्वस्याः तत्रागमननिदानं सर्वमपि विवृत्य तं "भ्रातः।अर्जुनेन मम भवनं दग्धम्। मम भर्ता तेन जितः! पुत्राः हताः। बल विश्वस्तम्। यागाश्वः नीतोऽभवत्। मम पतिः नीलध्वज एव तस्य हयस्य रक्षणे नियुक्तः। त्वमितो गच्छ। तेन पार्थेन साकं युध्यस्य। सः त्वया जेष्यते यदि, तर्हि त्वं मे सुहृत् भ्राता च भविष्यति, नान्यथा " इति प्रावोचत्।

तस्याः वचनं श्रुत्वा, दूतेभ्यश्च परिस्थितिं विदित्वा तां सान्त्वयितुं सः प्रायतत। सा कठोराणि वाक्यान्यब्रवीत्। "कथमद्य न गच्छसि' ' इति अप्राक्षीच्च। उत्सुकः क्रुद्धोऽभवत्। ' 'स्वकीयभवनं नाशितम्। ममापि गृहं नाशयितुं किमिच्छसि" इति वदन् सः पुरात्तस्मादन्यत्र गन्तुं तामाज्ञापयत्। ततो निर्गत्य सा गङ्गायाः कूलं प्रापत्। जले काचन नौका अवर्तत। तां सा आरुहत्। आरोहणावसरे सा स्वस्याः वामचरणे जलं संलग्नं दृष्ट्वा "गङ्गायाः जलस्य स्पर्शात् पातकं संपादितं " इति बभाषे। परितः स्थिताः तस्याः वचनानि श्रुत्वा कुपिता अभूवन्। गङ्गातीर्थं सर्वपापक्षयकरमिति

विश्वस्ताः ते तथा भाषमाणां तां 'दुष्टां' निरचिन्वन्। महापातकिनः अपि जले तस्मिन् मज्जनेन क्षीणपापाः सन्तः विष्णुलोकं गमिष्यन्ति। गङ्गेति नामस्मरणमेव पापिनः नरकात् त्रायत इति लोके प्रथितं ननु।

२३

गङ्गा जलात्तस्मात्तस्याः पुरतः मानुषरूपेण प्रादुरभूत्। तस्याः ज्वालायाः ठक्(दुःख)निदानमपृच्छत्। सा लोकपावनी गङ्गां "कल्याणी पूर्वं त्वया सप्त पुत्राः जले निहताः। शिष्टः अन्यः शन्तनुना प्रार्थितः जीवति स्म। कामाजित् सः कौरवान् राज्यं च पालयन् हस्तिनावत्यामवर्तत। तं भीष्मं शिखण्डिनं पुरस्कृत्यार्जुनः अहन्। तेनैव मम पुत्राश्च निहता वर्तन्ते। तस्मात् जलं दूषितमित्यब्रुवम्' इति बभाषे। तस्याः वचनानि श्रुत्वा गङ्गा कुपिता बभूव। अर्जुनं शशाप। "पार्थमस्तकं इतः षष्ठे मासे निपततु" इति गङ्गायां प्रोक्तवत्यां सा दुष्टा ज्वाला सन्तुष्टचित्ता सती अग्नौ न्यपतत्। भगवतः संकल्पमनुसृत्यैव, तस्याः लोकपावन्याः गङ्गायाः वचनानि सत्यानि कर्तुं ज्वाला बाणरूपेण बभ्रुवाहनस्य तूणं अर्जुनमृत्यवे प्राविशत्। नीलध्वजस्य नगरात्प्रस्थितः हयः विन्ध्यप्रदेशं विवेश। मध्येमार्गं हयः योजनायतां महतीं शिलां ददर्श। विस्मितस्सन् तस्या उपरि व्यलुठत्। स्पर्शसमनन्तरमेवाश्वः दृषदि लग्नोऽभवत्। इतस्ततः चलितुं नाशकत्। हरिमनुसृत्यागताः सैनिकाः अर्जुनं प्रावोचन्। जडीभूतं हयं विलोक्य सः पार्थः विसिष्मिये। तस्य विमोचनाय कशान् गृहीत्वा सेवका ययुः। अश्वः दृषदि लग्नः न चचाल। अर्जुनः चारानाहूय इतस्ततः विमर्शेन केयं शिला इति प्रष्टुं तान् प्रचोदयामास। चाराः निर्ययुः। समीपे सौभरेः आश्रमं वर्तमानं तस्मै पार्थाय ते प्रावदन्। अर्जुनः यौवनाश्वं, वृषकेतुं, प्रद्युम्नं, सात्यकिं च पुरस्कृत्य तमाश्रममगमत्। तपस्विनं सौभरिं ते अद्राक्षुः। शिष्याः अध्ययनरता आसन्। वेदवेदान्तादीनि शास्त्राणि ऋषयः पाठयन्ति स्म। अर्जुनादयस्तान् नमश्चक्रुः। अर्जुनस्तान् तपस्विनः आत्मानं धर्मराजस्य भ्रातरं जगाद। अश्वमेधं यागं यष्टुमिच्छता अग्रजेन विमुक्तस्याश्वस्य रक्षणे अत्रागमम् इति अब्रवीत्। कृष्णस्य सखायं सुभद्राजानिमागतं सौभरिः अध्यगमत्। भगवता कृष्णेन प्रोक्तां गीतां हृदि धारयतः नरस्य तत्रागमनेन तुष्टः महर्षिः सौभरिः, तस्यानुयायिनश्च वरासनेषु उपावेशयत्। अर्घ्यपाद्यादिभिः फलादिभिश्च तान् अतोषयत्। स्वयं विदितवृत्तान्तोपि महर्षिः तेषामागमनिदानं जिज्ञासुः तान् अप्राक्षीत्।

२४

अर्जुनस्तं महर्षिं सौभरिं प्रणम्याब्रवीत् "तपस्विन्! धर्मराजः हयमेधं क्रतुं यष्टुं तुरगं विससर्ज। तमश्वमनुसृत्यागता वयम्। भवतः आश्रमस्य समीपे वर्तमानायां दृषदश्वः संलग्नोऽभवत्। पराक्रमिणः वीराः अस्माभिः पराजिताः। बान्धवाः गुरवः युद्धे निहताः। तत्पापनाशार्थं समुद्दिष्टे यज्ञकर्मणि अन्तरायस्समजनीति मनः व्यथते। दृषदः हयस्य विमुक्तौ मार्गः न दृश्यते। उपायं कञ्चन उपदिशतु भवान्" इति। पार्थस्य वचांसि श्रुत्वा महर्षिः जहास। "अर्जुन! त्वं कृष्णस्य सखा। स च देवकीनन्दनः साक्षात् परमपुरुषः एव। तस्य भगवतः वदनारविन्दात् गीतां वाचं श्रुतवानसि। तां श्रुत्वा 'मया आयोधने शत्रवः निहताः' इति त्वं व्यर्थं चावीवदः। अश्वमेधयजनमपि व्यर्थश्रमः एव ननु। हन्ता कः। हतः कः। तस्मात् पापमिति कुतः। सर्वं हरेर्माया। तं मधुसूदनं ध्यायन् सर्वपापेभ्यः विमुक्ताः जीविनः भवेयुर्ननु।

पृष्ठतः तं हरिं कृत्वा एभिः अश्वमेधशतैः न पापाद्विमोचनं साध्यते। कल्पवृक्षं तं समुत्सृज्य एरण्डस्य समाश्रयणं कृतं भवद्भिः। तस्य विष्णोस्तवनं पादपूजनमेव श्रेयस्करं' इति उपादिशत्।

अर्जुनस्तु शिलायाः माहात्म्यं पर्यपृच्छत्। तस्य कुतूहलं निवारयितुं, तेषां विष्णोराराधनकर्मणि आनुकूल्यप्रकल्पनं चोद्दिश्यसौभरिः दृषदः गुणः कथां विववार। ''इयं शिला पुरा ब्राह्मणी। एषा महर्षेरुद्दालकस्य भार्या चण्डीत्यभिधा। तस्याः परिणयावसरे विप्रस्तां भर्तृवाक्यस्य सर्वदा परिपालनमुपादिशन्। बालभावात् सा विप्रान् वैवाहिके मण्डपे 'न करिष्यामि' इति प्रावोचत्। तस्याः वचनं परिहासकृतमिति ते अविदुः। उद्दालकस्ता स्वं गृहं निनाय। सा बाला इति मत्वा महर्षिः गृहकर्मणि तां न न्ययोजयत्। अग्निहोत्रस्य कर्मणि च स्वयमेव कुरुते स्म। वर्षेष्वतीतेषु सा प्रौढा इति भावनेन उद्दालकः अग्रे उपचारान् कर्तुमसूचयत्। सा निराकरोत्। अग्नेः सपर्यया पुत्रा कुलोत्तारका भविष्यन्ति इति स होवाच। 'पुत्रैः किं प्रयोजनमि'ति सा प्रत्यवदत्। कमण्डलुमनेतुं महर्षौ प्रवदति, सा तमादाय भूमौ प्रक्षिप्य आस्फोटयामास। रात्रौ तां महर्षिः क्रुद्धः गृहाद्बहिः अस्थापयत्। प्रत्यहं तया साकं तस्य स्थितिः क्लिष्टतरा अभवत्। विह्वलेन तेन सन्ध्यादिकर्माणि वा पर्वसु तर्पणादीनि वा कर्तुं न शक्यते स्म। कदाचित् कौण्डिन्यः महर्षिः तीर्थयात्राव्याजेन सशिष्यस्तत्रागात्। तेनोद्दालकेन सुपूजितः सः कौण्डिन्यः तस्य कुशलमपृच्छत्। चिन्ताकुलं तं तस्याः चिन्तायाः निदानमप्राक्षीत्। कौटुम्बिकीं वार्तां च पृच्छन् तस्यः अपत्यानि कतीति चापृच्छत्।

२५

उद्दालकः महर्षये स्वस्य परिस्थितिं व्यवृणोत्। भार्यया स्वस्य वचनानां निराकरणं च व्यवृणोत्। करणीयं पित्र्यं श्राद्धं च संसूच्य कुतस्तस्य समापनमिति चिन्ताया निदानं स्पष्टीचकार। कौण्डिन्यस्तस्य वचांसि श्रुत्वा पुनः प्राहसत्। कर्णे लगित्वा विपरीतं वचः सर्वदा तस्यै वक्तुमसूचयत्। अग्नेः शुश्रूषणं न कर्तव्यमित्युक्ते सा अवश्यं करिष्यतीति जगाद। पैतृकं कर्म न करिष्ये इति त्वयि वदति सा अवश्यं त्वया कारयिष्यतीति चासूचयत्। एवमुक्त्वा महर्षिः कौण्डिन्यः श्राद्धकाले आगमिष्यामि इति च प्रतिश्रुत्य ततो निरगात्। उद्दालकः एवमेव प्रत्यहं प्रतिवदन् तया गृहकार्याणि सर्वाणि तृप्तिकरं कारयिष्यन् सुखं न्यवसत्। कदाचित् सः पत्नीं चण्डीमब्रवीत्। ''सुभगे! परेद्युः पितुः श्राद्धं मया करणीयमस्ति। तं न करिष्ये। कौण्डिन्यः आगमिष्यामीत्यवदत्। तस्मै भोजनवस्त्रादीनि न प्रदास्ये। पिण्डप्रदानं न करिष्ये इति जगाद। चण्डी तु तं प्रतिवदन् अवश्यं त्वया श्राद्धः करणीयः। कौण्डिन्यः पूजनीयः। वस्त्रादयः तस्मै प्रदेयाः। सुभोजनं च समुपकल्पनीयमिति प्रत्यवदत्।

पत्न्यां महत् परिवर्तनं समभवत् इति उद्दालकः तुतोष। परेऽहनि श्रद्धया महत्या तस्याः सहायेनैव श्राद्धं भविष्यतीति निश्चिकाय। रात्रौ जातायां दूरतः शयितुमब्रवीत्। सा शय्यामेकां कृत्वा अस्वपत्। पत्नीं परेद्युः श्राद्धं न करिष्ये इत्यब्रवीत्। सा पुनरपि श्राद्धं श्वशुरस्य तृप्तिर्यथा भवेत् तथा करिष्ये इति प्रतिजज्ञे। एवमेव कर्तव्यं सर्वमपि प्रतिवदन् तस्याः निर्बन्धेनैव कुर्वन्निवाभ्यनयत्।

पदे पदे प्रतिवदन्तं तं विरुध्य चण्डी सर्वं शास्त्रमनुसृत्याकार्षीत्। समागताः द्विजाः तृप्तिमविन्दन्। पर्याप्तं धनं वस्त्रादिकं चालभन्त। सर्वेषु तेषु भुक्तेषु (भुक्तवत्सुबुभुजे। चण्डी निर्गतेषु उद्दालकश्च ( चाभुक्ता। तृप्तमनाः उद्दालकः

पन्त्याः स्वभावं विस्मृत्य पिण्डानां  पुटकं जाह्नव्याः जले विसर्जितुमसूचयत्। सुपूजितं तं सा चण्डी स्वस्याः स्वभावमेवानुसृत्य भर्तुः वचनं च विरुध्य गोमयावटे प्राक्षिपत्। तं दृष्ट्वा महर्षिरतीव क्रुद्धोऽभवत्। कृतं सर्वमपि व्यर्थमभवत्  इति दुःखेन महता तां शशाप। तस्य शापमनुसृत्य सा शिला अभवत्। शीघ्रकोपी मुनिः शापस्य विमोचनं च घुष्टवान्। धर्मनन्दनस्य यज्ञार्थं भ्रममाणस्य हयस्य स्पर्शात् सा शापमुक्ता भविष्यतीति।

सौभरेः तपस्विनः वचांसि श्रुत्वा अतीव सन्तुष्टः पार्थः दृषदमुपसृत्य तुरगं कराभ्यां पस्पर्श। तुरगः विमुक्तोऽभवत्। शिला चण्डी भूत्वा स्वकं रूपं प्राकाशयत्। उद्दालकः ऋषिवरः तत्रागमत्। परिवर्तितशेमुष्या भार्यया साकं सः मुनिवरः पार्थमाश्वास्य आश्रममगच्छत्। पार्थः तस्याशिषः स्वीकृत्य पुरो ययौ।

२६

अश्वः ततः प्रस्थितः चम्पकापुरीं प्रति निर्ययौ। सा पुरी हंसध्वजेन राज्ञा पालिता आसीत्। हयमेवानुसृत्य गच्छन्तः पार्थादयः सुमनोहरीं पुरीं ददृशुः। जनाः दिव्यैः वासोभिरलंकृताः अदृश्यन्त। दूताः राजानां हंसध्वजमुपसृत्य स्वविषये समागतं तुरंगमं प्रावोचन्। श्रुतोदन्तबान्धवान् राजा हंसध्वजः सचिवान् : वीरानन्यांश्च समाह्वयत्। आलोचयामास। सैन्यैश्च साकं सर्वतः परिवृत्य हयं ग्रहीतुं निरणैषीत्। अनेन तुरगस्य ग्रहणेन महान् लाभश्च भविता इत्यब्रवीत्। यत्रार्जुनः तत्र हरिः। भक्तस्य ग्रहणे भगवान् स्वयमेव तस्य विमोचनाय धावन् आगमिष्यति। भगवतः सन्दर्शनलाभः स्यात् इति तानवोचत्। वृद्धस्य तस्य कृष्णसन्दर्शने कुछलं वीक्ष्य वीराः हयप्रग्रहणायाधावन्। युद्धाय च सज्जा बभूवुः। तस्य राज्ये सेनानायकानां सप्ततिरासीत्। तैः परिरक्षितं सैन्यं स्वयमेव गत्वा हंसध्वजः परीक्षामास। सर्वे सैनिकाः विष्णुभक्ताः। एकपत्नीव्रतस्थाः, दानपरायणाः प्रियंवदाः। राज्ञः आज्ञाधारकास्ते च सर्वेऽपि भगवतः सन्दर्शने कुतूहलयुतास्सन्तः आयोधने प्राणानपि त्यक्तुं सिद्धा आसन्। सचिवाः कर्तव्यनिष्ठाः आसन्। भृत्येभ्यः भूरि धनं प्रददति स्म। राज्ञः भ्रातरः सर्वे बलिनः, युद्धे पराजयमजानन्तः युद्धाय प्रातिष्ठन्त। हंसध्वजस्य पुत्राः  पञ्च। तेषां चाभिवानानि सुबलः सुरथः, समः, दुदर्शनः, सुधन्वा इति। एते च वीराः, पितुराज्ञापालनतत्परा आसन्।

एभिः वीरैः साकं हंसध्वजः युद्धभूमिं ययौ। तेनाज्ञप्ताः वीराः पुराद्बहिः जग्मुः। सर्वे ते विष्णोराराधनं कृत्वा द्विजान् भोजयित्वा गुरुभिरनुगृहीतास्सन्तः प्रस्थिता आसन्। तेषां सोत्साहगमनं प्रासादस्थाः प्रियाः पश्यन्त्यः हृषनिर्भराश्चासन्। तेषां कृष्णदर्शनं निरीक्षमाणास्ताः सखीभिः संलपन्ति स्म। केशवार्जुनाभ्यां साकं वीराः युद्धं करिष्यन्तीति तुष्टाश्चासन्। गोपुरद्वारं गतो राजा दुन्दुभिध्वानं राजाज्ञां घोषयितुमाज्ञापयत्। तैलेन पूर्णं कटाहं न्यक्षेपयत्। यः युद्धाय नगरात् न निर्गच्छति। सः तप्ते घोरे कटाहतैले निपात्यते इति राजाज्ञां दूताः घोषयन्ति स्म। आज्ञायाः भङ्गे कृते राज्ञः नप्तृपुत्रसोदरा अपि दाक्षिण्यं विना पातनीयाः इति जनाः अविन्दन्। तीक्ष्णशासनस्य राज्ञः भयात् सर्वे वीराः पुरात् निश्चक्रमुः।

नीतिशास्त्रे राज्ञामाज्ञाभङ्गः, द्विजानामवमाननम् स्त्रीणां पृथक्शय्या च अशस्त्रवध इति वर्णितम्। चम्पकापुर्यां पौराः न कदाचिदपि आज्ञाभङ्गप्रयत्नं कुर्वन्ति स्म। अपि च राजा तीक्ष्णशासनः अवर्तत। तस्य पुरोहितः शङ्खाभिधः शास्त्रेषु पारङ्गतः। कदाचित् सः पुरोधाः भ्रातुः संबन्धीनि फलान्यपाहरत्। ततः पश्चात्तापेन कृतस्यापराधस्य

दण्डञ्चाचिन्तयत्। राजानमुपससार। अपराधं चोक्त्वा तस्य नीतिशास्त्रोक्तं दण्डनं चानुसृत्य छिन्नबाहुयुगोऽभवत्। तस्य पुरोहितस्य शङ्खस्य वशगः राजा हंसध्वजः स्वयमपि नीतिशस्सन् राज्यं सम्यक् पालयते स्म। तस्योग्रशासनस्य राज्ञः आज्ञामादृत्य सचिवाः पुरद्वारे तैलपूर्णं कटाहं संस्थाप्य तैलं तदुत्क्वथयामासुः।

२७

राज्ञः पञ्चमः पुत्रः सुधन्वा प्रथमं बहिराययौ। पितरं नमश्चकार। मातरं ववन्दे। धनुः जग्राह। पार्थेन साकं हरिमानेष्यामि इति स विश्वासं प्रावोचत्। तस्य माता प्रोक्त्वा च "पुत्र! गच्छ। युद्धे हरिं विजित्य तमत्र समानय। तुरगः नानेतव्यः। मुक्तिदे कृष्णे अत्र समागते धन्या वयं भविष्यामः। नारदः कृष्णस्य चेष्टितानि बहुधा वर्णयति स्म। तव पिता रणाङ्गणे वीरान् बहून् अजीजयत्। कदापि तं सत्यभामाधवं न दृष्टवान्। दिवारात्रं तस्यैव भगवतः कृष्णस्य ध्यानमावाभ्यां क्रियते। दर्शनलाभस्तु एतदवधिपर्यन्तं न सम्पादितः। सः परात्परः यथा चक्षुर्विषयः भवेत् तथा मार्गाः कश्चन मृग्यताम्। पार्थं यदि ग्रहीष्यसि तर्हि कृष्णः तव वशगः स्वयमेव भविष्यति। आपदि भक्तस्य परित्यागः तेन कदाचिदपि नाचरितः। वनगतं वत्सं त्यक्त्वा कदापि सौरभी नागच्छति ननु। कृष्णः यदि त्वं विमुखो भवेः तर्हि जनाः, सम्बन्धिनश्च सर्वे मां हसिष्यन्ति। तथा त्वया न कर्तव्यम् ' इति।

कृष्णस्य सन्दर्शने अतीव कुतूहलं प्रकाशयन्ती मातरं सुधन्वा "मातः! पौरुषं प्रकाशयिष्ये। प्रयत्नस्तु मदीय एव। विजयः दैवे प्रतिष्ठितः। तव वचनानि पालयिष्ये। हरिस्ते सन्दर्शनं दास्यति इति विश्वसिमि। न कदाचिदप्यहं विमुखः भवेय" मिति समाश्वासयामास। कुवला सुधन्वनः भगिनी। सा समीपमागच्छन्तं भ्रातरं नीराजयित्वा "भ्रातः! तव कण्ठे एनां विजयमालामर्पयिष्ये। त्वं वीरेण धनञ्जयेन योद्धुं प्रवृत्तोऽसि। युध्यस्व विगतज्वरः। यदि त्वं विमुखो भवेः, मम देवराः मां परिहसन्ति। मम श्वशुरगृहनिवासश्च दारुणो भवेत्। कृष्णेन भगवता करिष्यमाणः तव युद्धप्रयन्तः न च मौढ्यं प्रतिपादयेत् " इति व्यजिज्ञपत्।

सुधन्वा तामाश्वास्य बाह्यकक्ष्यायां स्थितां पत्नीं समुपससार। तत्र तया साध्व्या पूजितोऽभवत्। तया प्रभावत्या पत्न्या नीराजितः। सः "आर्यपुत्र। तव वदनकमलं कृष्णदर्शने अतीव कुतूहलं प्रदर्शयति। तावकीं मां परित्यज्य तव तत्र गमनं न युक्तमिति मे प्रतिभाति। तव एकपत्नीव्रतं नष्टमभवत्। वीराः सुरनारीभिः निषेवणं कांक्षन्ति। गोविन्दः दर्शनस्यानुपदमेव मुक्तिं दास्यति। तामेव मुक्तिं कामयमानः तव पिता गच्छति। तवापि तस्यामेव मोहः दृश्यते। पिता यां गच्छति, तत्रैव पुत्रस्य गमनं कुतः। सा भुक्तिः सर्वगामिनी इति सन्तः कथयन्ति। सा मम समाना नैव। त्वया सेव्या च न भवितुमर्हति। 'तव सङ्गात् विवेकः मयि जायते। सः त्वां गच्छन्तं निवारयेत् इति अचिन्तयम्। त्वयि निर्गते अहमेका भविष्यामि। नरः परां नारीं गच्छति इति विदितमेव। नारी न कदापि तथा अन्यं नरं गच्छति ननु। कृष्णसन्दर्शनाय त्वयि निर्मोते अपुत्र अहमपि मोक्षं गमिष्यामि " इति बहुधा विललाप।

28

भर्तुः वियोगदुःखस्य स्मरणमात्रेण दुःखे महति निमज्जन्ती सा पुनरपि भर्तारं सुधन्वानमब्रवीत्। " आर्यपुत्र! असकृत् विवेकसुतसम्पन्ना त्वं भविष्यसीति अकथयः। त्वं संसारेऽस्मिन् कृतकृत्यः इत्यत्र न संशयः। त्वयि गते अहमनाथा

एव। त्वया सह मोक्षमेव गमिष्यामि" इति। सुधन्वनः सामर्थ्यं चातिक्रम्य प्रभावती जजल्प। सुधन्वा अस्खलितमनाः ततो गन्तुमियेष। कृष्णं पार्थं च निरीक्ष्य ततः पुनर्नागच्छतीत्येव प्रभावती बुबुधे। कृष्णार्जुनौ शरैः विध्वा पुनरागमिष्ये इति सोऽब्रवीत्। प्रभावती तस्य वाचांसि न व्यथसीत्। सा कृष्णस्य दर्शने लब्धे पुनः संसारचिन्ता मानवं नोपसर्पतीति निश्चितवती। "प्रियंवद! सुतसंयुता एव विष्णोः पदं प्राप्नुवन्ति। शुकनारदावपि सुतानुत्पाद्य पदं तत् प्राप्तौ इति विश्रुतम्। अनपत्यस्य शुभं नास्ति।

पराशां ये सफलां कृत्वा व्रजन्ति तेषां साधूनां चिन्तितकार्याणि सफलानि भविष्यन्ति। अन्यथा नैव सिद्ध्येत् इत्यवोचत्। सुधन्वा पदे पदे प्रतिवदन्त्यै प्रभावत्यै राज्ञः शासनं स्मारयामास। दुन्दुभेः ध्वनिं अश्रावयत। गोपुरे तप्तं कटाहतैलं जगाद यो दुन्दुभेध्वनिमनुसृत्य बहिर्नायाति, सः तैलकटाहे क्षिप्यते इति सूचयामास। ऋतुगमनं रात्रावेव शास्त्रेषूक्तम्, दिवा स्त्रीसङ्गमो निषिद्धः। पितुराज्ञामाहृत्य सर्वे वीराः प्रस्थिताः इति तामजागरीत्। सा तमगर्हत। सरागां स्त्रियं अजित्वा दिवि भयङ्कराणां कृष्णशराणां पुरतः स्थातुं कथं साध्यते इति तं प्राहसत्। ऋतुपूरिते षोडशे दिवसे पितुः श्राद्धे अपि ऋतुभङ्गं न कुर्यादित्यब्रवीत्।

एवमादिभिः उक्तिप्रत्युक्तिभिः सा प्रभावती भर्तारं रुरोध। "पितुराज्ञां निमित्तीकृत्य गच्छते तस्मै पत्न्याः कामप्रपूरणे दिवा इति नीतिर्न कार्या" इति सूचयामास। गृहस्थानां परो धर्मः स्त्रियः अभीप्सापूरणमेवेति प्रत्यपादयत्। तं कराभ्यां दृढं जग्राह। तां विसृज्य ततो गन्तुं स न शशाक। धृतं कवचं किरीटं व्यमूमुचत्। रत्नमण्डिते शयने दिवा तया सह रेमे। विशालाक्षी सा सन्तप्ता अभवत्। गर्भं च दधार। ततः सुस्नातः सः रथमारुह्य यत्र पिता तत्र निरगात्।

हंसध्वजस्तु सर्वान् वीरान् समागतान् ददर्श। विधेयान् तान् समागतान् सर्वान्दृष्ट्वा तृप्तश्चाभवत्। सुधन्वा तत्र न वर्तते इति अमनुत। किं तेन तप्तं कटाहतैलं विस्मृतम् इति विसिष्मिये। गृहं गतः सः न बहिरागमत् इति निरचिनोत्। सैनिकान् प्रेषयामास। केशेष्वाकृष्य तमानेतुमाज्ञापयामास। स्वयमपि तैलकटाहपार्श्वं प्रापत्। तम् आज्ञाविरोधिनं सुधन्वानं तप्ते तैले निक्षेप्तुं दृढं निरधारयत्।

राज्ञा आज्ञप्ताः यवनाः सुधन्वनः भवनं प्रति जग्मुः। भुक्तभोगं नृपात्मजं मन्दिरात्प्रस्थितं रथारूढं समद्राक्षुः युद्धाय प्रस्थितेषु वीरेषु तमनवेक्ष्य हंसध्वजः यदाज्ञापयत् तत्सर्वं विवव्रुः।

## २९

हंसध्वजेनाज्ञप्ताः यवनाः युद्धाय प्रस्थितं, रथे समुपविशन्तं राजपुत्रं सुधन्वानमपश्यन्। "राजपुत्र! राज्ञः आज्ञामनुसृत्य वयमत्रागताः। राजा त्वमाज्ञाभङ्गमकरोः इति त्वां ग्रहीतुमाज्ञापयत्। किमर्थं त्वमेवमकार्षीः। पृष्ठतः स्थितेन त्वया सर्वे वयं वञ्चिता ननु। धरातले त्वां विकर्षन् तैलकटाहपार्श्वमानेतुं राजा आज्ञापयति। सैनिकाः सज्जाः तिष्ठन्ति। याहि " इत्यूचुः। तेषां वचनेन राजा क्रुद्ध इति सुधन्वा अजानात्। यवनैः सैनिकैस्स्माकं यत्र पिता तत्रागात्। पितरं ववन्दे। महता अदम्येन क्रोधेन राजा सुधन्वानमब्रवीत् किमर्थं त्वया शासनमुल्लङ्घितमभवदिति। सुधन्वा प्रभावत्याः अपत्यापेक्ष्यां विदित्य स्वस्य विलम्बस्य निदानं विववार। हंसध्वजस्तमगर्हत।"त्वं मूर्खः। कृष्णः संमुखे वर्तते। तत्र गमनं विना त्वया नः कुलं वञ्चितम्। तव प्रियायै जलदं पुत्रं दत्वा विलम्बेनात्रागतवानसि। पूर्वजानां तव

तेन तृप्तिः कथं संजायते। हरिं विना त्वदीया वा मदीया वा तृप्तिं पितृभ्यः न समुपकल्पयन्ति। पिपासायाः पूरणे भगवति विस्मृते वरुणस्यापि न शक्तिः। पुत्रवन्त एव स्वर्गं गच्छेयुर्यदि श्वानः सूकराश्च स्वर्गं गच्छेयुः। हयस्य रक्षणे पार्थः अत्रागतवान्। रणे अर्जुनं कृष्णः एकाकिनं नैव स्थापयति। कृष्णदर्शने वयं कुछलिनः आस्म। कृष्णे अत्र समागते पौरुषं विस्मृत्य, कर्तव्यमविचारयन् कामवशगस्त्वं गर्हणीयः। भगवति विश्वासशून्यं त्वां तप्तकटाहतैले निक्षिपामि। कुपुत्रः त्वम्। कामरतः" इति बहुधा तमगर्हत।

शङ्खलिखितौ पुरोहितौ समानेतुं हंसकेतुः दूतान् प्रैषयत्। ताभ्यः सर्वं कथयितुमसूचयत्। यथा पुरोधसौ आज्ञापयतः तथा करिष्ये इति प्रत्यजानात्। दूताः तैलं पुनः काष्ठैः उत्क्वथयामासुः। राजाज्ञया वार्तावाहकाः पुरोहितयोराश्रममगमन्। नृपस्य धर्मसंकटं व्यवृण्वन्। सुधन्वना प्रोक्तं विलम्बनिमित्तं नृपः न पर्यगणयत् इति जगदुः। तं पापिष्ठं निश्चित्य तप्ततैले प्रक्षेमु राजा कृतदृढनिश्चय इति अवादिषुः। "राजाज्ञायाः विरोधिनः नरके दारुणे तिष्ठन्ति। हरिश्चन्द्रः महाराजः कौशिकाय राज्यं प्रादात्। सत्यवचसां परिपालनाय तेन भार्यां सुतौ विक्रीतौ। प्रियां चन्द्रमतीं निरपराधां हन्तुं च सिद्धो बभूव। भागीरथ्याः तटे सः वचसां परिपालनाय मृतस्य पुत्रस्य गात्रात् वस्त्रं च जहार। अपि च प्रतिज्ञापालनाय सत्यवाक् भवितुं राजा दशरथः पुरा पुत्रं रामं वनं प्रव्राजयामास। कैकेय्यै प्रदत्तं वचनं तथ्यमकार्षीत्। सच्चरित्रैः वचनभ्रंशः न कुत्रापि श्रुतः। वचनपालनाय पुत्राः, पौत्राः सोदराश्च परित्यक्ता इति विद्मः। आज्ञाभङ्गकृत् सुतः तप्ते तैले निक्षेप्तव्यः। राजा च पुत्रप्रीत्या अन्यथा चिन्तयेयद्यदि नावां राज्येऽमुष्मिन् वर्तावहे। केशवं पार्थं च विमुखौ कृत्वा राज्ञः आज्ञां चापरिगणय्य यः स्वकागात् गृहे अतिष्ठत् सः नैव क्षम्यः" इत्युक्त्वा भ्रातरौ शंखलिखितौ राज्ञः असत्यवचसः राज्ये न वस्तव्यमिति दृढं निश्चित्य तस्य समीपं गन्तुं प्रवृत्तौ। दूताः प्रस्थितौ भ्रातर शङ्खलिखितौ राज्ञे सूचयितुं पुरः जग्मुः।

३०

दूतेभ्यः भवनेभ्यः श्रुतोदन्तौ पुरोधसौ शङ्खलिखितौ राज्ञः हंसध्वजस्य समीपमागतौ। राजा यदि असत्यवाक् भवेत् तर्हि राज्यात्तस्मात् बहिर्गन्तुं च तौ निश्चितवन्तौ। असत्यवचसां नृणां "आसनाच्छयनाद्यानात्संपर्कात्सह भोजनात्। समीपे निवसतां पातकं भवेत् इति ज्ञौ। दूताः पूज्याभ्यामुक्तं सर्वमपि राज्ञे प्रावोचन्। राजा सचिवान् सुधन्वानमानेतुमादिशत्। सुतप्ते तैले तं क्षेप्तुं चादिदेश। सुमतिः सचिवः सुधन्वानमानाययत्। प्रोवाच च "कुमार! अहं परतन्त्रः। त्वां तप्ततैले क्षेमु राजा आज्ञप्तवान्। हृदये करुणा जायते। राजा उग्रशासनः। त्वयि निष्करुणश्चाभवत्' इति। सुधन्वा सचिवं सुमतिं नमस्कृत्य "परवशेन त्वया राज्ञः शासनमवश्यं कर्तव्यम्। भार्गवः रामः पितुराज्ञयां विधेयस्सन्श्च मातुः शिर एवाकर्तयत्। तदात्र विषये का परिदेवना। मरणात् न मे भयम्। शुभा पुण्यक्रिया भया कृता। मा शुचः। तप्ततैले मां प्रक्षिप" इति अगदत्। सुमतिः अनुपदमेव कृष्णं सनातनं ध्यायन्तं तुलसीमालयालंकृतवक्षसं पीताम्बरधरं सुधन्वानं समुत्याप्य राज्ञः शासनमेव मनसिकृत्य अतीवतप्ते तैले स्वहस्ताभ्यां चिक्षेप।

सुधन्वा गोविन्दमस्मरत्। त्राहि त्राहि इति मनसा तमयाचत। "भगवन् कुतस्त्वं हयेन सार्धं नागत इति कारणं ज्ञातमभूत्। सुधन्वा कामचारी। पापिष्ठः मामवज्ञाय, संप्राप्ते च संकटे पश्चात् स्मरति। सुखसंयुक्ता जनाः न जगत्पतिं

चिन्तयन्ति, कृच्छ्रपतिता एव उपासते इति न मया कदाचिदपि भावितम्। हरिविवर्जितेन सुखेन किम्। ध्रुवः प्रह्लादः, करिवरः पृषतनन्दिनी गोपाः - सर्वे आपत्स्वेव त्वां दध्युः। केचनान्ये त्वां अन्तकाले ध्यात्वा मुक्तिमाप्नुवन्ति। अहं त्वां हृदये एव चिन्तयामि। मम मुक्तिप्राप्तौ न सन्देहः। भगवन्! भवन्तौ कृष्णार्जुनौ पौरुषेण तोषयितुमपेक्षितवानासम्। गाण्डीवेन धनुषा विमुक्तैः शरैः न मम गात्रं विद्धमभूत्। तव पुरतः स्थातुं, योद्धुं च समर्थस्य मम अहो! किमभवत्। चोर इव तप्ते कटाहतैले निपत्य मरणं प्राप्यमभवन्ननु। कृष्णः नायोधने सुधन्वना दृष्टः। अर्जुनस्य सैन्यं न तेन निहतम्। धिक् धिक् इति जना मां परिहसन्ति। द्रौपद्याः मानसंरक्षणाय सभायां भीष्म-द्रोण-पाण्डवादिषु सर्वेषु सत्सु तां त्वं वस्त्ररूपेणानुगृहीतवानासीः। मामप्यपवादादस्मादन्याय्यात् संरक्षितुं, कृच्छ्रादस्मात् वह्निदाहात् संरक्ष। त्वां विना नान्यं दैवं जाने" इति हरिमेव चिन्तयामास।

वीरे सुधन्वनि एवं ब्रुवति माधवस्य स्मरणात् तैलं सुशीतलं समभवत्। मिलिता जना उत्कथितं तैलं शीतमभवदिति विस्मिता बभूवुः। सरसि क्रीडन्तमिव तैले वर्तमानं सुधन्वानं वीक्ष्य मूकास्सञ्जाताः। बहवः अश्रूणि अमुञ्चन्। भूमौ अनृत्यन्। वक्षः कराभ्यामताडयन्। हर्षातिरेकेण हस्तास्फालनमकार्षुः। मित्राणि पर्यष्वजन्। व्यर्थं राजा तं तप्ततैले प्राक्षिपत् इति निर्भयमवादिषुः। देवं, यदुनन्दनं, आर्तत्राणपरायणं, सुधन्वनः रक्षितारं कृष्णं धनञ्जयेन साकं द्रष्टुं कुतूहलयुता अभूवन्। शीघ्रमेव भगवतः सन्दर्शनं लप्स्यते इति निरचिन्वन्।

३१

भगवतः कृपा मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् इति समर्थनं ध्रुवप्रह्लादादयः लोके प्रतिष्ठापितवन्तः। तेभ्यः नावरः सुधन्वा। पुनः पुनः काष्ठस्य संयोजनेन तैलं उत्कथितमपि सः हरेः नामस्मरणमात्रेण तस्मिन्नवातरत्। तप्ततैलं शीतमकार्षीत्। सर्वेषु जनेषु पश्यत्सु सरसि इव तस्मिन् तप्ततैले क्रीडति स्म। स्वयं भगवतः भक्तस्सन्नपि हंसकेतुः पुत्रस्य भगवति भक्तिं नाजानात्। पुरोधसौ शङ्खलिखितावपि प्राकृतौ इव तस्य विलम्बः अपराध इति पर्यगणयताम्।

हसध्वजशङ्खलिखिताः सुधन्वानं क्रीडन्तं, पश्यन्तः देवकीनन्दनस्य कृष्णस्य पुण्यनाम्नः तेन कीर्तनमश्रुण्वन्। विश्वासः नैव समुदियाय। परीक्षामपैक्षन्त। राजा शङ्खलिखितयोः सन्देहं परिहर्तुं नारिकेलफलमानाय्य तैले प्राक्षिपत्। नवनारिकेलं क्षिप्तमात्रेणैव द्विधा भिन्नमभवत्। फले भिन्ने शकलमेकं शङ्खस्य, अन्यं लिखितस्य च ललाटे उत्फुल्य लग्नोऽभवत्। तयोर्मनसि पुनरपि सन्देहस्समजनि किं सुधन्वा मन्त्रवित् उत औषधं तैले प्रायोजयदिति! दूताः तावब्रुवन्कृष्णनाम्नः आम्रेडनं विना नान्यत्सुधन्वना उदीरितमिति।

तैले क्रीडता तेन सुधन्वना उच्चैः उच्चारितानि कर्णमनोहराणि गोविन्दनामधेयानि ताभ्यां दूताः श्रावयामासुश्च। कृष्णस्य नामानि श्रावंश्रावं शङ्खस्य मनसि सुःखं समुदभवत्। राजानं कठिणशासनं न्यक्कृत्य पश्चात्तापेन तस्यैव भगवतः चरणारविन्दयोः ध्यानेन साकं तप्ततैलकटाहे स्वयमपि न्यपतत्। सुधन्वानं पर्यष्वजत्। तं धन्यमब्रवीत्। भगवद्भक्तनां संरक्षकं श्रीकान्तं लोके प्रमाणीकृतवन्तं सुधन्वानमभ्यनन्दत्। तस्य ध्यानेन जनाः तापत्रयविनिर्मुक्तास्सन्तः दुःखवर्जिता भविष्यन्तीति पुरोधाः अध्यगमत्। विष्णुमभक्तं तस्य ध्यानरतं दग्धुं वैश्वानरोप्यसमर्थः इति प्रथितमभवत्। शङ्खः सुधन्वनः परिरम्भणात् आत्मनः शरीरं पूतमभवत् इति तमश्लाघत्।

शङ्खसुधन्वानौ तैलाद्बहिरागतौ। शङ्खः राजानं, राजपुत्रानन्यान् सचिवादींश्च अन्यथाभावनं विना कृपया द्रष्टुं सुधन्वानं सूचयामास। अर्जुनं समागतं पुरद्वारि वर्तमानं संसूच्य तेन साकं संग्रामं कर्तुं शङ्खः सुधन्वानमबोधीत्। अर्जुनस्य पराभवे कृते कृष्णः स्वयमेवात्रगमिष्यति। तस्य भगवतः प्रत्यक्षसन्दर्शनेन वीरोचितस्वागतप्रदातारः पूता भवितुं एष एव सदवकाश इति तमस्मारयत्।

पुरोधाः शङ्खः हंसकेतुं राजानमुपसृत्य सनातनं कृष्णभक्तं पुत्ररत्नं सुधन्वानम् अक्षतं पश्य इत्यब्रवीत्। "आत्मानं भगवतः ध्यायेन पवित्रीकृत्य सः सुधन्वा मामपि पावयामास " इति जगाद। अमेययशसः पात्रं तमभिनन्द्य युद्धाय सुधन्वानं प्रेषयितुं प्राचोदयत्।

३२

सुधन्वा पितरमुपससार। ववन्दे। हंसध्वजः पुत्रं समुत्थाप्य तं पर्यष्वजत्। केशवस्य प्रभावेण पुत्रं चानामयमविन्दत। पार्थस्य सारथिं कृष्णं प्रदर्शयितुं सुधन्वना एकेनैव साध्यते इत्यमनुत। युद्धाय गन्तुमसूचयत्। पुरोधसा तौ शङ्खलिखितौ तमन्वग्रहीष्टाम्। सुधन्वा दिव्यं सज्जं रथमारुरोह। भ्रातरः, सचिवः, सुमतिः, सेनाश्च तमन्वगमन्। तैश्च साकं सः पार्थस्य सेनायाः पुरतः अगात्। दुन्दुभयः नेदुः। वीराः शङ्खान् दध्मुः। भगवतः भक्तस्य सुधन्वनः नेतृत्वे विनयं करतलामलकं सैनिकाः निरधारयन्। तेषां कलकलध्वनिः शत्रून् प्रचोदयति स्म।

पार्थः हंसध्वजस्य सैनिकैः नीतं हयमपश्यत्। प्रद्युम्नमन्यान् वीरांश्चाह्वयामास। वीरेण हंसध्वजेन योद्धुं कः गमिष्यतीत्यपृच्छत्।

प्रद्युम्नः स्वयमेव नेता भवितुमपैक्षत। वृषकेतुस्तं न्यरुणत्। शत्रुसैन्ये मुखवातेनैव निवारयितुं साध्ये वीरस्य प्रद्युम्नस्य, तथा सैनिकानां चावश्यकता न वर्तते इत्यब्रवीत्। मशकः नेत्रपक्ष्मप्रहारेण हन्यते यदि ताक्ष्र्यं कः मन्दात्मा आह्वयति इति प्रोवाच। अजामिलं यमदूतगणैर्बद्धं हरिकिंकरः यथा श्रमेण विना व्यमूमुचत्। तथा भवतामाज्ञाविधेयेन मयैकेन तुरङ्गमः विमोचयिष्यते इति विश्वासमब्रवीत्।

तेषां पार्थप्रद्युम्नादीनां विश्वासं लब्ध्वा वृषकेतुः परोगच्छत् शङ्खं दध्मौ। वृषकेतुनां प्रचोदितः सूतः रथं सुपताकेन शोभमानं सुधन्वनः रथस्य पुरतः अस्थापयत्। सुधन्वा विस्मितो बभूव। आत्मना रचितं पद्मव्यूहं निर्लक्षीकृत्य कोऽयं वीरः अत्र समागत इति चिन्तयामास। स तु तेन न दृष्टपूर्वः। बहून् वीरान् अनाहत्य आगतं तमेकं वीरमभिनन्द्य स्वयमपि तेन वीरेण सहायं विना योद्धुं निश्चिकाय। सुधन्वनः रथस्य सारथिः तस्येङ्गितं ज्ञात्वा रथं वृषकेतोः रथस्य समीपं निनाय। कुतूहलं निरोद्धुमसमर्थस्सन् केन वीरेण योद्धव्यमिति जिज्ञासुः तमपृच्छत् "पराक्रमिन्! कस्त्वम्? कस्यात्मजः? तव नाम किम् ' इति।

धीरवरः वृषकेतुः जगात "तेजस्विन्! रणे मृताः सूर्यमण्डलं विन्दन्तीति श्रुतमस्माभिः। तं सूर्यं भेत्तुं त्वमप्युद्युक्तोऽसि। सः दिवाकरः मम पितामहः। दातृणामग्रगण्यस्य कर्णस्य पुत्रोऽहम्। मम नामधेयं वृषकेतुरिति। मम पितृव्येन युधिष्ठिरेण करिष्यमाणस्य क्रतोः विसर्जितस्य हयस्य संरक्षणायागतेषु वीरेषु मत्तः प्रत्यवरः नास्ति। मम तीक्ष्णाः नाराचाः अद्य त्वां तव सैन्यं च प्रविशन्ति। मम बलं सायकतः पश्य' ' इति।

सुधन्वा तस्य वीरोचितानि वचनानि श्रुत्वा आत्मानमेव पर्यचाययत् ' 'वृषकेतो! हंसध्वजस्य पुत्रस्य मम नाम सुधन्वा इति। पौरुषं प्रदर्शय। पौरुषवर्जिताः मन्दाः स्वकुलं, पितृपितामहान् एवं वर्णयन्ति। साध्यते यदि तर्हि मिथ्याजल्पनं विहाय शत्रुबलं वारयितुं प्रयत्नं कुरुष्व' ' इति।

प्रत्युत्तरप्रदानं विना वृषकेतुः शरान् मोचयितुमुद्युक्तोऽभवत्।



वृषकेतुः सायकान् मुमोच। शरैः सुधन्वानमाच्छादयामास। सिंहनादमकरोत्। गजाः, अश्वाः सारथयः असंख्याकाः अम्रियन्त। सुधन्वनः सारथिं जघान। हयान् गतासूनकरोत्। बलं प्रभिन्नमभवत्। हाहाकारो महानभूत्। सामान्यं तं मन्यमानः सुधन्वा तस्य पौरुषं दृष्ट्वा विस्मितो बभूव। प्रतिकर्तव्यं झडिति न कृते हानिर्महती भवेत् इति अमन्यत। स्वयमपि शरन्विमुमोच। वृषकेतोः धनुः भग्नम्। तस्य रथं भ्रममाणमकार्षीत्। रथस्थं तं तूलमिव स्वस्य सैन्यस्य मध्ये अपातमत् वृषकेतुः आत्मानं शत्रुसैन्यस्य मध्ये वर्तमानमजानात्। तं बहवः वीराः परिवारिता आसन्। आत्मानं रथहीनं मत्वा धनुः जग्राह। बाणान् समधत्त। मुमोच। शराणां सन्धानं मोचनं न पश्यन्तः सैनिकाः बहवः गतासवोऽभूवन्। तथापि परितः घोरायुधदारिणः वीरान् दृष्ट्वा वृषकेतुः देवकीनन्दनं दध्यौ। वृषकेतोः सारथिः तं शत्रुसैन्यमध्ये स्थितं विदित्वा रथमन्यं तस्य समीपं निनाय। वृषकेतुस्तमारुरोह। हसन् सुधन्वानं सायकैः विव्याध। आश्चर्यचकितः सुधन्वा दिव्यं सायकं प्रयुज्य तं मूर्छितमकरोत्। रथिनं वृषकेतुं मूर्छितं दृष्ट्वा सारथिः रथं ततो निनाय। व्यूहं भित्त्वा प्रद्युम्नसमीपमगमत्।

प्रद्युम्नः सुधन्वानं अभिगच्छन्तं लक्ष्यीकृत्य बाणान् विससर्ज। सुधन्वनः सूतः निहतः। प्रद्युम्नस्य शरमोचने कौशलं दृष्ट्वा सुधन्वा मुमुदे ' स्वं पौरुषं प्रादर्शयत्। प्रद्युम्नं शरैः विव्याध 'सिंहनादं चकार' तयोः युद्धं अतीवाद्भुतमवर्तत। परस्परं मूर्छितावभूतामलब्धप्रज्ञौ पुनरपि आयोधनं प्रारभेते। कृतवर्मा सुधन्वना विद्धोऽभवत्। अनुशाल्वः सुधन्वानं रणायाजुहाव। सुधन्वानं सः पराक्रमिणमब्रवीत्। नाराचान् तीक्ष्णान् मुमोच। तान् शरान् मध्येमार्गं छेत्तुं सुधन्वना कृतः प्रयत्नः विफलोऽभवत्। शरः तस्य हृदयं प्राविशत्। अनुशाल्वेन मुक्ताः बाणाः तं विरथमकार्षुः। बलं प्रणष्टमभवत्। तस्य रणगर्जनेन लब्धप्रज्ञः सुधन्वा अनुशाल्वमेकेन बाणेन विव्याध। विद्धः सः अनुशाल्व पपात। कृतस्य प्रतिकर्तव्यमिति सुधन्वा शत्रुसेनामाकुलां चाकार्षीत्।

अप्रतिमपराक्रमं प्रदर्शयतः सुधन्वनः शरैः ताडिता सेना इतस्ततः प्राणान् संरक्षितुं छिद्रमन्वेषयामास। स्वस्य सैन्यस्य दुःस्थितिं वीक्ष्य सात्यकिः रणभूमिं प्राविशत्। उभौ समानपराक्रमिणौ युद्धं सुतुमुलं समजनि। सुधन्वा सात्यकिं विरथमकरोत्। सुधन्वनः सारथिं सात्यकिं जघान। उभौ नवे स्यन्दने आरुक्षताम्। सुव्यवस्थिततावभूताम्। उभयोः ध्वजौ प्रभग्नौ। तयोः घोरं युद्धं वीक्षमाणाः सम्भ्रान्तास्सन्तः हाहाकारमकार्षुः। चकितास्ते पार्थमुपसृत्य प्रावोचन्। नष्टं बलं वीक्ष्य सैनिकैश्च प्रचोदितः पार्थः स्वयमेव युद्धायागमत्।

स्वपक्षस्य पराजितान् बहून् वीरान् पार्थः सन्ददर्श। पुरा सः बहून्यायोधनानि दृष्टवान् श्रुतवान्। द्रोणभीष्मकृपकर्णादिभिः अन्यैः वीरैश्च कृतायोधनः। गन्धर्वैः यक्षैः पन्नगैश्च धनञ्जयः युध्यमानः तेषां समक्षं पराक्रमप्रदर्शनेन तुष्टिं च प्राप्तवान् एव। तथापि सुधन्वा तेषां सर्वेषामपि वरिष्ठ इत्येवामनुत। शङ्करेणापि कृते युद्धे अननुभूतं विस्मयं सूचयामास। सुधन्वनः शरसन्धानमोक्षकौशलं बहुधा अभ्यनन्दत्। इङ्गितज्ञः धन्वी सुधन्वा पार्थमब्रवीत् "पार्थ! त्वया युद्धानि बहूनि कृतानि। त्वं वीरः। पुरा कृतेषु संग्रामेषु कृष्णस्त्वत्सखा सारथ्यमावहत्। त्वां निमित्तमात्रं रथिनं कृत्वा देवकीनन्दनः स्वयमेव स्वस्मै स्वाभीष्टपूर्तये युद्ध्यति स्म। अद्य त्वं कृष्णहीनः। आत्मनः पराक्रममेव विश्वस्य युध्यमानस्व तव आयोधनस्य स्वरूपं प्रकाशयिष्ये। मया सह योद्धुं तव पौरुषमस्ति वा विचारणीयम्। अहं सुधन्वा। हंसध्वजस्य पुत्रः। तव यूपे एनं हयं निबध्य हंसध्वजः वाजिमेधं करिष्यति। पराक्रमं प्रदर्शय। देवाः पश्यन्तु। कृष्णयुतो वा कृष्णविहीनो वा संगरे त्वां जेष्यामि' ' इति।

तस्य वचांसि श्रुत्वा महता क्रोधेन पार्थः शरान् मुमोच। सुधन्वा तान् सायकान् मध्येमार्गं चिच्छेद। हसन् बाणैः पार्थं विव्याध। अर्जुनस्तान् छित्वा आग्नेयमस्त्रं प्रायुङ्क्त। तेनास्त्रेण हंसकेतोः बलं दग्धमभूत्। अर्जुनस्य बाणानां परंपरया सर्वा पृथिवी आवृता बभूव। शत्रुसैन्ये हाहाकराः महान् अभूत्। सुधन्वा सैन्यं ज्वालाकुलं वीक्ष्य अग्नेर्निर्वापणाय वारुणास्त्रं समधत्त। महती वृष्टिः अवर्षीत्। सुधन्वा कृष्णभक्तः अर्जुनस्य कदापि नावरः। तेन विसर्जितेन वारुणास्त्रेण शिलावृष्टिः अदृष्टपूर्वा संदृष्टा। पार्थस्य सैन्यं शीतेन विमोहितमभवत्। अग्नेः सन्दर्शनं कुतः? चातकाः मयूराः अकालवर्षेण ननृतुः। चर्मनद्धानि वादित्रादीनि विनष्टानि। अतिवृष्ट्या परस्परं जना न पश्यन्ति स्म।

धनञ्जयः सुधन्वनः अस्त्रमहिम्ना सन्तुष्टः वायव्यास्त्रं प्रायोजयत्। मेघानामपसारेण साकं भ्रामितं बलं दृष्ट्वा सुधन्वा झडिति पार्थस्य धनुः चिच्छेद। छिन्नं शरासनं कृत्वा पार्थं सुधन्वा पर्यहसत्। प्रावोच्च "पार्थ। व्यर्थस्ते पराक्रमः। सारथ्ये भगवान् कृष्णः नास्ति। शरैः अतीव क्षतः असि। अहो! क्व गतं ते पौरुषम्। पूर्वयुद्धेषु साह्यकृतं, प्राणसदृशं देवकीनन्दनं भगवन्तं परित्यक्त्वा प्राकृतेन सारथिना समागतोऽसि। ममाग्रे समागतस्य तव कुतो मोक्षः। कृष्णं स्मर। धैर्येण तिष्ठ। मया विसृज्यमाणानां शराणां वेगं परीक्षस्व" इति बहुधा पर्यहसत्। धनञ्जयः न विचचाल। अन्यत् धनुरग्रहीत्। वामहस्तेन रश्मीन् कार्मुकेण साकं प्रगृह्य मनसा भैष्मीधवं, जगद्रक्षकं सस्मरन्सायकान् अमूमुचत्। पार्थस्य स्मरणमात्रेण सर्वज्ञः जगत्पतिः तत्राजगाम। तस्य हस्तात् रश्मीन् वशानकरोत्। 'रथं प्राचालयत्।सायकान् विमोक्तुं पार्थमाज्ञापयामास।

३५

भगवान् रमाजानिः अपेक्षमाणानां आर्तानां मनोदार्ढ्यं प्रथमतः परीक्षते। तेषामपेक्षा अनन्यगतिका यदि अनुपदमेव स्वयमेव प्रत्यक्षतः आविर्भूय तेभ्यः आनुकूल्यं प्रयच्छति। "अनन्याः चिन्तयन्तो मां ये जनाः" इति। करिवरे शुण्डया कमलमुत्क्षिपन् रुवति भगवान् झटिति ग्राहात् तमूमुत्। प्रह्लादः ध्रुवः अजामिलः एते तस्य निदर्शनपात्राणि। पाण्डवास्तु तस्य प्राणा एवासन् इति तेनैव प्रमाणीकृतम्। द्रौपदी तेन बहुषु सन्दर्भेषु संरक्षिता अवर्तत। ध्यानस्यानुपदमेव पुरतस्तेषां पाण्डवानां प्रत्यक्षीभूय धर्मसंस्थापने आत्मनः श्रद्धां प्रकाशयति स्म। अर्जुन स्तस्य

प्राणसखः। कदापि तस्य दुःखं सः न सहते स्म। न केवलं विग्रहेषु तस्य तस्मिन्। साह्यदानम् अपि तु सुभद्रायाः परिणयश्च तस्य परमानुग्रहेणैवावर्तत। सुधन्वा च तस्य भक्त एव। अपि तु तेन तस्य पार्थस्य सुधन्वना परिहसनं सः कृष्णः नैव सेहे। धनञ्जये खिन्ने, सुधन्वनि परिहसति, पार्थस्य रथस्योपरि सः प्रादुरभवत्। रश्मीनग्रहीत्। पाथ धनुषि शरान् योजयितुं सूचयामास च। सुधन्वा हरिं पार्थस्य रथस्योपरि समद्राक्षीत्। तेन गृहीतान् रश्मींश्च संददर्श। सन्तुष्टं पार्थं, देवकीतनयं नमत्कुर्वन्तमपश्यत्। आत्मानं हरेः सन्दर्शनेन धन्यममनुत। अर्जुने सन्तुष्टेन मनसा शरान् मोक्तुं सज्जीभवति सत्यभामाधवमब्रवीत्। "जगद्वल्लभ। सर्वज्ञ! तवात्रागमनं पूर्वमेव मया गातम्। सर्वं त्वदीयमेव। अर्जुन! धन्योऽसि। कृष्णः समागतः। त्वद्धस्तात् सारथ्यं स्वयमेवावहत्। मां जेतुं प्रथममेव कृतसंकल्पोऽसि। शरान् मुञ्च। ममापि पौरुषं प्रकाशयिष्ये। मम प्रयत्नेन भगवन्तं तोषयिष्यामि" इति।

तस्य कृष्णभक्तस्य शिरः पातयितुं पार्थः आत्मविश्वासेन प्रतिजज्ञे। कृष्णे कुतूहलेन पश्यति पूर्वजानां स्मरणेन शपथं चकार। नो चेत् पुण्यहीनेभ्यः सिद्धं निरयं गन्तुमैच्छत्। अनृतं नोक्तं पूर्वं मयेति च जजल्प प्रतिज्ञामेवं कृत्वा ततः कृष्णं नमस्कृत्य आत्मानं सत्यवचसं कर्तुं प्रार्थयामास। सुधन्वा पार्थस्य वचांसि श्रुणोति स्म। भक्ताग्रणीः सः कृष्णं संस्मृत्य स्वयमपि शपथं चाकार्षीत्। "कृष्णस्य सन्निधौ पार्थेन विमुच्यमानाम् त्रीन् दिव्यान् शरान् छिनद्मि। अन्यथा घोरां गतिमवाप्नुया"मिति। बाणान् विससर्ज। पार्थं तस्य सारथिं कृष्ण च शरैर्दशभिरताडयत्। रथमुत्पाटयामास। कृष्णेन साकं वर्तमानं रथं भ्रामयामास। शराणां विमोचनेन रथमुत्सारयामास च।

कृष्णस्तुष्टिमाप। सुधन्वनः पौरुषं पार्थाय प्रादर्शयत्। तथाविधेपि पराक्रमशालिनि व्यर्थप्रतिज्ञा भवेत् इति कुन्तीपुत्रमजागरयत्। समालोचनेन विना कृता प्रतिज्ञा व्यर्था भवेत् इति सन्देहमब्रवीत्। पूर्वमेवमेव कृतां जयद्रथवधप्रतिज्ञां पार्थायास्मार्षीत्। हिताहितमनालोच्य असकृत् एवं प्रतिज्ञाकरणमसाधु इत्यबोधयत्। "अर्जुन! मया पद्भ्यां सुधन्वनः शरवेगं रोधयितुं प्रयत्नः कृतः। तथापि तेन मुक्ताः शराः पश्य! कियद्दूरमनयन्। सुधन्वा एकपत्नीव्रतयुतः। तस्य तत् व्रतं कर्तुं न त्वया वा न मया वा शक्यते। युद्धेऽस्मिन् एवं कृतया तव प्रतिज्ञया महत्कष्टमापतित' 'मिति कर्णे लगित्वा अब्रवीत्।



कृष्णे एवं सन्दिहति पार्थः पुनरपि महान्तं विश्वासं जगाद। त्रिभिः बाणैः तस्य शिरः पातयिष्ये इत्यब्रवीत्। "त्वयि अनागते महत् कृच्छ्रमासीत्। तवात्रागमनेन मम वचः न मिथ्या भविष्यति" विश्वासं प्राकाशयत्। कृष्णस्य स्मरणपूर्वकं शरान्विमुच्य नभः व्यावृणोत्। सुधन्वा तेन मुक्तान् सायकान् वीक्ष्य धनुः अग्रहीत्। गोवर्धनगिरेः वहनेन यथा गावः संरक्षिताः तथा पार्थं रक्षितुं कृष्णमसूचयत्। सुधन्वनः कुहकोक्तीः असहमानः धनञ्जयः शरे दिव्यं सायकं समधत्त। तममोघं कर्तुं कृष्णः स्वं पुण्यं तस्मिन् समयोजयत्। सुधन्वनः मृत्यै योजयामास। देवाः परस्परयोः प्रतिज्ञाश्रवणेन जातकुतूहलाः दिवि सम्प्राप्ताः। युद्धदिदृक्षवः समामिलन्। अप्सरसां गणाश्च दिवि समकलयन्। दिव्यालङ्कारभूषितानां तेषां विमानमधिरूढानां श्रेणिः पश्यतां स्म।

सुधन्वनः मनसि कृष्णः हितकारकः इति भावना समजनि। मनसा तमेव ध्यायन् पार्थेन प्रेष्यमाणं सायकं छेत्तुं निरचिनोत्। सचिवं पुण्यं पणमकरोत्। तनु पुण्येन सायकः भिन्नः भवेत् अन्यथा राक्षसदस्युभिः तत्पुण्यं भुक्तं भवतु इति संकल्पमकरोत्। आत्मना कृतस्य पुण्यस्य सामर्थ्यं गोविन्दः पश्यतु इति पार्थेन मुक्तस्य बाणस्य छेदनाय अर्धचन्द्र शरं व्यसृजत्। पार्थस्य शरः भिन्नोऽभवत्। देवाः विसिष्मियिरे। सुधन्वना कृतस्य पुण्यस्य पुरतः कृष्णपार्थयोः सुकृतं निरर्थकमभवत्। पुनरपि अर्जुनः द्वितीयं सायकं शरे समधात्। कृष्णः समस्तायाः क्षितेः प्रदानेन लब्धं पुण्यं सायके संयोजयामास। तेन पुण्येन सुधन्वनः शिरः कृत्तं भवतु इति भावयामास। सुधन्वा कृष्णेन परित्यक्तं पुण्यसंचयं बुबुधे। अर्जुनार्थं पुण्यसञ्चयमेव त्यक्तवन्तं गोविन्दं प्राशंसीत्। स्वस्य च प्रतिज्ञां तस्मै अश्रावयत् "गोविन्दं! पश्य मे शरसामर्थ्यम्। यद्येतत् पार्थेन मुक्तं बाणं न भिद्यात्तर्हि अरुन्धतीसहितः वसिष्ठः मया हतो भवतु। तत्पापं चानुभविष्ये। पार्थ! त्वया मुक्तस्य बाणस्य गतिं पश्य। त्वमेव धन्यः। तव वचांसि सत्यापयितुं त्वं च रक्षितुं भगवान् स्वकं पुण्यमेव परित्यजति। तव संमुखे सर्वे तस्य भक्ता अवरा एव" इति।

महता क्रोधेन पार्थः द्वितीयं शरं सूर्यमण्डलसन्निभं मुमोच। तस्मिन् बाणे विमुञ्चति देवाः विस्मिता बभूव। उभयोर्वीरयोः को जेता इति निर्णेतुमसमर्था आसन्। तेन पार्थेन विमुक्तः बाणः अग्निं सर्वतः वमन् गच्छति स्म। तस्य बाणस्य धुरि प्रलयः तृणवद्भासते स्म। महाबलः वीरः सुधन्वा कृष्णमेव सतत ध्यायन् अर्जुनेन मुक्त शरं अभिगच्छन्तं मध्ये छेत्तुं स्वयमपि बाणं विससर्ज। अतीव पौरुषेण तेन मुक्तः बाणः अर्जुनस्य शरमच्छिनत्। हंसध्वजस्य सेना प्रमोदेन अमेयेन हर्षध्वानमकरोत्। देवानां कर्णततयः विभिदुः। देवाश्च सुधन्वनः पौरुषं वीक्ष्य हर्षनिर्भराः सञ्जाताः।

३७

आत्मनः पौरुषमेव विश्वस्यायोधनं कुर्वतः पार्थस्य नीतिबोधनायैव अभिनयः कृष्णेन प्रदर्शित इवासीत् वीरयोस्तयोः स्पर्धा। सुधन्वनि पार्थस्य द्वितीयं शरं कर्तयति सुधन्वा भगवतः महिमानं मनसि आवर्तयत्। पार्थस्तु स्वके बले विश्वासमेवात्यजत्। सुधन्वा अर्जुनस्य शरं कृत्वा पितरं तोषयितुं, सैनिकान् उत्साहेन स्थापयितुं च स्वकं शङ्खं दध्मौ। वसुधा एव तेन ध्वानेन चकम्पे। कृष्णः खिन्नमर्जुनं वीक्ष्य तं प्रोत्साहयामास। धनुषि शरं योजयितुं प्राचोदयत्। पाञ्चजन्यं दध्मौ। देवदत्तं धम इति सुभद्राजानिं प्राचोदयत्। स्वकं पुरातनं पुण्यं पणमकरोत्। तस्य सुधन्वनः पतनं निश्चितमिति प्रतिजज्ञे। द्वावपि युगपत् पाञ्चजन्य-देवदत्ते दध्मतुः। शीघ्रमेव धनुषि शरं सन्धाय विस्रष्टुं अर्जुनं त्वरयामास। बाणे योजिते कृष्णः शरस्य पश्चिमभागे ब्रह्माणमावाहयामास। मध्यभागे कालं न्यवेशयत्। स्वयमेव बाणस्य फाले तस्थौ। सुदृढाय तस्मै बाणाय रामावतारे कृतं पुण्यं सर्वमपि न्यधात्।

देवाः बिभ्युः। हाहाकारः सर्वत्र समभवत्। यक्षरक्षयुताः देवाः साप्सरसः मूका इव तस्थुः। सुधन्वा परिस्थितिं व्यजानात्। शरे विश्वमेव व्यवस्थितं बुबुधे। स्वस्य वधमेवोद्दिश्य अर्जुनार्थं गोविन्दकृतं कर्म दृष्ट्वा मनसि प्राहसत्। "पार्थ। प्रतिज्ञां कुरु। पूर्वकृतां पुनः स्मर" इत्यब्रवीत्। फल्गुनः धनुषि शरं संयोज्य "सुधन्वन् अनेन तव शिरः सकिरीटं पातयिष्ये। नो चेत् विष्णुगिरीशयोः हननेन संभविष्यमाणं पापमनुभवामि" इति अब्रुवत्।

सुधन्वा चैवमेव स्वप्रतिज्ञां प्राकाशयत्। "रात्रौ शिवस्यापिगतश्च काशीं पूजां हरत्यंघ्रितलेन पापः स्नातश्च तीर्थे मणिकर्णिकायां यः कोऽपि सोऽहं न भिदे शरं चेत् ' इति। अर्जुनः सायकं सन्दधे। देवाः बिभ्युः। महीतलं भ्रान्तमभवत्। शरस्य स्वनात् वादित्राणि विनष्टानि। शकुनान्येतान्यतीव विमुखान्यपि सुधन्वा न विमुमोह। अर्जुनं प्रोवाच "पार्थ! महायुद्धेऽमुष्मिन् त्वन्निमित्तं जगत् क्षुभितमभूत्। तव बाणं छेत्तुं सायकं विसृजामि। सर्वे सुराः हरप्रमुखाः जगत् पालयतु। सर्वे जनाः सुखिनो भवन्तु। शरस्य वैफल्यकरणे न मे संशीतिः। कृष्ण! त्वां नृसिंहं वेद्मि। त्वां परित्यज्य अहं गन्ता यदि, हंसध्वजः लज्जितो भवति। मम जननी मां नाभिनन्दति। भार्या प्रभावती कुप्यति। त्वमेव नः पालकः। तिष्ठ! गोविन्द! युद्ध्यस्व। अर्जुने पौरुषं चावाहय" इति। ततः मनसा गोविन्दमेव स्मरन् पार्थेन मुक्तस्य सायकस्य छेदनाय बाणं व्यमुञ्चत। अर्जुनेन मुक्तः सायकः सुधन्वना मध्ये छिन्नं सत् भूमी पपात। बाणं छिन्नं वीक्ष्य हंसध्वजस्य सेना हर्षध्वानमकरोत्। देवाः हाहाकारमकार्षुः। सुधन्वा परमेणोत्साहेन स्वबाहुं ताडयामास। ' ननर्त च। बाणे छिन्ने चन्द्रमण्डलमेव चकम्पे। चन्द्रवंशीयानां मूलपुरुषः चन्द्रमाः धनञ्जस्यसायके विफले निर्जलत्वं भेजे। एवं सति बाणस्य शिष्टेनार्धेन सुधन्वनः शीर्षं कर्तितमभवत्। रम्यं ज्वलितकुण्डलं, मन्दहासयुतं सुधन्वनः कृतं शीर्षं दृष्ट्वा विस्मयभगुः। मूकास्तस्थुः। सेना सम्भ्रान्ता बभूव।

३८

अर्जुनेन मुक्तस्य बाणस्यार्धेन सुधन्वनः शिरः कृत्तमभवत्। कृष्ण, केशव, राम, नृसिंहेति जपत् तत् शिरः कृष्णस्य पादाम्बुजे न्यपतत्। कबन्धस्तु समराजिरे इतस्ततः बभ्राम, अभिमुखान्हयान् नागान् सैनिकानसंख्याकान् अहन। तस्य कबन्धस्य वेग सोढं ते न शेकुः। कृष्णः उभाभ्यां हस्ताभ्यां सुधन्वनः शिरः अग्रहीत्। मुखसमीपं नीत्वा तत् वदनं स्वपश्यत्। तेजः किञ्चन तस्मात् मुखाद्बहिरागमत। केशवस्याननं प्राविशत्। भक्तस्य सुधन्वनः महिमानं कोऽन्यः ज्ञातुं समर्थः। तस्य तेजसि आत्मनि प्रविष्टे वसुदेवस्तु स्वकराभ्यां तत् शिरः हंसध्वजस्य रथं प्रति प्राक्षिपत्। हंसध्वजः पुत्रस्य शिरः जग्राह। मुखमपश्यत्। विस्मितोऽभवत्। अरोदीत्। कर्तव्यं नाजानात्। ' 'सुधन्वन्। पुत्र! किं कृतं त्वया। कुतः नाभाषसे। मां तव पितरं जानीहि। किं रुष्टोसि। मा मा तथाकुरु। निर्दयोऽहम्। त्वां तप्तकटाहतैले प्राक्षिपम्। पुत्रस्नेहः न मया परिगणितः। तव दण्डनमेव चिकीर्षतः मम किमेव कृतवानसि। रणभूमौ कृष्णमाह्वयिष्ये इति कृतां प्रतिज्ञां 'पालितवानसि। तेन साकमयुद्ध्यथाः। अर्जुनं निरहंकारमकरोः। पराक्रमेण कृष्णं सनातनमतोषयः। प्रभावत्याः काममपि पूरितवानसि। कृष्णे भक्तिं च प्राकाशयः। कर्तव्यप्रज्ञा, तव विक्रमश्च श्लाघनीयौ एव। पुत्र! मां क्षमस्व" इति हंसध्वजः बहुधा विललाप।

पुत्रस्य वदनं करयोः दृढं परिगृह्य चुचुम्बे। पुत्रशोकेन अदम्येन पीडितोऽभवत्। प्राणैर्युतमेव तं सुधन्वानं मन्वानः पुनरपि भ्रातृभिस्माकं पार्थं पराजितं कर्तुमसूचयत्। सुरथादीन् पुत्रानन्यान् "सुधन्वा प्रतिज्ञामनुसृत्य कृष्णं युद्धभूमौ समानयत्। तेन साकं पराक्रमं प्रकाशयत् ' इति विववार। सुरथः पितुः वचांसि श्रुत्वा तमाश्वासयामास। युद्धे मृताय तस्मै विलपनं त्याज्यमित्यस्मारयत्। हंसध्वजः चिन्तयामास "अहो! सुधन्वा धन्यः। सुकृती। महता सुकृतेनैव कृष्णपदाम्बुजं प्राप्यते। तस्य चरणकमलयोर्वियोगः दुष्कृतिजन्यः। सुधन्वनः शिरः कृष्णपदाम्बुजं प्राप्तं ततः

अत्रागात्। तस्य दुष्कृतं घोरं किंचित् स्यात्। अथवा मयैव दुष्कृतं कृतं मन्ये। तत्र कृष्णस्य पदयोः क्षणमात्रमपि नातिष्ठत्। एतत् पुनरपि कृष्णस्य रथं प्रत्येव प्रेषणीय "मिति निश्चित्य सुरथे भ्रातरि पश्यति तस्य भगवतः देवकीनन्दनस्य रथे प्राक्षिपत्।

कृष्णः पुनश्चणतं सुधन्वनः शिरः दृष्ट्वा कराभ्यां गृहीत्वा गगनं प्रति उदक्षिपत्। तत् शिरः गगने अन्तर्हितमभवत्। शङ्करः समागच्छत्। शीर्षं कराभ्यामग्रहीत्। ज्वलितकुण्डलं, हसत्मुखं, रम्यं तदपश्यत्। भक्तानामभयंकरः शङ्करः दध्यौ। कृष्णेन प्रक्षिप्तं सुधन्वनः शिरः तदजानात्। सुकृतिनस्तस्य हरिभक्तस्य शिरः अनुपदमेव स्वकण्ठमलंकृतायां रुण्डमालायां सन्दधे। अहो। धन्यः सुधन्वा। पौरेभ्यः आत्मानं कृष्णभक्तं प्राकाशयत्। कर्तव्यमेव मनसिकृत्य कृष्णेन साकं युयुधे। तस्यैवानुग्रहेण तत्पदाम्बुजं प्राप्य तेनैव प्रेषितस्सन् हरवक्षः अलमकार्षीत्।

३९

हंसध्वजः पुत्रं सुरथमाह्वयत्। युद्धमनुसर्तुमसूचयत्। सुरथः पितरं नमस्कृत्य युद्धाय प्रतस्थे। "मम भ्राता सुधन्वा महाबलः आसीत्। तं कृष्णः जघान। तं केशवं सपार्थमद्य मम सैनिकानां पुरत एव हनिष्यामि। देवकीनन्दनः धीरो यदि सम्मुखे मम तिष्ठतु" इति उच्चैरब्रवीत्। शङ्खं दध्मौ। पार्थस्याभिमुखं जगाम। पार्थं योद्धुमचोदयत्। रथे कृष्णं दृष्ट्वा सारथिं, "कृष्ण! बालः मे भ्राता त्वया भविष्यतः चिन्तनं विना निहतः। तस्याद्य फलं भुंक्ष्व। अर्जुनस्य संरक्षणे प्रयतस्व। अर्जुनस्य संरक्षणाय, बालस्य सुधन्वनः प्राणहरणाय आर्जितं पुण्यं सर्वमपि त्वया विनष्टमभवत्। तव कर्मणि विमृष्टे त्वं गोपाल इति स्वयं व्यक्तं भवति ननु। मुक्ताफलस्य प्रदानेन बदरं फल त्वया सम्पादितम्' इति पर्यहसत्। कृष्णस्तं समागतं सुरथं वीक्ष्य अर्जुनमुवाच "पार्थ! एष महाबलः, सुकृतिनां वरः। न च तस्य पुरतस्त्वमद्य गच्छेः। भ्रातुः मरणेन सः अतीव दुःखितः। अन्यान् वीरान् तत्र प्रेषय। त्वं न चास्याभिमुखो भवेः। एवं सति महाननर्थो भविष्यति" इति अर्जुनः तस्य भगवतः वचसि विश्वासं न प्रापत्। अशुभानां सहस्राणि अनेन कृष्णेन पूर्वं भग्नानि। एवं सति अनेन सुरथेन किं वा साध्यते। कुतः अस्मात् कृष्णस्य भीतिः इति चिन्तापरोऽभवत्।

कृष्णस्तस्येङ्गितानि विदित्वा पुनरप्यब्रवीत्। "अर्जुन! यद्येष ' आयोधनमारप्स्यते, तर्हि पितामहस्य चिन्ता समुत्पद्यते। द्वितीया सृष्टिस्तेनारब्धव्या भवेत्। सुरथस्य बलं महत्। तव बलं चाल्पं वर्तते। प्रद्युम्नादीन् वीरान् प्रेषय। उपायश्चान्यः मार्गणीयः। सुधन्वनः वधायार्जितं पुण्यं सर्वमपि व्ययितम्। सुरथस्य चरिते दुष्कृतं नैव दृश्यते। किंचित् दुष्कृतस्य तस्मिन् सत्वेऽपि विजये आशा स्यात्। तस्य शरीरे केवलं सुकृतमेव परितिष्ठति। दुष्कृतिनां "व्याघ्रतस्कराजन्यसर्पाग्नीनां भयं भवेत्, न चसुकृतकारिणां, इत्युक्त्वा स्वयमेव प्रद्युम्नमाह्वयत्। तं चाज्ञापयामास। कृष्णस्याज्ञां पुरस्कृत्य प्रद्युन्मः स्वकीयेः सैनिकेः सार्धं सुरथेन योद्धुमगात्। तेषु 'प्रद्युमादिषु युद्धभूमिं प्रविष्टेषु कृष्णः अर्जुनमन्यत्र निनाय।

अतीवोत्साहेन कृष्णपार्थाभ्यां योद्धुमागतः सुरथः अन्यान् अभिमुखानपश्यत्। तौ तेन न संदृष्टौ। शत्रुं विहाय शिशुभिः, योद्धव्यमभवत् इति चिन्ताकुलो बभूव। सः सुरथः एतान् पुरतः 'कृत्वा कृष्णपाण्डवौ अन्यत्र दूरतः

संस्थिताविति मेने। "एतेषांध्वंसनेन तौ अन्वेष्टव्यौ। पाताले वा स्ताम्। अन्तरिक्षे वा तिष्ठताम्, तौ हन्मि " इति निश्चित्य पुरतःस्थितान् प्रद्युम्नादीन् कुतस्तावित्यपृच्छत्। पार्थस्य सैनिकास्तस्य प्रश्नेन तं पर्यहसन्।

"वीराः न जल्पन्ति? पुरतः स्थितैरायोधनं कृत्वा ततः कृष्णपाण्डवावन्वेष्टव्यौ " इत्यब्रुवन्। तेषां परिहासेन क्रुद्धः सुरथः युद्धमारभत। बहवः निहताः। बहवः गतबाहवः, गतोरवश्चाभवन्। बलं सर्वं हाहाकारमकार्षीत्। त्रीणि योजनानि परिवार्य स्थितान् सैनिकान् आकुलान् कृत्वा सुरथः, स्वस्यामेयं पौरुषं च प्रकाशयन् यत्र कृष्णपार्थौ संस्थितौ तत्रागात्। जगत्प्रभुं हरिं देवकीनन्दनं पार्थसारथिं संददर्श।

४०

वीरः सुरथः बाणौघैः केशवाय कृष्णाय स्वागतमवादीत् तेन मुक्तैः शरैः विद्धः पार्थः शरैरेव तं प्रत्युदतरत्। सूतं प्राहरत्। हयान् ताडयामास। सुरथस्य धनुः भग्नम्। ध्वजः पपात। रथः निरुपयोगः समभवत्। अन्यत् धनुः गृहीत्वा सुरथः पार्थं विव्याध। तयोर्युद्धमतीव भयङ्करमवर्तत। कृष्णः सुरथस्य पराक्रमं वीक्ष्य तीव्रसन्तुष्टो बभूव। भ्रातुः मरणेनातीव क्रुद्धं सुरथं पार्थाय प्रादर्शयत्। तेन सैन्यं सर्वमपि नामावशेषितं भविष्यतीति पार्थमजागरयत्। तस्य सुरथस्य लक्ष्यं चावामिति तस्मै सूचयामास।

अर्जुनः भैष्मीजानैः वचांसि श्रुत्वा "भगवन्! तव प्रसादं पुरस्कृत्य सुरथं शीघ्रमेव हनिष्यामी" ति प्रतिज्ञामकार्षीत्। शरान् व्यमुञ्चत्। तान् शरान् क्रीडनकमिव परिगणय्य सुरथस्तं सूक्तं शरैः प्रत्युदतरत् बाणौघैः रथं भिनद्मीति संकल्पकरणेन बाणान् विससर्ज, देवकीनन्दनस्तु मुक्तेन तेन बाणेन भ्राम्यमानं रथं वीक्ष्य पद्भ्यां तं बलाद्भूमौ अवतारयितुं प्रायतत। धरां अवतीर्णोऽपि रथः किंचित् दूरं शरवेगेन नीतोऽभवत्। भगवानपि विसिष्मिये। कृष्णपार्थौ पाञ्चजन्यदेवदत्ते दध्मतुः। कृष्णः रोषात् सुभद्राजानिमब्रवीत्।

"पार्थ। पश्य! मया निगृहीतोऽपि रथः भ्रमन् वर्तते। तथा पराक्रमिणं सुरथं झटिति विरथं कुरु" इति।

कृष्णेन प्रचोदितः पार्थः पराक्रमस्य प्रकाशनेन बाणान् विमुच्य रथं सारथिं हयान् च शतधा अच्छिनत्। सुरथः विरथः कृतः। अर्जुनस्य रथं ध्वजस्थः पवनात्मजः स्वस्य लाङ्गलेन वेष्टितवानासीत्। अनेन पार्थरथः भुवि सुबद्धश्चावर्तत। यत्ने कृतेऽपि रथः न चचाल। तथाविधं रथं विरथः सुरथः दृष्ट्वा कृष्णपाण्डवाभ्यां लग्नं कृतं रथं स्वबलेनोद्धरत्। तस्य बाह्वोर्बलं वीक्ष्य तौ नृकेसरिणौ तुष्टिमापतुः। "युद्धभूमौ सागरे वा मेरौ वा हास्तिनपुरे वा रथंप्रक्षिपामि" इति गर्जन्तं सुरथं पार्थः शरैः विव्याध। सुरथः मुमोह। तस्य हस्तात् रथः विसृष्टोऽभवत्। लब्धप्रज्ञः सुरथः रथमन्यमागतं स्वकीय समारुरोह। युद्धं पुनरारभत।

सुरथः अर्जुनं प्रतिज्ञां कर्तुमसूचयत्। हंसध्वजे श्रण्वति पार्थः तं हनिष्यामीति प्रतिजज्ञे। सुरथश्च स्वप्रतिज्ञामघोषत् "पार्थ! त्वामहं पातयिष्यामि। नो चेत् सुकृतं मे प्रणश्यतु" इति। वीरावुभावपि बाणान् विससृजतुः। महता क्रोधेन युध्यमानाभ्यां ताभ्यां बलं विनष्टमभवत्। पार्थस्य धनुः सुरथेन छिन्नमभवत्। कृष्णसखः पुनरपि अन्यश्च जग्राह। सुरथं विरथमकरोत्। बाणौघैश्च सः आवृतोऽभवत्। वीरयोरेतयोर्युद्धं रामरावणयोरिवैवावर्तत। सैनिकाः मूका आसन्। शराणां सन्धानं वा मोक्षं वा न दृश्यते स्म। पार्थः दृढसंकल्पेन गोविन्दं मनसा संस्मरन् बाणं प्रयुज्यार्धचन्द्रं तस्य

सुरथस्य दक्षिणं बाहुं चिच्छेद। नानालङ्कारमण्डिते, दिव्येन धनुषा भूषिते, सुरथस्य दक्षिणे बाहौ भूमौ निपतति सुरथः वामहस्तेन महतीं गदां जग्राह। आयोधनं पुनरारभत। पार्थस्य तुरगान् क्रुद्धो जघान च जनार्दनम्। सहस्रं स गजानां च पातयामास भूतले।।

४१

छिन्ने च दक्षिणे बाहौ धैर्यमेवावलम्ब्य सुरथः वामहस्तेन गदां प्रगृह्य आयोधनमारभत। पार्थस्य रथस्य तुरगान् जघान। गजाः परस्सहस्राः प्राणान् अत्यजन्। असंख्याकाः रथाः प्रभग्नाः। इतस्ततः धावं धावं सुरथः अमेयं पराक्रमं प्रादर्शयत्। पार्थः पुनरपि बाणं विमुच्य तस्य वामबाहुं चाच्छिनत्। कराभ्यां वर्जितोऽपि सः वीरः पार्थं प्रत्युदगमत्। भयङ्करस्वरूपेण अभिगच्छन्तं सुरथं वीक्ष्य धनञ्जयः धनुषि युगपत् चतुरः शरान् योजयामास। एकेन हृदयं ताडयामास। द्वाभ्यां पादौ अच्छिनत्। तथापि रथं प्रति अभिगच्छन्तं सुरथं अन्येन बाणेन शिरस्यताडयत्। भगवतः गोविन्दस्य स्मृतिपूर्वकं मुक्तेन तेन बाणेन सकुण्डलं दीर्घनेत्रं तस्य महत् शिरः कृत्तमभवत्। तेन कबन्धेन च बहवो निपातिताः। तेन कबन्धेन बहुषु त्यक्तप्राणेषु कृतं शिरः पार्थं फाले तताड। पार्थश्च मूर्छामापत्। स्त्री न्यपतञ्च। कृष्णस्य पादारविन्दयोः सुरथस्य शिरः पपात।

तत् शिरः कृष्णः हस्ताभ्यां जग्राह। अर्जुनं समुदास्थापयत्। भूमौ निपतितं पार्थं रथमारोपयामास। " अर्जुन! एतत् शिरः महात्मनः सुरथस्येति जानीहि। ममातिके तेन कृता प्रतिज्ञा सत्या समभवत्। त्वमपि निपतितः" इति अब्रवीत्। कृष्णस्यानुग्रहात् लब्धसंज्ञः अर्जुनः कृष्णहस्तात् शिरः स्वीकृत्य तत् ववन्दे। तस्य शिरसः स्पर्शनेन शूरत्वावाप्तिं व्यश्वसीत्। कृष्णः वैनतेयम् सस्मार। स्मृतमात्रः गरुडः तत्र समागतः। कृष्णं देवं सनातनं नमश्चकार। कृष्णस्तु तत् शिरः प्रयागे पातयितुं तमाज्ञापयामास। विनतासुतः विस्मितोऽभवत् "भगवन्! सत्यं तत्र गङ्गा, यमुना, सरस्वती च विराजमानास्सन्ति। तत्र जलमात्रं वर्तते। एतस्मिन् शिरसि तत्र पातिते किं भविष्यति। त्वं माधवः। तस्यात्मा तवाननं प्राविशत्। प्राणिनां सर्वेषां मोक्षप्रदाता त्वम्। गङ्गाजले अस्थि प्रतिष्ठिते सः देही स्वर्गं प्राप्नोति। अमृतमश्नुते। नाहं तवाज्ञानिदानं ज्ञातुं समर्थः। तवाज्ञा गरीयसी। गोविन्द! तव दासः अहम्। शिरः दीयताम् ' इति।

कृष्णस्तस्य वचोभिरतीव सन्तुष्टः "अनेन मम भक्ताग्रण्यशिरसा प्रयागक्षेत्रं पावनं भविष्यति" इत्युक्त्वा शिरः तस्मै प्रादात्। अरुणानुजः तत् शिरः कराभ्यां प्रगृह्य उदडयत। प्रमथगणैः वृतः वृषारूढः साम्बः शङ्करः गरुडं समुरथशीर्षहस्तं प्रयागाभिमुखं ददर्श। भृङ्गिमाह्वयत्। गरुडं प्रति प्रैषयत्। तत् शिरः आनेतुमसूचयत्। चराचरगुरुणा शूलधारिणा कैलासनाथेन सुरथस्य शिरः आनेतुमाज्ञप्तः भृङ्गिः पार्वतीसहितं तं नमस्कृत्य ततो निरगात्। काश्यपसुतं वैनतेयमुपासर्पत्।।

42

जगन्माता पार्वती भर्तारं कैलासनाथं गरुडेन नीयमानं प्रत्यपृच्छत्। अहो सर्वज्ञाया अपि सन्देहः। जिज्ञासोः तस्याः सन्देह विनिवर्तयितुं शम्भुरब्रवीत् "कल्याणि! हंसध्वजस्य पुत्रः सुरथः अजुनेनायोधने निहतः। पार्थसारथिः कृष्णः तस्य सुरथस्य शिरः प्रयागे पातयितुं गरुडमब्रवीत्। तेन शिरसा गच्छतः गरुडात् तत् शिरः आनेतुमहं भृङ्गिचोदयम्।

ज्वलितकुण्डलं तत् शिरः रुण्डमालायां संयोजयिष्यते। तस्य भ्रातुरपि शिरः रुण्डमालायां समलंकृतं ननु। सुरथस्यापि शिरः सुभूषणं शोभिष्यते। स च सुरथः धर्मिष्ठः, वदान्यः, कृतज्ञः, शूरः, जितकामश्च अवर्तत। मम रुण्डमालायां तथाविधानामेव शिरांसि वर्तन्ते। नेतरेषां शिरांसि अहं धर्तुकामः " इति।

भृङ्गिः महादेवस्याज्ञां पुरस्कृत्य गरुत्मतः समीपमगात्। तं सामान्यं खगं परिगणय्य शिरः आत्मने प्रदातुमाज्ञापयत्। अन्यथा बलं प्रदर्शयिष्ये इत्यतर्जयत्। आत्मानं सर्प इति भावयित्वा तेन औदासीन्यं न कार्यमित्यजागरयत्। आत्मनः दिव्यतेजसि विश्वासं प्राचीकटत्। मुञ्च मुञ्चेति आम्रेडितेन तमुपससार। पक्षिराजः तं व्यर्थगर्जनं प्रत्युत्तरेण विना पक्षयोर्वातेनापसारयामास। पक्षाभ्यां दूरतो नीतः भृङ्गिः महादेवस्य पादयोरेव पपात। गरुडस्तु प्रयागं प्रत्युदडयत।

शुष्कपर्णवत् गिरीशस्य पादयोः निपतितं भृङ्गिं दृष्ट्वा पार्वती प्राहसत्। "शिवदूत! गरुडं हरिवाहनं सामान्यं खगं अमनुथाः। पश्य, तस्य पक्षवातेन क्लेशशून्येन कथं परिभवमवाप्नुयाः। लोकेश! शुष्कगात्रं, बलहीनं दूतं कुतः प्रेषितवानसि। त्वया गरुडः पन्नगाशनः बलवानिति न विदितपूर्वं किम्। एषः तव दूतः भृङ्गिः वृद्धः। प्रिया च गङ्गा सागरगामिनी। त्वया घृतं वस्त्रं गजचर्म। खट्वाङ्गमेव शस्त्रम्' इति परिहासवचोभिः भर्तारमुद्वेजयामास। शङ्करः वृषमास्फाल्य जगज्जनन्यै तस्य पौरुषं प्रकाशयितुं पुनरपि तं प्रेषयामास।

नन्दी उमाधवेन प्रेरितः गरुडमुपासरत्। नासाप्रवातेन दैवबलपुष्टेन गरुडं भ्रामयामास। भूतलं सर्वमपि गरुडः बभ्राम। पक्षिराजः तं वायुवेगं रोद्धुं न शशाक। सत्यलोकमवाप। कैलासं प्राविशत्। वैकुण्ठं ददर्श। दैवसंकल्पेनेव प्रयागक्षेत्रं प्राविशच्च। कृष्णवाक्यमेव स्मरन् झटिति शिरः प्रयागे मुमोच। जले निपतन्तं, मज्जन्तं शिरः नन्दी अगृह्णात्। कृतकृत्यः विनतात्मजः महाविष्णुमुपेयाय। नन्दी च शिरः गृहीत्वा शङ्करस्य समीपमगात्। उमाधवः तत् शीर्षं स्वीकृत्य गलमालायां संयोजनेन सुरथं कृष्णभक्तं सम्मानयामास। भगवतः भैष्मीजानेः आज्ञा सार्थक्यमापदिति वैनतेयस्य तुष्टिः, उमाधवस्य शंकरस्य प्रीतिरुदियाय इति नन्दी, पार्वत्या परिहसितं वृषं पौरुषयुतमकरवमिति शङ्करः, हरिभक्तयोः सुरथसुधन्वयोः हरिदासस्य गरुडस्य च पराक्रमदर्शनेन उमा च सन्तुष्टहृदया अभूवन्।

## ४३

नैकेषु सन्दर्भेषु भगवान् भैष्मीधवः "मम प्राणा हि पाण्डवाः" इति घोषं घोषं तानरक्षत्। अपि च स्वयमेव "धर्मसंरक्षणार्थाय संभवामि युगे युगे" इति वचनं सत्यापयितुं मत्स्यकूर्माद्यवतारान् प्राकाशयत्। परव्यूहविभावान्तर्याम्यर्चारूपेणावतीर्य धर्मप्रतिष्ठापनेन आर्तानां संरक्षणेन च धर्मं शाश्वतमकरोत्। तस्य लीलाविभूतिविशेषान् स्मारं स्मारं, ध्यायं ध्यायं, आत्मानमेव विस्मरन्ति स्म विभूतिपुरुषाः। ऐहिकेषु विभवेषु मोघाशानां विरक्तजीवनमेवाश्रितवतां कथाः नानाविधाः। भगवन्तं निष्कामभक्त्या आराधयन्तः बहवः कृतकृत्या आसन्। सकामाः तं तोषयन्तः लब्धेष्टार्थाः असंख्येयाः आपत्स्वेव तं ध्यायं ध्यायं पूताश्च बहवोऽभूवन्। केचनान्ये भगवतः आराधनं कर्तव्यं मन्वानाः अनायासेन भरणं लप्स्यन्ते स्म च।

हंसध्वजः कृष्णस्य पृश्निगर्भस्य चेष्टितानि श्रावं श्रावं तस्मिन्नेव न्यस्तचित्तः कालं निरीक्षामास। तस्य पुत्राः बान्धवाः, पौरास्सर्वे यथा राजा तथा प्रजा इति कृष्णध्यानपरा एवासन्। कृष्णदर्शनकुतूहला अपि ते न कदाचित् कर्तव्यं परित्यक्तुं सिद्धाः। युधिष्ठिरस्य यागाश्वप्रग्रहणेन कृष्णस्याप्रियं निश्चितवन्तोऽपि सामयिके कर्मणि सक्ताः राजाज्ञां परिपालयितुं सज्जाः समजनिषत। प्राणान्परित्यक्तुं च कृतसंकल्पा एवासन्। सुधन्वा कृष्णस्य परमभक्तः। तस्यानुग्रहेणैव तप्ततैलकटाहं प्रविश्य निर्व्यथः बहिरागमत्। कृष्णे धुरि रणभूमौ समागते नैव कर्तव्यं विस्मृत्य तस्य चरणकमले आश्रयत। समराङ्गणे पराक्रमेण युद्यमानः, तस्य भगवतः आर्जितानां पुण्यानां पणायितानां लक्ष्यमभवत्। उमाधवस्य शङ्करस्य कण्ठं च अलंचकार। तथैव तस्य भ्राता सुरथः धैर्येण भगवन्तं कृष्णं समरे प्रत्युद्गम्य स्वप्राणान् पर्यत्यजत्। कृष्णस्यानुग्रहेणैव प्रयागमपि पावयामास। शङ्करस्यापि कुतूहलं वर्धयन् तस्य रुण्डमालां शोभयामास।
हंसध्वजः कृष्णभक्तेष्वग्रणीः।, कृष्णं विरुध्य युध्यमानौ पुत्रौ गतासू वीक्ष्यापि रणादुपरतो भवितुं नैच्छत्। बहोः कालात् निरीक्षितः देवकीनन्दनः पुरतः दृष्टोऽपि कर्तव्यमेव सामयिकं युद्धं निरचिनोत्। कर्तव्ये महति स्थिते पुत्रयोर्मरणं न तस्य मन आविवेश। चिन्तां परित्यज्य सारथिना समानीतं सज्जं रथमारुक्षत्।
हंसध्वजस्य रथे पुरतः समागते पृथिवी चकम्पे। शेषः भयविह्वलोऽभवत्। देवाः बिभ्युः। पार्थेन सह तस्यायोधनसंकल्पं निवारयितुं न कोऽपि तेषु समर्थः अवर्तत। भगवान् सत्यभामाजानिः परिस्थितिं चिन्तयामास। रथादवततार। पुरतः कानिचित् पदानि चकाम। करावुभौ प्रसार्य हंसुध्वजमुवाच-
"हसध्वज। त्वं मम भक्ताग्रणीः। त्वयि मे महती प्रीतिः। आगच्छ। आलिङ्गनं मे देहि। कोपं परित्यज। पुत्रशोकं च विस्मर" इति। हरिं वीक्ष्य प्रसन्नं हंसध्वजः तुष्टिमाप। आत्मानं कृतकृत्यमजानात्। "भगवन्! त्वया नाथेन नाथवानहमभवम्। त्वयि प्रसन्ने पुत्रशोकः कीदृशः। भवतः अनुग्रहेणैव न मे त्वत्तो वा अन्यतो वा कालतश्च भयं वर्तते। शाधि मां त्वां प्रपन्नम्' इत्युवाच। कृष्णस्तुष्टोऽभवत्। अश्वं मोचयितुं हंसध्वजमाज्ञापयत्। पाण्डवार्थे प्राणानपि परित्यक्तुं कृतसंकल्पमात्मानमिव तमपि संकल्पयितुमसूचयत्। पार्थं सखायं कर्तुमादिदेश।
नगरे तस्मिन् पार्थादयः पञ्चरात्रमुषित्वा हंसध्वजेन च साकं प्रातिष्ठन्त। केशवस्तु तैस्सर्वैरनुज्ञातः हास्तिनपुरं प्रति ययौ। युधिष्ठिराय सर्वं न्यवेदयत्।

सुधन्वचरितं समाप्तम्।